MSS No. 68 Subject Religion

Name of MSS Vishnuparāna with the Comm. of Sridhara

Author Sridhar

Period — — Folios 81 (1 to 48 + i to xxxiii)

Script Sharda Source Shri Kanth Kaul

Missing Folios

वि॰
स्व प्र॰
१

ॐ श्रीगणेशाय नमः श्रीविन्दुमाधवं वन्दे परमानन्दविग्रहम् वाचं विश्वेश्वरं गङ्गां पराशरमुखान्मुनीन् १ श्रीमच्चित्सुखयोगिमुख्यरचित
व्याख्यां निरीक्ष्य स्फुटं तन्मार्गेण सुबोधसंग्रहवतीमात्मप्रकाशाभिधाम् श्रीमद्विष्णुपुराणसारविवृतिं कर्ता यतिः श्रीधरस्वामी सद्गुरुपादपद्म
मधुपः साधुः सधीशुद्धये २ श्रीमद्विष्णुपुराणस्य व्याख्याः स्वल्पातिविस्तराः प्राचामालोक्य तद्व्याख्यामध्यमेयं विधीयते ३ अस्मिन्विवक्षितेय।
तं वस्तुतत्त्वमनात्मकम् मुनिमैत्रेयनिर्वेदाकृतेव प्रातिमंगलम् ४ जितं तं इति तत्रादौ प्रथमेऽध्याये मैत्रेयेण पराशरे पुराणस्य
वक्तृत्वेन प्रश्नाः द्वाविंशतिः कृताः ॥ इह खलु पुराणं नामेश्वरनिश्वसितस्वरूपत्वेनैव वेदतुल्यत्वेन इतिहासानां नानाविधानां व्यासवसिष्ठपराशरादीनां स्मृ
तिरूपत्वेन वक्ष्यमाणत्वे प्रयोजनत्वे च द्वयपक्षत्वे च तद्व्याख्यानानां मदर्थाभासनिरासतत्तदर्थप्रकाशकत्वपरत्वेन प्रयोजनवत्त्वं पुराणत्वावि।
शेषेऽपि व्याख्यानस्य तु विनन जगज्जीवात्मपरमात्मनामैकात्म्यप्रतिपादनाभ्यासवशाच्चैव पुराणे मम हृल्लोपप्रवृत्तिरुचितत्वेनैतदेव व्याख्याय
ते तत्र च सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितानां तदपवादेन मुक्तेश्च प्रतिपादनम् सदाचारभूगोलभरतोपाख्यानादिनिरूपणस्य साक्षा
त्परंपरया वा मुक्तावेवोपयोगो द्रष्टव्यः पुण्डरीकाक्षेति हृदयाख्ये पुण्डरीके अश्नुते व्याप्नोतीति तथा यद्वा पुण्डरीके इवाक्षिणी यस्येति अत्रत्ये
तत्त्वमविवक्षितं लोहितत्वेनैव नयनोत्कर्षात् शिवाय च नाथं पुण्डरीकी कृतमक्षिपेनेति वा पुण्डरीकं परमं धाम सत्यमव्ययम् उच्यत इत्यादिश्लो
कोक्तयुक्त्या वा पुण्डरीकाक्षेति संबोधनमिति वा नेशतिसंबंधेष्वेतव जितं जयोऽस्त्वित्यर्थः यद्वा त्वया जितं सर्वोत्कर्षेण स्थितमिति य
तेन नमस्कारस्याक्षिप्तः विश्वभावन विश्वोत्पादक हृषीकाणामिंद्रियाणामीशानत प्रवृत्तिनिवृत्तिहेतुत्वात्तेषां स्वामिन् इत्यर्थः व।
त्वः श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुरिति श्रुतेः महापुरुषेति जीवव्यवच्छेदाय महत्त्वं च द्वा सुपर्णा सयुजा सखाया इत्यादिश्रुतेः
नित्यमुक्तस्वभावत्वाच्च पुरि शरीरे शयनात् पुरुषत्वे तिं... पूर्वजेति सर्वेषः एवमेव स्वतः प्राग्भूतत्वेनानन्तत्वं सिद्धत्वे
न वान्येषां तदधीनत्वात् न त्वेकस्मादेव नमस्कारान्मङ्गलसिद्धौ कृते बहुभिर्नमस्कारैरिति चेन्न अस्यपणास्य स्यात् श्रेयः साधन

तेन बहुविघ्नसंभावनया मंगलवाङ्गल्यस्यावश्यकत्वात् अथवा पुण्डरीकाक्षेत्यादि पंचविशेषणैः भूतात्मा चेन्द्रियात्मा च प्रधानात्मा
तथा भवान् आत्मा च परमात्मा च त्वमेकः पंचधा स्थित इति पंचमं श्लोकः पंचात्मा हरिरीरित इति तत्र पुण्डरीकाक्षेति भूतात्मा विश्वभाव
नेति प्रधानात्मा हृषीकेशेति इन्द्रियात्मा महापुरुषेति परमात्मा पूर्वजेत्यात्माभिहितः १ श्रोतृप्रवृत्त्यंगं संबंधं प्रयोजनं च प्रतिपादयितु
माह सदसत्त्वमिति सोतिप्रसिद्धो विष्णुर्व्यापनशीलो देशकालवस्तुपरिच्छेदाभावात् विशतेर्वा विष्णुः प्रवेशनशीलः तत्सृष्ट्वा तदे
वानुप्राविशदिति श्रुतेः मतिभूतिमुक्तिदोस्तु मतिभूत्या तत्त्वज्ञानोद्रेकेण मुक्तिदः यद्वा अविकारिभेदात् मतिस्तत्त्वमो बुद्धिं भूतिमैश्वर्यं
मुक्तिं च ददातीति तथा विष्णुपदस्य प्रवेशनशीलार्थत्वेन मूर्तत्वशंकां निराकरोति ब्रह्मेति पूर्णमित्यर्थः तदपि कुत इत्यत आह सदसत् सर्वा

ॐ नमो भगवते वासुदेवाय जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन नमस्तेस्तु हृषीकेश महापुरुष पूर्वज १ सदसत्त्वं ब्रह्म यदी
श्वरः पुमान् गुणोर्मिसृष्टिस्थितिकालसंलयः प्रधानबुद्ध्यादिजगत्प्रपंचसूः स नोस्तु विष्णुर्मतिभूतिमुक्तिदः २ ॥ ३ ॥

न
न स्थूलं तदिदं सदिदं सदिति सर्वत्र प्रतीयमानत्वात् सूक्ष्ममिति यावत् सदसत्त्वमिति विकारं निराकरोति पुमान् कूटस्थः कुतस्तर्हि सत्यादि प्रवर्तन
मत आह ईश्वरः कर्तुमकर्तुमन्यथा कर्तुं समर्थः तदपि कुत इत्यत आह गुणेति गुणाः सत्त्वरजस्तमांसि तेषामूर्मयः क्षोभजनिताः सृष्टि
स्थितिकालाः कालः संहारः तेषां संलयः संश्लेषो व्याप्तो यस्मिन्स तथा सर्वाधिष्ठानत्वेन स्वरूपमव्याहतमित्यर्थः ननु प्रधानादेव तत्
स्यादिति चेदत आह प्रधानबुद्ध्यादीनां जगत्प्रपंचानां सूः सविता प्रधानस्यानादित्वात् कथं तज्जनकत्वमिति चेन्न प्रलये तस्याकिंचित्करत्वे
न नशक्त्यंशद्वारा जननेनोपचारात् यद्वा प्रधानद्वारा बुद्ध्यादिसूरित्यर्थः यद्वा यो विष्णुर्वेदांतिनां सदसत्त्वं ब्रह्म पातंजलानां क्लेशकर्मवि
पाकाशयैरपरामृष्ट ईश्वरः सांख्यानां पुमान्पुरुषः तदुक्तं कपिलैः न प्रकृतिर्न विकृतिः पुरुष इति स मतिभूतिमुक्तिदोस्त्वित्यन्वयः

वि. पु. टी. प्र. २

स्वयपराशरो मुनिर्गुर्वादिभक्तिं पुरुषार्थसाधनं दर्शयन्मैत्रेयं निमित्तीकृत्य विष्णुतत्त्वप्रतिपादकं विष्णुपुराणमारभते प्रणम्येति प्रथमे न भक्तिश्रद्धातिशयोद्योतनाय विशेषणं ब्रह्मादिस्तंबपर्यंतानामीशं प्रवृत्तिकारणं प्रकृतशास्त्रे संप्रदायप्रवर्तकान् प्रणमति ब्रह्मादीनिति ब्रह्म ऋभुदक्षपुरुकुत्ससारस्वतप्रभृतीन गुरुं कपिलं सारस्वतं वा पुराणं सर्गप्रतिसर्गवंशमन्वंतरवंशानुचरितमिति पंचांगं तत्र यथाय थं प्रथमेंशे सर्गप्रतिसर्गौ द्वितीये शेषागांतभूगोलज्योतिश्चक्रे तृतीये मन्वंतरं चतुर्थे वंशाः पंचमे वंशानुचरितं षष्ठे वैराग्याय योगी प्रलय पादिकमभिधायात्यंतिकप्रलयरूपमोक्षः कथ्यते सौतीति वेदेन संमितं तत्तुल्यमिति ३ इतिहासेत्यत्र शिष्यप्रश्नपूर्वकपुराणप्रवृत्तिहेतुरितिभा वः इतिहेत्यव्ययं पारंपर्योपदेशाभिधायि तस्यासनमासोऽवस्थानमेतेष्विति इतिहासाः पुरावृत्तानि धर्मार्थकाममोक्षाणामुपदेशसमन्वि

प्रणम्य विष्णुं विश्वेशं ब्रह्मादीन्प्रणिपत्य च गुरुं प्रणम्य वक्ष्यामि पुराणं वेदसंमितं ३ इतिहासपुराणज्ञं वेदवेदांगपारगं धर्मशास्त्रादितत्त्वज्ञं वसिष्ठतनयात्मजं ४ पराशरं मुनिवरं कृतपौर्वाह्णिकक्रियं मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ५ त्वत्तो हि वेदाध्ययनमधीतमखिलं गुरो धर्मशास्त्राणि सर्वाणि वेदांगानि यथाक्रमं ६ त्वत्प्रसादान्मुनिश्रेष्ठ मामन्ये नाकृतश्रमं वक्ष्यंति सर्वशास्त्रेषु प्रायशो येऽपि विद्विषः ७ सोऽहमिच्छामि धर्मज्ञ श्रोतुं त्वत्तो यथा जगत् बभूव भूयश्च यथा महाभाग भविष्यति ८ ॥

तं पूर्ववृत्तकथायुक्तमितिहासं प्रवदंते इतिस्मृते वेदवेदांगपारगं वेदस्य तदंगानां शिक्षाकल्पव्याकरणनिरुक्तछंदोज्योतिषां च पारगं धर्मशास्त्रं स्मृतिः आदिशब्दान्न्यायमीमांसादिसंग्रहार्थः धर्मशास्त्रार्थेतिवा पाठः वसिष्ठतनयः शक्तिस्तस्यात्मजं पुत्रं ४ पराशरमितिस्व स्मिन्नेव पराशरोक्तनिर्देशो लोकोक्त्या देहाद्यहंकारद्योतनार्थः प्रणिपत्य दंडवत्प्रणम्य पादग्रहणादिविधिनाभिवाद्य च ५ त्वत्तस्मितमर्थं ग्रहीतं तत्कृतमन्ये शदृशमन्नवदंति वक्ष्यंति इति हाभ्यां त्वत्तो वेदाध्ययनमधीतं कृतमित्यर्थः ओदनपाकं पचतीतिवत् प्रायशो विद्वांसो मांसर्वेणाश्व शुश्रूकृतश्रमं न वदंति अपि तु विद्विषोपि कृताभ्यासमेव वदंतीत्यर्थः ७ पूर्वं यथा जगद्बभूव पुनश्च यथा भविष्यतीति जगतो जन्मप्रकार

॥ २ ॥

२

यन्मयमित्युपादानप्रश्नः यतश्चेति निमित्तप्रश्नः लीनमासीद्यथेति लयाधारप्रश्नः ५ प्रमाणमियत्ता प्रकाशनं वा यत्प्रमाणानि महाभूतानि यत्प्रकाशापादिच सर्वः १० देवादीनां वंशं संभवमित्यन्वसर्गप्रश्नः ११ कल्पान्ब्रह्मायुः परिमितान् महाकल्पान् कल्पविकल्पान्ब्राह्मादीन् संतान विभागानिति पाठे पि स एव वार्थः चतुर्युगैर्वावर्तमानैर्विकल्पितान्विभक्तान् १२ १३ वासिष्ठः शक्तिस्तस्य नन्दन सुत हे पराशर १४

यन्मयं च जगद्ब्रह्मन्यतश्चैतच्चराचरम् लीनमासीद्यथा यत्र लयमेष्यति यत्र च ५ यत्प्रमाणानि भूतानि देवादीनां च संभवम् समुद्रपर्वतानां च संस्थानं च यथा भुवः ६ सूर्यादीनां च संस्थानं प्रमाणं मुनिसत्तम देवादीनां यथा वंशान्मनून्मन्वन्तराणि च ११ कल्पान्कल्पविकल्पांश्च चतुर्युगविकल्पितान् कल्पान्तस्य स्वरूपं च युगधर्मांश्च कृत्स्नशः १२ देवर्षिपार्थिवानां च चरितं यन्महामुने वेदशाखाप्रणयनं यथावद्व्यासकर्तृकम् १३ धर्मांश्च ब्राह्मणादीनां तथा चाश्रमवासिनाम् श्रोतुमिच्छाम्यहं सर्वं त्वत्तो वासिष्ठनन्दन १४ ब्रह्मन्प्रसादप्रवणं कुरुष्व मयि मानसम् येनाहमेतज्जानीयां त्वत्प्रसादान्महामुने १५ पराशर उवाच साधु मैत्रेय धर्मज्ञ स्मारितोऽस्मि पुरातनम् पितुः पिता मे भगवान्वसिष्ठो यदुवाच ह १६ विश्वामित्रप्रयुक्तेन रक्षसा भक्षितो मया श्रुतस्तातस्ततः क्रोधो मैत्रेयासीन्ममातुलः ततोऽहं रक्षसां सत्रं विनाशाय समारभम् भस्मीकृताश्च शतशस्तस्मिन्सत्रे निशाचराः १८ ततः संक्षीयमाणेषु तेषु रक्षःस्वशेषतः मामुवाच महाभागो वसिष्ठो मत्पितामहः १९ अलमत्यन्तकोपेन तात मन्युमिमं जहि राक्षसा नापराध्यन्ते पितुस्ते विहितं तथा २० मूढानामेव भवति क्रोधो ज्ञानवतां कुतः हन्यते तात कः केन यतः स्वकृतभुक्पुमान् २१ संचितस्यापि महता वत्स क्लेशेन मानवैः यशसस्तपसश्चैव क्रोधो नाशकरः परः २२ स्वर्गापवर्गव्यासेधकारणं परमर्षयः वर्जयन्ति सदा क्रोधं तात मा तद्वशो भव २३ ॥

सादप्रवणं प्रसादाभिमुखं येन प्रसादप्रवणेन चित्तेन ज्ञातात् त्वत्प्रसादादहमेतत्सर्वं जानीयां १५ १६ वसिष्ठस्तव कथां किमुवाचेत्यपेक्षायां तदुक्तेर्मूलं ज्ञानकथामाह विश्वामित्रप्रयुक्तेनेत्यादिना १७ २२ यशस्तपसोर्नाशकत्वाद्देवस्वर्गापवर्गयोर्व्यासेधः प्रतिबन्धस्तस्य कारण

विष्णुपुराणसटीक ५८ ॥

गुर्वोक्ताकारिणं शत्रुपक्षीयमपि स्वपक्षलाभं वेत्तीति निदर्शयन्नाह संप्राप्तश्चेत्यादिना २६ २७ यद्यस्माद्गुरोर्वाक्यात्क्षमाश्रा-
श्रिता तस्मात् २८ ३० प्रवृत्ते निवृत्ते च कर्मणि अस्तमला अज्ञानविपर्ययशून्या मतिर्भविष्यतीति निवृत्तकर्मणि स्मृतिप्रसिद्धेः इह वाम

मलैर्निशाचरैर्देयैर्दीनैरनुपकारिभिः सत्रं ते विरमत्वेतत्क्षमासारा हि साधवः २४ एवं तातेन तेनाहमतनीतो महात्मना
उपसंहृतवान्सत्रं सद्यस्तद्वाक्यगौरवात् २५ ततः प्रीतः स भगवान्वसिष्ठो मुनिसत्तमः संप्राप्तश्च तदा तत्र पुलस्त्यो ब्रह्मणः सु-
तः २६ पितामहेन दत्तार्घः कृतासनपरिग्रहः मामुवाच महाभागो मैत्रेय पुलहाग्रजः २७ वैरे महति यद्वाक्याद्गुरोरद्या-
श्रिता क्षमा त्वया तस्मात्समस्तानि भवाञ्छास्त्राणि वेत्स्यति २८ संततेर्न मम च्छेदः क्रुद्धेनापि यतः कृतः त्वया तस्मान्म-
हाभाग ददाम्यन्यं महावरं २९ पुराणसंहिताकर्ता भगवान्त्संभविष्यति देवतापारमार्थ्यं च यथावद्वेत्स्यते भवान् ३० प्र-
वृत्ते च निवृत्ते च कर्मण्यस्तमला मतिः मत्प्रसादादसंदिग्धा तव वत्स भविष्यति ३१ ततश्च भगवान्प्राह वसिष्ठो मत्पिता-
महः पुलस्त्येन यदुक्तं ते सर्वमेतद्भविष्यति ३२ इति पूर्वं वसिष्ठे-
न पुलस्त्येन च धीमता यदुक्तं तत्स्मृतिं यातं त्वत्प्र-
श्नादखिलं मम ३३ सोहं वदाम्यशे-
षं ते मैत्रेय परिपृच्छते पुराण-
संहितां सम्यक् तां नि-
बोध यथातथं
३४ ॥

त्रकाम्यं प्रवृत्तमभिधीयते वैराग्यज्ञानपूर्वं निवृत्तमुप दिशतीति ३१ यथायथं यथार्थं स ३२ ३३ ३४ ॥

श्रोतुः स्वस्य प्रतिपत्त्यै संक्षेपतस्तावत्सर्वं प्रश्नोत्तरं तत्त्वया ग्रहणार्थमाह विष्णोरिति श्लोकेन सकाशात् काशः प्रकाशः ईक्षणमिति याव
त् तत्संनिधिमात्रेण हि मायाजगद्भूतं सृजति लोकान्नु सृजा इति सोऽकामयत बहु स्यां प्रजायेयेत्यादिश्रुतिभिः सिद्धमिच्छादिशब्दपर्यायं यथ
दीक्षणमालोचनात्मकं तेन प्रकारेण जगदुद्भूतं अनेन यथा बभूवेत्यस्य प्रकारप्रश्नस्योत्तरं तत्रैवास्थितं प्रलयकाल इति लयाधारप्रश्न
स्योत्तरं चशब्दाज्जगतः स्थितिरपि तत्रैवेत्युक्तं अस्य जगतः स्थितिसंयमयोः सा वेव कर्त्ता जन्मनोऽप्युपलक्षणं अतेन यत्स्वेन चराचरात्मके
जगदित्यस्य निमित्तप्रश्नस्योत्तरं जगच्च सः इत्युपादानप्रश्नस्योत्तरं उपादानकारणरूपत्वात्कार्यस्य अनेनैव विष्णुः सर्वजगदुपादानरूप
कं हेत्वादिकमनेन विष्णोरेवाह विष्यतीति चैवस्यास्मीत्यादि सर्वप्रश्नस्योत्तरमर्पितं एवं अन्यच्च यथा जगत् भूयो भविष्यति य
न्रूपं च जगत् यतस्तु यत्र पूर्वं लीनं पुनश्च यत्र लयमेष्यति यत्प्रमाणानि भूतानि देवादीनां च संभवमित्यष्टप्रश्नस्योत्तरं प्रथमांशे समुद्र
पर्वतानां च संस्थानं भुवः संस्थानं सूर्यादीनां च संस्थानं तेषां प्रमाणं चेति चतुःप्रश्नोत्तरं द्वितीयांशे देवादीनां तथा वंशान् मनून्मन्वन्तराणि च

विष्णोः सकाशादुद्भूतं जगत्तत्रैव संस्थितं स्थितिसंयमकर्त्तासौ जगतोऽस्य जगच्च सः ३५ इति श्रीविष्णुपु
राणे प्रथमेंऽशे प्रथमः १ पराशर उवाच अविकाराय शुद्धाय नित्याय परमात्मने सदैकरूपरूपाय विष्णवे सर्वजि ष्णवे

वेदशाखाप्रणयनं यथावद्व्यासकर्तृकं धर्मांश्च ब्राह्मणादीनां तथा चाश्रमवासिनां इति षट्प्रश्नोत्तरं तृतीयांशे देवर्षिपार्थिवानां च च
रितमिति प्रश्नोत्तरं चतुर्थांशे विस्तारेणोक्तं एवं चतुर्थांशेन च यदुवंशभूभारहरणार्थमवतीर्णस्य कृष्णस्य चरितं विस्तरेण पंचमांशे क
ल्पान्तकल्पविकल्पांश्च कल्पान्तस्य स्वरूपं चेति प्रश्नत्रयस्य षष्ठांशेन संक्षेपेणोत्तरं स्पष्टगायसौ प्रकृतश इत्यस्योत्तरं षष्ठांशे
इति विवेकः ३५ इति श्रीटीकायां प्रथमांशे प्रथमोऽध्यायः १ अथैतत्संक्षेपवाक्यार्थं प्रतिपाद्य विष्णोः स्वरूपं परापररूपेण गुणतश्च विस्तरेण प्रवा
णार्थं व्याख्यामाह अविकारायेत्यादिभिः श्लोकैः तत्र तावत्स्वकीयाभ्यासेन प्रणामार्थसंक्षेपश्लोकेन जगदुपादानकृतेनाशुद्धिशङ्कां निराकर्तुमविकारादिप
देर्गुणवाराभ्यामणमतिं लोके हि क्रियाश्रयत्वात्कर्तृत्वं विकारो दृष्टः रागादिसंश्लिष्टतया स्वमाहात्म्यरूपतया वृत्तः वृत्तेरपि विकाराय तिवतीर्भिः
पदैः उपादानकारणमपि मृत्सुवर्णादि घटकटकादिना परिणामेनानेकरूपं दृष्टं न तथा वर्तयति एकरूपमेव रूपं यस्य तस्मै सदेति सर्वकालं
त्वयः तत्र हेतुः सर्वजिष्णवे सर्वविजेत्रे सर्वेषां कारणादीनां अतितमतिशयेन जेतुं शीलं यस्य तस्मै एवं भूताय विष्णवे नमः इत्युत्तरेणान्वयः

स

१८

ब्रह्मादिविमूर्तिरूपेण स्मृतिहिरण्यगर्भादिरूपायेति। सर्गस्थित्यन्तकारिणे वासुदेवाय नमः। तदेवं संप्रदर्शितैकत्वमुक्तं तत्त्विवर्तिकत्वेन प्रण
मेति तन्मयभक्तानां तारकाय च २ किंच एकमनेकस्वरूपं यस्य स्थूलसूक्ष्मश्चात्मा स्वरूपं यस्य विरुद्धस्वरूपद्वयं कथमिमत्राह अव्यक्तव्यक्ते
रूपाय अव्यक्तं कारणमव्यक्तं कार्यं तदुभयरूपाय अतोव्यक्तरूपत्वात् एकरूपाय चेत्यक्तरूपत्वादनेकरूपाय स्थूलात्मने चेत्यर्थः एवं सर्वा
त्मत्वेनापास्य कानां मुक्तिहेतवे नमः ३ कार्यकारणत्वमभिनयन्प्रणमति सर्गेति जगतः सर्गादीनां यो मूलभूतः जगन्मयश्चेति।
विष्णवे सर्वव्यापिने तथापि परमात्मने कार्यकारणाभ्यां परम उत्कृष्ट आत्मा स्वरूपं यस्य तत्संगरहितायेत्यर्थः ४ आधारभूतमित्यादि

नमो हिरण्यगर्भाय हरये शंकराय च वासुदेवाय ताराय सर्गस्थित्यन्तकारिणे २ एकानेकस्वरूपाय स्थूलसूक्ष्मात्मने नमः
अव्यक्तव्यक्तरूपाय विष्णवे मुक्तिहेतवे ३ सर्गस्थितिविनाशानां जगतो यो जगन्मयः मूलभूतो नमस्तस्मै विष्णवे
परमात्मने ४ आधारभूतं विश्वस्याप्यणीयांसमणीयसां प्रणम्य सर्वभूतस्थमच्युतं पुरुषोत्तमम् ५ ज्ञानस्वरूप
मत्यन्तनिर्मलं परमार्थतः तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ६ विष्णुं ग्रसिष्णुं विश्वस्य स्थितौ सर्गे तथा
प्रभुम् प्रणम्य जगतामीशमजमक्षरमव्ययं कथयामि यथापूर्वं दक्षाद्यैर्मुनिसत्तमैः पृष्टः प्रोवाच भग
वानब्जयोनिः पितामहः ८ तैश्चोक्तं पुरुकुत्साय भूभुजे नर्मदातटे सारस्वताय तेनापि मह्यं सारस्वतेन च
९॥

तां प्रणम्य कथयामीति च तत्रैवान्वयः अणीयसामप्यणीयांसं श्रुतिः सूक्ष्मतमं सर्वभूते भूतनियंतृत्वेन स्थितं भूतानां स्थैर्य
कार्यवृत्तेरपरिच्छिन्नं ५ अर्थस्वरूपेण देहजीवभ्रान्तिज्ञानेन स्थितं प्रतीतम् ६ विष्णुं ग्रसिष्णुमित्यनेन कालरू
पेण प्रणामः अतः सर्गस्थित्यंतकारिणा इत्यनेनापि न कृतं अत एव नमस्स्वरूपभेदो यत्नार्थं प्रणम्येत स्यादावृत्तिः अत्र
रमवत् ७ ८ पितामहेन दक्षादिभ्यः प्रोक्तं तथा कथं कथ्यते तत्राह तैश्चोक्तमिति ९ ॥

अव्यक्तादिस्वरूपात्परमात्मनो जगत्स्रष्टृत्वादि उक्तं ततः प्राचीनं तत्स्वरूपमाह पर इति चतुर्भिः परः पराणां इन्द्रियेभ्यः परा ह्यर्था अर्थे-
भ्यश्च परं मन इत्यादि श्रुतिस्मृतिभ्यः परत्वेन प्रतिपादितानामिन्द्रियादीनां परः श्रेष्ठः अत एव परम उत्कृष्टः परमात्मा आत्मसंस्थितः अन-
न्याधारः रूपवर्णादिभिर्यो निर्देशः तैश्च विशेषणं तेन च विवर्जितः रूपं शुक्लादि वर्णो ब्राह्मणादिः आदिशब्दाज्जातिक्रियागुणाः ब्राह्मणः।
गौः पाचक इत्यादिनिर्देशेन विशेषणमशक्यः यद्वा रूपादिनिर्देशविवर्जितं रूपाद्यभावात् अत एव विशेषणैरपि विवर्जित इत्यर्थः १०
षड्भावविकारवर्जितत्वमाह अपक्षयेति ननु चैवमसन्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति अ-
स्तीत्येवोपलब्धव्य इत्यादिश्रुतेरस्तित्वेनावश्यांगीकर्तव्ये तथा वृद्धिर्नो यो भावविकारः प्राप्त इत्याशंक्याह शक्यते वक्तुं यः सदास्तीति सर्वे-

परः पराणां परमः परमात्मात्मसंस्थितः। रूपवर्णादिनिर्देशविशेषणविवर्जितः॥ १०॥ अपक्षयविनाशाभ्यां परिणा-
मर्द्धिजन्मभिः। वर्जितः शक्यते वक्तुं यः सदास्तीति केवलम्॥ ११॥ सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततः स वासु-
देवेति विद्वद्भिः परिपठ्यते॥ १२॥ तद्ब्रह्म परमं नित्यमजमक्षयमव्ययम्। एकस्वरूपं च सदा हेयाभावाच्च निर्मलम्॥ १३॥

दास्तित्वे च न भावविकारः किंतु जन्मानंतरमस्तित्वमेव कदाचित्कत्वात् अनेनायं दोष इत्यर्थः ११ परमात्मैव च सान्न ततेत्र विज्ञेयो वा-
सुदेव इत्युच्यत इत्याह सर्वत्रेति सर्वत्रासौ वसति समस्तं वास्मिन्वसतीति वै प्रसिद्धौ ततः स वासुदेव इति विद्वद्भिरुच्यत इत्य-
र्थः वसनाद्वासनाद्वा वासः द्योतनाद्देवः वासश्चासौ देवश्चेति वासुदेवः वासनाद्द्योतनाच्चैव वासुदेवं ततो विदुरिति मोक्षधर्मे
श्रुतिरुक्तेः १२ स एवोपनिषदैर्ब्रह्मेत्युच्यत इत्याह तद्ब्रह्मेति यः परमात्मा रूपवर्णादिरहितेन जन्मादिरहितेन च ल-
क्षितः स एव वासुदेव इति ब्रह्मेति चोच्यते न च स्वतंत्रं लक्षणभेदाभावादित्याशयेन तदेव लक्षणमनुवदति परमं नित्यमि-
त्यादि हेयमविद्या तत्कार्यं च तदभावान्निर्मलं तदुक्तं भागवते वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ब्रह्मेति परमात्मेति भगवानिति

तदेवं षड्भिर्ब्रह्मस्वरूपं निरूप्य तस्यैव स्वमायाविष्कृतव्यक्तादिविश्वरूपस्य सर्वप्रपंचोपादाननिमित्ततामाह तदेतदिति तदेव ब्रह्म
एतत्सर्वं प्रपंचजातं कथंभूतं व्यक्ताव्यक्तस्वरूपवत् व्यक्तं महदादि अव्यक्तं प्रधानं तत्स्वरूपवत् तेन रूपेण स्थितं सत् तथा पुरुषरू
पेण कालरूपेण च स्थितं सत् १४ तद्रूपोक्तप्रकारमाह परस्येति सपादेन तत्र सोऽकामयतेत्यादिश्रुत्युक्तेक्षणादिकर्ता पुरुषः
परस्य ब्रह्मणः प्रथमं रूपं तथा च पुराणं तदेव ब्रह्म तत्तस्यैव योनिगुणाभ्यक्तरूपैक एव शुद्धोऽप्यशुद्ध इव मूर्तिविभागभेदैः ज्ञानान्वि
न्वितः सकलसत्वविभूतिकर्ता तस्मै नमोऽस्तु पुरुषाय सदाव्ययायेति तस्यैव शुद्धस्य ब्रह्मणो यानुसमनेन पुरुष इति निर्दिष्टस्याप्य:
तथा च नारदीये तत्त्वे त्रीणि विष्णोस्तु रूपाणि पुरुषाख्यान्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितं तृतीयं सर्वभूतस्थं
तानि ज्ञात्वा विमुच्यत इति भागवते च कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ततोऽभ

तदेतत्सर्वमेवासीद्व्यक्ताव्यक्तस्वरूपवत् तथा पुरुषरूपेण कालरूपेणावस्थितं १४ परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज
व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथापरं १५ प्रधानपुरुषव्यक्तकालानां परमं हि यत् पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदं १६
प्रधानपुरुषव्यक्तकालास्तु प्रविभागशः रूपाणि स्थितिसर्गान्तव्यक्तिसद्भावहेतवः १७ व्यक्तं विष्णुस्तथाव्यक्तं पु
रुषः कालस्तथैव च क्रीडतो बालकस्येव चेष्टां तस्य निशामय १८ ॥

वन्महत्तत्त्वमित्यादि व्यक्ताव्यक्ते तथैवान्ये रूपे पुरुषवत्तात्तीयमव्यक्तं ततो जातं व्यक्तं चेति द्वे अन्ये विलक्षणे रूपे जडत्वात् कालस्तथा
परं रूपं सर्वेषां क्षोभकत्वादेते निर्देशः १५ परस्य ब्रह्मणो रूपाणि तत्त्वाश्चान्येषामुपादेयत्वं वा रयन्नाह प्रधानेति सूरयो यत्पश्य
न्ति तदेव विष्णोः परं रूपमित्यर्थः १६ तर्हि प्रधानादिरूपैः किं कार्यमत आह प्रधानेति प्रधानादिरूपाणि तु जगतः स्थितिसर्गा
न्तानां व्यक्तिसद्भावहेतवः व्यक्तिरभिव्यक्तिः प्रकाशः सद्भाव उत्पत्तिस्तद्धेतवः कारणानि कथं प्रविभागशः च विभागः तेस्तु
श्चाचतथासंस्थितः स्थितौ पालयन्विष्णुरेणावतरन्विष्णुरूपेण जनार्दनः ब्रह्मादिरूपः कालस्तथैवाखिलजन्तवः विष्णुमन्वादयः काल
इत्यादिना वक्ष्यमाणेन विभागप्रकारेण १७ ननु एवं चेत्तद्रूपो भगवान् विष्णुः सर्गादौ किमर्थं प्रवर्तते तत्राह व्यक्तं विष्णुरिति विष्णुर्व्यक्तादि

रूपो भवतीति यतः क्रीडतो बालकस्य चेष्टामिव जानीहि न तु कर्तृलोकवत्तु
लीलाकैवल्यमिति १८ ॥

ऽपेदानीं तदेव स्वरूपचतुष्टयं प्रपंचयिष्यन् प्रथमं प्रधानं प्रपंचयति अव्यक्तमिति पंचभिः यदव्यक्तं तदृषिसत्तमैः कारणं प्रधानं प्रकृतिरिति च प्रोच्यते नित्यं सदेकरूपं वृद्ध्यादीहीनमित्यर्थः सदसदात्मकं कार्यकारणशक्तियुक्तं १९ अक्षय्यं अविनाशि आधारांतरवर्जितत्वान्नान्याधारं अनन्याश्रयं मूलकारणत्वात् नान्याधारमिति वक्तव्ये अन्यथा शब्दस्य द्वितीयाविभक्ति लोपश्छांदसः अमेयं इयत्ताशून्यं अभावेन चले २० गुणत्रयसाम्यरूपं अनादिजन्मशून्यं प्रभवाप्ययं प्रभवंतीति प्रभवाः कार्याणि अपियंति लीयंते अस्मिन्नित्यप्ययः कार्याणां लयस्थानमित्यर्थः अग्रे सृष्टेः पूर्वं अतीतप्रलयानंतरं वस्तु सर्वमेव कार्यजातं तेन व्याप्तं अंतर्निहितमासीदित्यर्थः नमः आसीत् तमसा गूढमग्रे प्रकेतमिति श्रुतेः २१ अत्रार्थे विद्वत्संमतिमाह वेदवादविदः वेदवादाः सिद्धांतपराणि वाक्यानि तद्विदः नियताः

अव्यक्तं कारणं यत्तत्प्रधानमृषिसत्तमैः । प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकं १९ अक्षय्यं नान्यदाधारममेयमजरं ध्रुवं शब्दस्पर्शविहीनं तद्रूपादिभिरसंहितं २० त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययं तेनाग्रे सर्वमेवासीद्व्याप्तं वै प्रलयादनु २१ वेदवादविदो विद्वन्नियता ब्रह्मवादिनः पठंति चैतमेवार्थं प्रधानप्रतिपादकं २२ नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यत् श्रोत्रादिबुद्ध्यानुपलभ्यमेकं प्राधानिकं ब्रह्म पुमांस्तदासीत् २३ विष्णोः स्वरूपात्परतो हि तेऽन्ये रूपे प्रधानं पुरुषश्च विप्र तस्यैव तेऽन्येन धृते वियुक्ते रूपांतरं तद्द्विज कालसंज्ञम् २४ ॥

तात्पर्यनिष्ठाः ब्रह्मवादिनः वेदप्रवचनशीलाः एतमेवार्थं मद्विषयकं त्वर्थं सूचनपरं प्रधानप्रतिपादकं नाहरित्यादिश्लोकं पठंति २२ नाहो नाहो न रात्रिरासीत् सूर्याद्यभावात् वाय्वाद्यभावात् तमः अहोभावात् ज्योतिः न चान्यत्किंचिदभूत् शब्दाद्यभावात् श्रोत्रादिजन्यज्ञानेनानुपलभ्यं प्राधानिकं प्रधानमेव प्राधानिकं ब्रह्म च पुमांश्चेति च यमेव तदा प्रलये आसीत् तथा च श्रुतिः नासदासीन्नो सदासीत्तदानीमित्यादि २३ कालस्वरूपं विवृण्वन् विष्णोरिति वचनाभ्यां परतो निरुपाधेः विष्णोः स्वरूपात्ते प्रागुक्ते प्रधानं पुरुषश्च इति द्वे रूपे अन्ये विलक्षणे मायाकल्पिते इत्यर्थः संपति तस्य विष्णोरेव अन्येन रूपेण ते द्वे रूपे धृते संसर्गकाले संयोजिते वियुक्ते च प्रलयकाले यद्धा स्थितिकाले धृते वियुक्ते प्रलयकाले अन्येनाविधीयते योगवियोगौ प्रलयाभावप्रसंगात् तदेतत्कालसंज्ञं रूपांतरं २४

वि॰ पु॰
प्र॰ टी॰
१९

कालस्वरूपेण प्रकृतिपुरुषयोर्वियोजनं प्रतिसंचरं समाप्य योपपादयति । प्रकृताविति । अतीतग्रहणं सर्वप्रलयोपलक्षणार्थं अतीतप्रलयेषु यस्माद्व्यक्तं प्रकृतौ संस्थितं लीनं विष्णुमासीत् तस्माद्धि अस्य प्रकृतौ संचरणात् प्राकृतोऽयं महाप्रलय उच्यते । एतच्च प्रकृतिपुरुषयोर्वियोगं विना न घटत इति भावः २५ कालस्य प्रलये स्थितिरित्युक्तं तस्यानादिनिधनत्वमाह अनादिरिति अतः कार्याण्यप्युपपादयिमाणयति अव्युच्छिन्ना इति ततः कारणादेते सर्गस्थित्यन्तसंयमाः सर्गस्थितिप्रलयाः अव्युच्छिन्नाः प्रवाहरूपेणाविरताः ततः कारणात्तस्मिन् प्रलये गुणसाम्ये प्रधाने पुरुषे च पृथक्स्थिते पृथक्तया व्यवस्थिते सति तयोर्वियोगकारणार्थं कालात्मरूपं वर्तते अन्यथा प्रलयानिर्वाहादिति भावः नाशोऽनन्तरविरहितत्वात् सूर्यादिगत्युपलक्षितः स्थूलकालो नास्त्येवेत्युक्तं सूक्ष्मस्तु यावन्महाप्रलयं प्रकृतिपुरुषवियोगधारकोऽविनाशी स्वरूपभूतः कालो वर्तते इत्युच्यत इत्यविरोधः । अनेनैव प्रलये प्रकृत्या वियुक्तः सन् पुमान् लीन इव तिष्ठन् सर्गकाले च प्रकृ- २९

प्रकृतौ संस्थितं व्यक्तमतीतप्रलये तु यत् । तस्मात्प्राकृतसंज्ञोऽयमुच्यते प्रतिसंचरः ॥ २५ अनादिर्भगवान्कालो नान्तोऽस्य द्विज विद्यते । अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः ॥ २६ गुणसाम्ये ततस्तस्मिन्पृथक्पुंसि व्यवस्थिते । कालस्वरूपरूपं तद्विष्णोर्मैत्रेय वर्तते ॥ २७ ततस्तु तत्परं ब्रह्म परमात्मा जगन्मयः । सर्वगः सर्वभूतेशः सर्वात्मा परमेश्वरः ॥ २८ प्रधानपुरुषौ चापि प्रविश्यात्मेच्छया हरिः । क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययौ ॥ यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते । मनसो नोपकर्तृत्वात्तथासौ परमेश्वरः ॥ ३० ॥

तिमधिष्ठाय महदादिकर्ता पुरुष इति पुरुषस्वरूपमपि विवृतं द्रष्टव्यं २७ इदानीं व्यक्तस्वरूपप्रपंचाविर्भावस्य परमेश्वरात् प्रकृतिपुरुषक्षोभप्रकारमाह तत इति पंचभिः ततः सर्गकाले संप्राप्ते परमेश्वरो हरिः स्वेच्छया प्रधानं पुरुषं च प्रविश्य क्षोभयामासेति हि यावव्ययः कथंभूतो हरिस्तत्राह तदवस्थान्यादि अव्यक्तादिवत्तद्रूपविलक्षणः कथंभूतौ प्रधानपुरुषौ व्ययाव्ययौ परिणामिनौ उपादाननिमित्तभूतावित्यावत् पूर्वप्रलयकाले वियुक्ततया तन्निवृत्तौ स्थितौ तौ व्याप्तभूतौ प्रधानपुरुषौ स्वकालशक्त्या उद्दीपकत्वात् संयोज्य स्वसृष्ट्युन्मुखौ चकारेत्यर्थः २९ प्रविश्य क्षोभयामासेत्युक्तमाशंक्य सक्रियत्वं वारयति । यथेति सन्निधिमात्रेणैव गंधो मनसः क्षोभाय जायते न तूपकर्तृत्वात्तद्वन्न हि क्रियाकारित्वात् ३ ६

ननु प्रधानादीनां मिथः स्वरूपाव्यतिरेकात् क्षोभ्यस्यान्यस्य तत्कार्यस्य वाभावात् कथं क्षोभकत्वं तत्राह सएवेति द्वाभ्यां संकोचः साम्यं विकासो गुणक्षो
भः ताभ्यामवस्थाभिः प्रधानत्वेपि सएवास्थितः तदवस्थाद्वयोपेतं प्रधानमपि विष्णुरेवेत्यर्थः ३१ विकासाणुस्वरूपैर्महाभूतमहदादिरूपैर्ब्रह्मरूपा
दिभिर्जीवभेदैरुपलक्षितः व्यक्तस्वरूपश्च समष्टिव्यष्टिदेहात्मकश्च विष्णुरेवेत्यर्थः ३२ तदानीं महदादिक्रमेणाव्यक्तात् प्रपंचसृष्टिमाह गुण
साम्यादिति सदि बीजं वा आदेर्वैदिविवर्त्यते तेन ततः क्षोभानंतरं तस्मात् गुणसाम्यात् क्षेत्रज्ञेन पुरुषेणाधिष्ठितात् गुणानां व्यंजने महत्तत्त्वं व्यज्यते तेनेति व्यं
जनं तत्सर्गसंभूतिरुद्भवोभूत् ३३ अत्र च यथा मृदेव पिंडाद्यवांतरकार्यावस्थामापद्यमाना घटादेरुपादानं दंडादिकं तु निमित्तमात्रं एवं तदावनत

सएव क्षोभको ब्रह्मन् क्षोभ्यश्च पुरुषोत्तमः स संकोचविकासाभ्यां प्रधानत्वेपि च स्थितः ३१ विकासाणुस्वरूपैश्च ब्रह्मरूपादिभिस्त
था व्यक्तस्वरूपश्च तथा विष्णुः सर्वेश्वरेश्वरः ३२ गुणसाम्यात्ततस्तस्मात्क्षेत्रज्ञाधिष्ठितान्मुने गुणव्यंजनसंभूतिः सर्गकाले द्विजो
त्तम ३३ प्रधानतत्त्वमुद्भूतं महांतं तत्समावृणोत् सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् ३४ प्रधानतत्त्वेन समं त्वचा बीजमिवा
वृतम् वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ३५ त्रिविधोयमहंकारो महत्तत्त्वादजायत भूतेंद्रियाणां हेतुः स त्रिगुणत्वान्महा
मुने ३६ यथा प्रधानेन महान्महता स तथावृतः भूतादिस्तु विकुर्वाणः शब्दतन्मात्रकं ततः ३७ ससर्ज शब्दतन्मात्रादाकाशं श
ब्दलक्षणं शब्दमात्रं तथाकाशं भूतादिः स समावृणोत् ३८ आकाशस्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह बलवानभवद्वायुस्तस्य स्पर्शो
गुणो मतः ३९ आकाशं शब्दमात्रं तं स्पर्शमात्रं समावृणोत् ततो वायुर्विकुर्वाणो रूपमात्रं ससर्ज ह ४० ॥

गमात् विनापि दंडमानादि नाहास्तथैवेश्वराधिष्ठितं प्रधानमेव महदाद्यवांतरकार्यावस्थामापन्नमुपादानं तया व्याप्तं च चरमकार्यस्याप्युपादान
मिति दर्शयितुं पूर्वकार्येण उत्तरकार्यस्य व्याप्तिमाह प्रधानतत्त्वमित्यादिना उद्भूतं महांतं कर्मभूतं तदुपादानभूतं प्रधानतत्त्वं कर्तृभूतं समा
वृणोत् व्याप्नोत् यतः देवविहृणोति सात्त्विक इति ३४ समं मन्ततः ततोन्यतिरेके यथा भवति एवं त्वचा बीजं यथा आवृतं तथा सात्त्विकादिस्त्रयोऽ
भूतो महान्प्रधानतत्त्वेन समं तादात्म्येनावृत इत्यर्थः वैकारिकः सात्त्विकः तैजसो राजसः भूतादिस्तामस इति स्वयमेव व्याख्यातं ३५ स च भूतानां
मिंद्रियाणां च हेतुः देवानामप्युपलक्षणं ३६ तामसाहंकारकार्यं प्रपंचयति भूतादिरिति त्रिभिः विकुर्वाणः क्षुभ्यन्नित्यर्थः ३७ ४० ॥

वि पु.
प्र टी.
७

प्रभवंतस्माद्द्वयोर्हीनाः समुद्राश्च भवन्तीत्यर्थः ५० अंडस्यांतः स्थितिमुक्त्वा तद्बाह्यस्थितिमाह वारीत्यादिना तत्र कटाहरूपपृथिव्यावरणानं
तरं तद्बहिः प्रत्येकं वारिवह्न्यादिभिर्दशगुणमुत्तरोत्तरं पृथिव्यावरणात्कोटियोजनप्रमाणाद्दशगुणं तोयावरणं ततो दशगुण
ज्योतिरुत्पद्यते वायोस्तद्रूपगुणमुच्यते स्पर्शमात्रं तु वै वायू रूपमात्रं समावृणोत् ५१ ज्योतिश्चापि विकुर्वाणं रसमात्रं ससर्ज ह ।
संभवंति ततोऽम्भांसि रसाधाराणि तानि च ५२ रसमात्राणि चांभांसि रूपमात्रं समावृणोत् विकुर्वाणानि चांभांसि गंधमात्रं ससर्जि
रे ५३ संघातो जायते तस्मात्तस्य गंधो गुणो मतः तस्मिंस्तस्मिंस्तु तन्मात्रा तेन तन्मात्रता स्मृता ५४ तन्मात्राण्यविशेषाणि अ
विशेषास्ततो हि ते न शांता नापि घोरास्ते न मूढाश्चाविशेषिणः ५५ भूततन्मात्रसर्गोयमहंकारात्तु तामसात् तैजसानींद्रिया
ण्याहुर्देवा वैकारिका दश ५६ एकादशं मनश्चात्र देवा वैकारिकाः स्मृताः त्वक्चक्षुर्नासिका जिह्वा श्रोत्रमत्र च पंचमं ५७ श
ब्दादीनामवाप्त्यर्थं बुद्धियुक्तानि वै द्विज पायूपस्थौ करौ पादौ वाक् मैत्रेय पंचमी ५८ विसर्गशिल्पगत्युक्तिकर्म तेषां च कथ्यते
आकाशवायुतेजांसि सलिलं पृथिवी तथा ५९ शब्दादिभिर्गुणैर्ब्रह्मन्संयुक्तान्युत्तरोत्तरैः शांता घोराश्च मूढाश्च विशेषास्तेन ते स्मृ
ताः ६० नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ६१ समेत्यान्योन्यसंयोगं परस्प
रसमाश्रयात् एकसंघातलक्ष्याश्च संप्राप्यैक्यमशेषतः पुरुषाधिष्ठितत्वाच्चाप्यव्यक्तानुग्रहेण च महदाद्या विशेषांता ह्यंडमु
त्पादयंति ते ६३ तत्क्रमेण विवृद्धं तु जलबुद्बुदवत्समं भूतेभ्योऽण्डं महाबुद्धे बृहत्तदुदकेशयं ६४ प्राकृतं ब्रह्मरूपस्य विष्णोः स्था
नमनुत्तमम् तत्राव्यक्तस्वरूपोऽसौ व्यक्तरूपी जगत्पतिः ६५ विष्णुर्ब्रह्मस्वरूपेण स्वयमेव व्यवस्थितः मेरुरुल्बमभूत्तस्य ज
रायुश्च महीधराः गर्भोदकं समुद्राश्च तस्यासन्सुमहात्मनः ६६ साद्रिद्वीपसमुद्राश्च सज्योतिर्लोकसंग्रहः तस्मिन्नंडेऽभवद्विप्र
सदेवासुरमानुषः ६७ वारिवह्न्यनिलाकाशैस्ततो भूतादिना बहिः वृतं दशगुणैरंडं भूतादिर्महता तथा अव्यक्तेनावृतो ब्रह्मं
स्तैः सर्वैः सहितो महान् ६८ एभिरावरणैरंडं सप्तभिः प्राकृतैर्वृतं नारिकेलफलस्यांतर्बीजं बाह्यदलैरिव

वक्ष्यमाणमित्येवं दशगुणोत्तराणि
[illegible] ये व्याप्ता आवरणानि सप्त प्रकृत्यावरणं त्वष्टममपरिमितं महदादिभिश्चावरणै[illegible] भिर्बहिरावृतमिति श्लोकार्थः प्रकृति

तदेवं ब्रह्मांडं सृष्ट्वा तस्मिन् लीलया प्रविष्टस्य परमेश्वरस्य गुणावतारैरवांतरसृष्ट्यादिलीलामाह जुषन्निति यावदध्यायसमाप्ति विसृष्टौ विविधच
राचरसृष्टौ संप्रवर्तते ६१ यावत्कल्पविकल्पना ब्रह्मादिनावसानं यावत् सत्वभृत् सत्वगुणाधिष्ठाता ६२ तमोद्रेकी तमोगुणसंश्रयः तमउद्रेकवानि
त्यर्थः ६३ परमेश्वरः शेते ब्रह्माद्यवतारमूलस्वरूपेण ६४ ब्रह्मादिरूपाणि च तस्यैवातिरिक्तानि न भवंतीत्याह सृष्टिस्थित्यंतकरणादितिकरणा।
मिति यावत्सृष्ट्यादिकरणनिमित्तं यस्याः संज्ञां यातीत्यर्थः ६५ स्रष्टृसृज्यादिभेदश्च न तात्विक इत्याह स्रष्टेति विष्णुरेव स्रष्टा आत्मानमेव सृजति
पाल्यश्च पालकश्च उपसंहार्यश्च संहर्ता च स्वयमेव ६६ उक्तं स्पष्टयन्नाह पृथिवीति यद्यस्मात् पृथिव्याप इत्यादि सर्वं जगत् पुरुषाख्यं हि पुरुषसंज्ञमेव

जुषन्रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ब्रह्मा भूत्वास्य जगतो विसृष्टौ संप्रवर्तते ६१ सृष्टं च पात्यनुयुगं यावत्कल्पविकल्पना
सत्वभृद्भगवान्विष्णुरप्रमेयपराक्रमः ६२ तमोद्रेकी च कल्पांते रुद्ररूपी जनार्दनः मैत्रेयाखिलभूतानि भक्षयत्यतिभीषणः ६३
भक्षयित्वा च भूतानि जगत्येकार्णवीकृते नागपर्यंकशयने शेते च परमेश्वरः ६४ प्रबुद्धश्च पुनः सृष्टिं करोति ब्रह्मरूपधृक् सृष्टिस्थि श्च
त्यंतकरणा ब्रह्मविष्णुशिवात्मिकां स संज्ञां याति भगवानेक एव जनार्दनः ६५ स्रष्टा सृजति चात्मानं विष्णुः पाल्यं च पाति च उपसं
हरते चांते संहर्ता च स्वयं प्रभुः ६६ पृथिव्यापस्तथा तेजो वायुराकाश एव च सर्वेन्द्रियांतःकरणं पुरुषाख्यं हि यज्जगत् ६७ स एव
सर्वभूतात्मा विश्वरूपो यतोऽव्ययः सर्गादिकं ततोऽस्यैव भूतस्थमुपकारकं ६८ स एव सृज्यः स च सर्गकर्ता स एव पात्यत्ति च पाल्य
ते च ब्रह्माद्यवस्थाभिरशेषमूर्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः ६९ ॥

पुरुष एवेदं सर्वमिति श्रुतेः ६७ ननु कथं स एव सर्गादिकं ते
सृज्यंते पित्रादीनां कर्तृत्वं पालकादीनां प्रतीयमानत्वाच्चेत्याह स एवेति यतः स हरिरेव सर्वभूतानामीश्वरः कर्तृकोऽविश्वरूपश्च ततो हेतोः
भूतस्थं पित्रादिरूपस्थितं सर्गादिकं अस्य हरेरेवोपकारकं तत्पुष्टकैस्तद्धिभूतेरेव विस्तारात् यथा ऋत्विग्भिः कृतं यजमानस्यैवोपकारकं
तत्पुष्टकैस्तद्धिभूतेरेव विस्तारादित्यर्थः ६८ उक्तं स्पष्टयन्नाध्यैकामुपसंहरन् विवक्षितमर्थमाह स एवेति श्रुति चेति चकारादयो तत्र ब्र
ह्माद्यवस्थाभिः सर्गादिकर्ता अशेषमूर्तिः सृष्ट्यादिरूपः अतो विष्णुरेव वरिष्ठः महत्तमः श्रेष्ठः परमार्थ इति यावत् वरदश्च वरेण्यः परमा

इति श्रीटीकायां प्रथमेंऽशे द्वितीयः २ तदेवं ब्रह्मणः स्रष्टादिकर्तृत्वमुक्तं तत्र शंके निर्गुणस्येति सत्वादिगुणरहितस्य अप्रमेयस्य देशकालाद्यन
वच्छिन्नस्य शुद्धस्य अदेहस्य असहकारस्य शून्यस्येति वा अमलात्मनः पुण्यपापसंस्कारशून्यस्य रागादिशून्यस्येति वा एवंभूतस्य ब्रह्मणः कथं सर्गा
दिकर्तृत्वमिष्यते यतः हि लब्धगौरवो लोके घटादिषु कर्तृत्वादिदर्शनादित्यर्थः १ परिहरति शक्तय इति सार्द्धेन लोके हि सर्वेषां भावाना
नां मणिमन्त्रादीनां शक्तयः अचिन्त्यज्ञानगोचराः अचिन्त्यं तर्कासहं यज्ज्ञानं कार्यान्यथानुपपत्तिप्रमाणकं तस्य गोचराः सन्ति यद्वा अचिन्त्या भि
न्नाभिन्नत्वादिविकल्पासहिष्णुतया इत्थंभूताः केवलमर्थापत्तिज्ञानगोचराः सन्ति यत एवं अतो ब्रह्मणोऽपि तास्तथाविधाः सर्गाद्याः सर्गादिहे
तुभूताः भावशक्तयः स्वभावसिद्धाः शक्तयः सन्ति च पावकस्य दाहकत्वादिशक्तिवत् अतो गुणादिहीनस्याप्यचिन्त्यशक्तिमत्त्वाद्ब्रह्मण
सर्गादिकर्तृत्वं घटत इत्यर्थः श्रुतिश्च न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभा

इति श्रीविष्णुपुराणे प्रथमेंऽशे द्वितीयोऽध्यायः २ मैत्रेय उवाच निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः कथं सर्गादि
कर्तृत्वं ब्रह्मणोऽभ्युपगम्यते १ पराशर उवाच शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः । यतोऽतो ब्रह्मणस्तास्तु सर्गा
द्या भावशक्तयः । भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता २ तन्निबोध यथा सर्गे भगवान्संप्रवर्तते नारायणाख्यो भग
वान्ब्रह्मा लोकपितामहः ३ ॥ ॥ ॥ ॥

विकी ज्ञानबलक्रिया च मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यादि च एवं योजना सर्वेषां भावानां पावकस्योष्णता शक्तिव
दचिन्त्यज्ञानगोचराः शक्तयः सम्भवन्ति एवं ब्रह्मणः पुनस्ताः स्वभावभूताः स्वरूपादभिन्नाः शक्तयः परास्य शक्तिर्विविधैव श्रूयत इत्यादिश्रुते
र्यतो मणिमन्त्रादिभिरग्न्यादेः स्वकार्ये न विहितं तेषां कार्यं ते यत एवं तस्य निरंकुशमैश्वर्यं तथा च श्रुतिः सर्वात्मा अयमात्मा सर्वस्य वशी सर्वस्ये
शानः सर्वस्याधिपतिरित्यादि तपतां श्रेष्ठ इति संबोधयन्नाकाङ्क्षितयः शक्तिः स्वयं तु विवेचेति सूचयति यत एवं अतो ब्रह्मणो हेतोः सर्गा
द्या भवन्ति नात्र काचिदनुपपत्तिरित्यर्थः २ तदेवं ब्रह्मणः सर्गादिकर्तृत्वमुपपाद्य प्रस्तुतं तेनात्मसर्गमवतारयितुमाह तन्निबोधेति

ननुनारायणाख्यपरब्रह्मणोऽकर्तृत्वे ब्रह्मणः कर्तृत्वे हिरण्यगर्भः समवर्तताग्र इत्यादिश्रुतिभिस्तस्योत्पत्तिरुच्यते तत्राह उत्पन्न इति उपचारतः स्वेच्छयाविर्भाव
स्याप्युत्पत्तिमात्रत्वात् ४ अथ परार्धरूपमेव तस्यायुर्मानमाह निजेनेति स्वकीयेन वक्ष्यमाणेन वर्षशतेन तस्यायुः स्मृतं तदायुः स्मृतं तदायुः पराख्यम
वीतिशायित्वात् ५ तेन कालेन तस्य ब्रह्मणः अन्येषां च यदि मानं तत्सजीवनकालस्यापि पादनं संपादने निवोधपराद्धेऽतेऽपि तेनमसत्त्वमु यादान मित्य
र्थः ६ अचरास्त्वये तेषामपीति शेषः तदेव निमेषादिक्रमेण निरूपयति काष्ठेत्यादिना अत्र तत्र लघ्वक्षरमितिपरिमितः कालो निमेषः पंचदश
निमेषैरेका काष्ठा काष्ठात्रिंशत्काष्ठा एका कला त्रिंशत्कलाः एका घटिका तद्द्वयं मौहूर्तिको विधिः मुहूर्तमानप्रकारः ७ तावत्संख्यैः [illegible]

उत्पन्नः प्रोच्यते विद्वद्भिर्नित्यप्रबोधपरावरतः निजेनेतस्यमानेन आयुर्वर्षशतं स्मृतं तत्पराख्यं तदर्द्धं च परार्द्धमभिधीयते ४ काल
स्वरूपं विस्मायस्य यन्मया कीर्तितवानघ तेन तस्य निबोधत्वं परिमाणोपपादनम् ६ अन्येषां चैव जन्तूनां चराणामचराश्च ये भूभ
भूत्सागरादीनाम्मयोक्षाणां च सत्तम ७ काष्ठापंचदशाख्याता निमेषा मुनिसत्तम काष्ठास्त्रिंशत्कलास्तास्तु त्रिंशन्मौ
हूर्तिको विधिः ८ तावत्संख्यैरहोरात्रं मुहूर्तैर्मानवं स्मृतं अहोरात्राणि तावंति मासः पक्षद्वयात्मकः ९ तैः षड्भिरयनं
वर्षं द्वेयने दक्षिणोत्तरे अयनं दक्षिणं रात्रिर्देवानामुत्तरं दिनम् १० दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम् चतुर्यु
गं द्वादशभिस्तद्विभागं निबोधमे ११ ॥ ११ ॥ ११ ॥

त्रिंशत्संख्याकैर्मुहूर्तैः तावंति त्रिंशदहोरात्राणीति लौकिकः सावनो मास उक्तः पक्षद्वयात्मक इति चान्द्रो मासः दर्शावधिमासस्तु भाति।
सौरमिति स्मरते ९ सौरमेवानास्यैवायनप्रकारमाह तैरिति तैः षड्भिर्मासैर्नवांशैः परविप्रकर्षान्मासो मासालक्ष्यं ते सूर्यस्य मेषाद्येकैकराशिभो
गः सौरमासः तैः षड्भिरयनं द्वे अयने तदयनात्मकः सौरः अतः परं दिव्यमानमाह अयनमित्यादिना दक्षिणमयनं देवानां रात्रिः उत्तरमय
नं दिनं एवं सति षष्ठ्युत्तरत्रिशतं अहोरात्रैर्देवानां वर्षमिति द्रष्टव्यम् १० तैर्वर्षैश्चतुर्युगमानमाह दिव्यैरिति दिव्यैर्द्वादशभि
र्वर्षसहस्रैश्चतुर्युगमित्यन्वयः ११ ॥ ३ ॥ ३ ॥ ११ ॥

यथाक्रमं कृतयुगे चत्वारि सहस्राणि त्रेतायां त्रीणि द्वापरे द्वे सहस्रे कलावेकं सहस्रमिति १२ तत्प्रमाणैस्तेषां सहस्राणां यत्प्रमाणं
चत्वारि त्रीणि द्वे चैकमित्युक्तं तत्प्रमाणैस्तत्संख्यैः शतैः पूर्वाभिधा युगस्य पूर्वभागिनी सन्ध्योच्यते तावानेव युगानन्तरवर्ती सन्ध्यांशो यतस्त्व
युगस्य सन्ध्या यास्य कृतत्यावत्प्रकः सन्ध्यांशयोरन्तरेण यः कालः शतसंख्यो तमेवाह युगेतन त्वायन्त्रथमभिधीयत इति १३ तदे
वं युगानां दश सहस्राणि वर्षाणि तत्पूर्वोत्तरभाविनोः सन्ध्यासन्ध्यांशयोः शतैर्द्वे सहस्रे एवं द्वादशभिर्वर्षसहस्रैः एवं द्वादशभिर्वर्षस
हस्रैश्चतुर्युगमिति सिद्धं १४ मन्वन्तरमानेन कल्पमानमाह ब्रह्मण इति १५ तत्सूनवो वा मनुपुत्राः एककाले हि सृज्यन्ते प्राधिकारिणः क्रि
यन्ते निरधिकारा क्रियन्त इत्यर्थः १७ साधिकेत्यत्र श्लोकाः द्विचत्वारिंशता युक्तशतेनाभ्यधिकास्तथा दिव्याब्दाः पञ्चसाहस्रा मासा।

चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः। १२ तत्प्रमाणैः शतैः सन्ध्या पूर्वा त
त्राभिधीयते सन्ध्यांशकस्तु तत्तुल्यो युगस्यानन्तरो हि सः १३ सन्ध्यासन्ध्यांशयोरन्तर्यः कालो मुनिसत्तम युगाख्यः स तु।
विज्ञेयः कृतत्रेतादिसंज्ञितः १४ कृतं त्रेता द्वापरश्च कलिश्चैव चतुर्युगम् प्रोच्यते तत्सहस्रं च ब्रह्मणो दिवसं मुने १५
ब्रह्मणो दिवसे ब्रह्मन्मनवश्च चतुर्दश भवन्ति परिमाणं च तेषां कालकृतं शृणु १६ सप्तर्षयः सुराः शक्रो मनुस्तत्सून
वो नृपाः एककाले हि सृज्यन्ते संह्रियन्ते च पूर्ववत् १७ चतुर्युगाणां संख्याता साधिका ह्येकसप्ततिः मन्वन्तरं मनोः कालः
सुरादीनां च सत्तम १८ ॥

दशादिनाष्टकं चतुर्थांशास्समुहूर्तौ द्वादशाष्ट च पिकलास्तथा काष्ठाः सप्तदश द्वौ च निमेषौ नु इनेतरौ
देवस्यैकनिमेषस्य सप्तमो भाग इष्यते मानुषाब्दास्तु लक्षाणि सार्द्धाष्टादश तत्परं सहस्रमष्टाविंशत्या युक्ता चाष्टचत्वारिंशती चत्व
रिंशत्यहोरात्रयुक्ता मासास्तु षट् तथा नाड्यो द्वादश तावत्यः कलाश्च तदनन्तरं पञ्चविंशतिकाष्ठाश्च निमेषा दशसाग्निका इति च
तुर्युगसहस्रप्रमाणस्य ब्रह्मदिनस्य चतुर्दशधा विभागे क्रियमाणे भागमेकसप्ततिचतुर्युगानि भवन्ति अवशिष्यते चतुर्युगषट्कान्तरस्य
चतुर्दशांशो यथा गणितः अतो मन्वन्तरमेकसप्ततेरधिकमित्यर्थः सुरादीनां च सप्तर्षयः सुराः शक्र इति पूर्वोक्तानां मन्वन्तरमधिकारित्वे

तमेवमन्वंतरकालेदिव्याहै ग्रेणाइति षष्ठाविति १९ तमेवमानुषाद्वैर्गणयति त्रिंशत्कोष इति द्वाभ्यां नियुतानि लक्षाणि २० पूर्वोक्तमधिकं कालं विना २१ ब्राह्मो नैमित्तिकः ब्रह्मनिद्रानिमित्तः प्रतिसंचरः प्रलयः २२ भूर्भुवादिकमित्यर्थः संधिः २३ भोगिशेषस्य वशय्या तत्र तत्र शेते त्रैलोक्यग्रासेन बृंहितः इति पाठे त्रैलोक्यस्य ग्रासनमये जीवे रूपं बृंहितः त्रैलोक्यग्रासबृंहितः त्रैलोक्यग्रासबृंहित इति पाठे शेषं च

ष्टौ शतसहस्राणि दिव्यया संख्यया स्मृतः द्विपंचाशत्तथान्यानि सहस्राण्यधिकानि च १९ त्रिंशत्कोट्यस्तु संपूर्णाः संख्याताः संख्यया द्विज सप्तषष्टिस्तथान्यानि नियुतानि महामुने २० विंशतिश्च सहस्राणि कालोयमधिकं विना मन्वंतरस्य संख्येयं मानुषैर्वत्सरैर्द्विज २१ चतुर्दशगुणो ह्येष कालो ब्राह्ममहः स्मृतः ब्राह्मो नैमित्तिको नाम तस्यांते प्रतिसंचरः २२ तदा हि दह्यते सर्वं त्रैलोक्यं भूर्भुवादिकम् जनं प्रयांति तापार्ता महर्लोकनिवासिनः २३ एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः भोगिशय्यागतः शेते त्रैलोक्यग्रासबृंहितः २४ जनस्थैर्योगिभिर्देवश्चिंत्यमानोऽब्जसंभवः तत्प्रमाणां हि तां रात्रिं तदंते सृजते पुनः २५ एवं तु ब्रह्मणो वर्षमेवं वर्षशतं च तत् शतं हि तस्य वर्षाणां परमायुर्महात्मनः २६ एकमस्य व्यतीतं तु परार्द्धं ब्रह्मणोऽनघ तस्यांतेऽभून्महाकल्पः पाद्म इत्यभिविश्रुतः २७ द्वितीयस्य परार्द्धस्य वर्तमानस्य वै द्विज वाराह इति कल्पोयं प्रथमः परिकीर्तितः २८ इति श्रीविष्णुपुराणे प्रथमेंशे तृतीयोऽध्यायः ३ मैत्रेय उवाच ब्रह्मा नारायणाख्योसौ कल्पादौ भगवान्यथा ससर्ज सर्वभूतानि तदाचक्ष्व महामुने १ पराशर उवाच प्रजाः ससर्ज भगवान्ब्रह्मा नारायणात्मकः प्रजापतिपतिर्देवो यथा तन्मे नि

शासेन सम्यक् ब्रह्मणानेदं स्वस्थः २४ जनस्थैश्चिंत्यमानः महर्लोकस्थानामपि तदा तत्रैव गतत्वात् तत्प्रमाणं ब्रह्माहः परिमितां तां रात्रिं नैवंतर्येण शेते २५ एवं त्विति एवंभूतैरहोरात्रैः पक्षमासादिकल्पनया वर्षं २६ महाकल्प इति अवांतरकल्पपद्मपुष्करप्रादुर्भावादिगुणैर्महत्वान्महाकल्प इत्युच्यते २७ इति विष्णुपुराणटीकायां प्रथमेंशे तृतीयः ३॥ पूर्वाध्याये विशेषमेव ब्रह्मसर्गं प्रसंगेन दर्शितं श्रोतुकामो मैत्रेयः पृच्छति ब्रह्मेति १॥

प्रतिज्ञातं भूतानां सर्गं निरूपयिष्यन् प्रथमं तत्पूर्वं भूतानां प्रलये रूपं वक्तुमाह अतीतकल्पेत्यादिना निशायां प्रलये प्रस्तावः तस्मादुत्थितः सुप्त एवेन दासत्वोद्रिक्तः दृश्यते हि निद्रावसाने प्रबुद्धानां प्रसन्नकरणत्व लक्षणः सत्वातिशयः ३ सर्वसंभवः विश्वस्रष्टा ४ ब्रह्मणा नारायणसंज्ञां प्राप्नुत्यादयति इमं चेति ब्रह्मस्वरूपिणं नारायणं प्रति ब्रह्मस्वरूपो नारायणायवेत्यस्मिन्नर्थे ५ नयतीति नरः प्रोक्तः परमात्मा सनातनः इति निर्वचनात् नरः पुरुषोत्तमस्तस्माज्जातानि नाराः तदुक्तं नारा सर्वात्मनो स्वरूपात्समस्वपरिवत्सरान् तेन नारायणो नाम यदाप पुरुषाद्भवा इति ६ ततः किमनन्तरमाहत्तोयान्तरिति पादेन द्वाभ्यां तोयस्योपरि प्रसुप्तः पर्यंकहस्तात् तदुषित्वा नाना मानाज्ञाय स्या

अतीतकल्पावसाने निशासुप्तोत्थितः प्रभुः सत्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमवैक्षत ३ नारायणः परोऽचिन्त्यः परेषामपि स प्रभुः ब्रह्मस्वरूपी भगवाननादिः सर्वसंभवः ४ इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययम् ५ आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ६ तोयान्तः स महीं ज्ञात्वा जगत्येकार्णवे प्रभुः अनुमानात्तदुद्धारं कर्तुकामः प्रजापतिः ७ अकरोत्स तनूमन्यां कल्पादिषु यथा पुरा मत्स्यकूर्मादिकां तद्वद्वाराहं वपुरास्थितः ८ वेदयज्ञमयं रूपमशेषजगतः स्थितौ स्थितः स्थिरात्मा सर्वात्मा परमात्मा प्रजापतिः ९ जनलोकगतैः सिद्धैः सनकाद्यैरभिष्टुतः प्रविवेश तदा तोयमात्माधारो धराधरः १० निरीक्ष्य तं तदा देवी पातालतलमागतं तुष्टाव प्रणता भूत्वा भक्तिनम्रा वसुन्धरा ॥ पृथिव्युवाच नमस्ते सर्वभूताय तुभ्यं शंखगदाधर मामुद्धरास्मादद्य त्वं त्वत्तोऽहं पूर्वमुत्थिता १२॥

तर्महीं ज्ञात्वा तदुद्धारं कर्तुमिच्छन् नारायणोऽन्यां तनुं तदुद्धारयोग्याम् अकरोदित्यन्वयः ७ पुरा यथा मत्स्यकूर्मादिकां तनुं कल्पादिषु तत्कार्यार्थमकरोत् तद्वत् तथा वक्ष्यति सोपि पयसः पुष्करपर्णे तिष्ठन्सोमन्यत आस्ति वै नून यस्मिन्निदमपि निष्ठतीति स वराहरूपेण तोयमन्यम जन्सपृथिवीमपः आब्जादिमादिति तदा वाराहं वपुरास्थितः सन् तोयं प्रविवेश तत्र तेनान्वयः ८ वेदयज्ञमयं रूपमास्थितः यतो शेषजगतः स्थितौ स्थितः वेदयज्ञाधीनत्वाज्जगत्स्थितेः ९ तदावस्थं पातालतलगतं पृथिवी देवी तं तुष्टाव अस्मात्पातालतलान्मामुद्धर त्वत्तोऽहमुत्थिता

उपादानकारणमपि मम वगगनादीनां च त्वमेवेत्याह त्वन्मयेति त्वन्मुपालवडुपादाना १३ उपादाननिमित्तत्वादिकं मायुयंतोपरब्रह्मस्वरूपेणएवोक्त
पुरुषात्वितत्तद्रूपेणामतिनमस्तुति १४ बुद्ध्यादिरूपेणसृष्ट्यादिकर्तृत्वमेवेत्याह त्वमिति पातापालकः १४ शेषशायने केशवेषि १६ रि
वैकमेव १७ मुमुक्षुणामपितत्त्वमजनीयमित्याह त्वामितिपरंब्रह्मसूर्तिंनामेवाराध्यमुक्तिंप्राप्ताः १८ मनसाग्राह्यमेकस्यंबुद्ध्याचया
परिच्छेद्यंबध्यवसेयं १९ ममत्वत्वदीयत्वेलोकप्रसिद्धमेवेत्याह त्वन्मयेति त्वत्समाश्रयात्वच्छरणाइत्यतेत्वंतभिन्नत्वप्रभमामामयंलो

त्वतोरमऽनाए वैत्वन्मायाहेजनार्दन यथान्यानि च भूतानि गगनादीन्यशेषतः १३ नमस्ते परमात्मात्मन्पुरुषात्मन्नमोस्तुते
प्रधानव्यक्तरूपाय कालभूतात्मने नमः १४ त्वं कर्ता सर्वभूतानां त्वं पाता त्वं विनाशकृत सर्गादिषु प्रभो ब्रह्मविष्णुरुद्रात्मरूपधृक १५
संभवत्वियिनासकलेजगत्येकार्णवीकृते शेषत्वमेव गोविंद चिंत्यमानो मनीषिभिः १६ अवतारायत्परंतत्तत्त्वं न जानाति कश्चन सुरताद्य
यद्रूपं तदर्चंतिदिवौकसः १७ त्वामाराध्य परं ब्रह्म याता मुक्तिं मुमुक्षवः वासुदेवमनाराध्य को मोक्षं समवाप्स्यति १८ यत्किंचि
न्मनसा ग्राह्यं यद्ग्राह्यं चक्षुरादिभिः बुद्ध्या च यत्परिच्छेद्यं तद्रूपमखिलं तव १९ त्वन्मयाहं त्वदाधारा त्वत्सृष्टा त्वामुपाश्रिता माधवी
मिति लोकोयमभिधत्ते ततो हि मां २० जयाखिलज्ञानमय जय स्थूलमयाव्यय जयानंत जयाव्यक्त जय विश्वमय प्रभो २१ यज्ञ
पतेनमस्त्विश्वात्मन्त्वंयज्ञपतेनद्य त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारस्त्वमग्नयः २२ त्वं वेदास्त्वं तदंगानि त्वं यज्ञपुरुषो हरे सूर्याद
यो ग्रहास्तारा नक्षत्राण्यखिलं जगत् २३ मूर्तामूर्तमदृश्यं च दृश्यं च पुरुषोत्तम यच्चोक्तं यच्च नैवोक्तं मयात्र परमेश्वर २४ त
त्सर्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः पराशर उवाच एवं संस्तूयमानोथ पृथिव्या पृथिवीधरः सामस्वरध्वनिः श्रीमान्जगर्ज

कोमाथवींत्वदीयामभिधत्ते २ पद्मपरंकारणंकार्यं च उक्तंनीवेवातदात्मनन्तरूपयज्ञपतेयज्ञफलदवषट्कारः वषडितिमंत्रंतद्वाच्योवा २२
यज्ञपुरुषो यज्ञमूर्तिं यज्ञाराध्यो वा तारा अश्विन्याद्याः अन्यानि नक्षत्राणि विपरीतभयष्यापि प्रियोगदर्शनात् २३ मूर्तममूर्तं वगदृश्यं कवि
नेवा प्रहृष्टमप्रहृष्टं भूयोभूयइत्यादरार्थं २५ सामस्वरवद्ध्वनिर्यस्य सः दानीवाराहेरूपमनुकरणपरिचर्वीरेतज्ञात्यनकस्यंजगर्जेत्यनदत्

वि० पु० टी०

२२

उत्क्षिप्य उद्धृत्य स्फुटे विकसिते पद्मे इव लोचने यस्य स उत्पलपत्रसन्निभः स्निग्धश्यामः २६ निष्क्रम्यमाणविततान्मुनीन्यकर्षेण चालयामास श्रुति
निर्मलान्करोतांतरेप्येवमेवार्थः २७ वाराहस्य खुराग्रैर्विच्छिन्ने विदीर्णे रसातले सति तेन द्वारेणाधस्तात्तोयानि प्रयांति कथंकृतशब्दसन्त
ह्वसंततेर्निर्घोषाय स्याभवति तथा समृप्ति पाठे कृतशब्दसंततिर्यस्मिन्रसातले तस्मिन्नधःप्रयांतीत्यर्थः श्वासानिलेन प्रस्ताः क्षिप्ताः जने जन
लोके २८ विगृह्य विशेषेण गृहीत्वा रोमांतरस्था मुनयः स्तुवन्तीति जनलोकं यावद्रोमप्रसरणादिति भावः २९ तोषेण परीतं व्याप्तं चेतो येषां ते तथा
नरः प्रत्युच्चः स्कंधा तुष्टते नताः अत्र उन्नतं तेरहृष्टिः तथा नतो उन्नतेक्षणमिति पाठे निर्विशेषकोदाररेक्षणमित्यर्थः ३० ईश्वराणां प्रबलदीनापरमेश्वा

ततः समुत्क्षिप्य धरां स्वदंष्ट्र्या महावराहः स्फुटपद्मलोचनः रसातलादुत्पलपत्रसन्निभः समुत्थितो नील इवाचलो महान् २६
उत्तिष्ठता तेन मुखानिलाहतं तत्संभवांभो जनलोकसंश्रयान् प्रक्षालयामास हि तान्महाद्युतीन्सनन्दनादीनपकल्मषान्मु
नीन् २७ प्रयांति तोयानि खुराग्रविक्षते रसातलेऽधःकृतशब्दसंतते श्वासानिलास्ताः परतः प्रयांति सिद्धाः जने ये नियता वसंति २८
उत्तिष्ठतस्तस्य जलार्द्रकुक्षेर्महावराहस्य महीं विगृह्य विधुन्वतो वेदमयं शरीरं रोमांतरस्था मुनयः स्तुवंति २९ तं तुष्टुवुस्तोष
परीतचेतसो लोके जने ये निवसंति योगिनः सनन्दनाद्या ह्यतिनम्रकंधरा धराधरं धीरतरोद्धतेक्षणम् ३० जयेश्वराणां
परमेश केशव प्रभो गदाशंखधरासिचक्रधृक् प्रसूतिनाशस्थितिहेतुरीश्वरस्त्वमेव नान्यत्परमं च यत्पदं ३१ पादेषु वेदा
स्तव यूपदंष्ट्र दंतेषु यज्ञाश्चितयश्च वक्त्रे हुताशजिह्वोऽसि तनूरुहाणि दर्भाः प्रभो यज्ञपुमांस्त्वमेव ३२ ॥

श्चतो जगतः प्रसूत्या दीनां त्वमेव हेतुः ईश्वरश्च नियंता यच्च परमपदं तदपि त्वमेव नान्यत् त्वमेव परं ब्रह्मेत्यर्थः पादांतरे स्तुयमम ३१ परत्वेन
स्तुत्वा प्रस्तावनाय रूपयज्ञरूपकेन स्तवंति पादेष्विति त्रिभिर्यज्ञपुमांस्त्वमेवेति प्रतिज्ञा तां संपादयति पादेष्वित्यादिभिः चतुर्भिः स्वत्वाय तां गत्वा।
श्च वेदा यज्ञमयस्य तस्य पादस्थानेन रूप्यंते यूपांते यूपदंष्ट्र इत्यत्रात दंष्ट्रा यस्यैव यूपदंष्ट्र दंतेषु यज्ञाः पुरोडाशादिभक्षणार्थत्वाद्यज्ञा दंतत्वेन रूप्यंते
चितयश्चयनं चितिर्वह्न्याधानं तर्कं केचिन्न चित्वा तेत्या दिष्क्रत्य क्रान्त्याग्निस्थतानि नाश्चितयो वक्रस्थानीयाहवितिनिदेशस्यानत्वात् एवं सर्वत्र किंचि
त्साम्यमूहनीयं हुताशनोऽग्निर्जिह्वा यस्य सः दर्भास्तव तनूरुहाणि रोमाणि ३२ ॥

॥

राग्रहनीतमः प्रकाशप्रथमकेयत्नकालात्मकेतववित्रलोचने निमेषोन्मेषाभ्यां तयोरपितमः प्रकाशप्रथमकत्वात् परब्रह्मतवापितः उन्नमोगं स्तत्रानिवेम्मवादीनिसदाकलापः स्कंदकेसरसंदर्भः अरविंदभंनुरूपत्वात्सूक्ष्मोनादवीचिग्राणोद्रियं गंधवत्वसाम्यात् ३३ स्कंदेत्या दिचत्वारिसंबोधनानिस्कंधजन्नतेदेमनंवयस्वरादस्त्वाकाशत्वात्स्व वः सामस्वरपदवीरोगेभीबोनादोयस्यशार्ङ्गवशाः यद्वत्प्रणतार्थ प्रार्थवशः पदिकीर्तितइतिवचनात् शार्ङ्गवशाः कायोमध्यभागोयस्य अखिलानिसज्जानिहादशाहादीनिसंधयायस्यतेषांत्रिवृतेव दशायदहः संहतिरूपत्वात् पूर्तेस्मातोधर्मः इष्टेश्रौतोधर्मः तोस्त्रवर्णोयस्यसत्वमसि सनातनात्मन् नित्यमूर्ते ३४ तद्रूपपादयति पदक्रमेति पदक्रमेणपादविक्षेपेणाक्रान्तावाप्ताभूर्येनतथाभूतेनभवतेतविष्णुस्यादिस्थितिं चजनकेपालकं चविग्रहमन्वयः अ

विलोचनेराग्रहनीमहात्मन्सर्वासयंब्रह्मतवेदशिरस्के स्कन्धाग्रयोगीसदाकलापोघ्राणंसमस्तानिहवींषिदेव ३३
स्वःहृदसामसवरथीरनाद शार्ङ्गवशकायाखिलसत्रसंधे पूर्तेष्टधर्मश्रवणोसिदेवसनातनात्मन्भगवन्प्रसीद ३४ पद
क्रमक्रान्तभुवंभवंतमादिस्थितिंचादरविष्णुमूर्ते विष्णुस्वविष्णुःपरमेश्वरोसिप्रसीदनाथोसिचराचरस्य ३५ दंष्ट्रा
ग्रविन्यस्तमशेषमेतन्भूमंडलंनाथविभाव्यतेते विगाहतःपद्मवनंविलग्नंसरोजिनीपत्रमिवोढपंकम् ३६ द्यावापृ
थिव्योरतलप्रभाववदंतरंतन्वपुषाततैव व्याप्तंजगद्व्याप्तिसमर्थदीप्ते हितायविश्वस्यविभोभवत्वम् ३७ ॥

तः परमेश्वरोसि नाथश्चत्वमेवासि नाथ्यते प्रार्थ्यतइतिनाथः अभिप्रेतमर्थंयाचनीयस्त्वासीत्यर्थः पादक्रमाक्रान्तमनेनमादि
स्थितेत्वमेवतिपादेभोचराचरभोविष्णुमूर्तेत्वयापादक्रमेणाक्रान्तमनेनेविश्वंतस्मात्वमेवविष्णुस्यादिस्थितेकारणंपरमेश्वरश्चना
थश्चासीतिवर्यविष्णुः अतप्रसीदेत्यन्वयः ३५ किंचतेतवदंष्ट्राग्रेविन्यस्तंस्थितमेतन्नूमंडलंकुफपंकं कृतपंकंसरोजपत्रमिवविभा
व्यतेप्रतीयते कथंभूतंसरोजपत्रमिवपद्मवनंविगाहतः प्रविश्यविहरतः अर्थात्तन्नेदेसतवैवदंष्ट्राग्रेविलग्नमिवेत्यर्थः ३६ ।
किंच द्यावापृथिव्योरंतरमंतरिक्षंतत्रवैववपुषाव्याप्तं जगद्व्याप्तौसमर्थादीप्तयोयस्यसाविभातयाभूतपादोत्तरसगमम् ३७ ॥

तवैव वपुषा व्याप्तमित्युक्ते ः प्रतीत व्याप्यव्यापकवादेन परमार्थमाह ः परमार्थ इति ग्रन्थस्य ज्ञानिकयं नहि त्वया व्याप्तमित्युक्तं तत्राह ः तवैष महिमा मा
याप्रभावः कोऽसौ येन महिम्ना व्याप्तमेतच्चराचरं जगत्स यथः ३८ व्याप्तान् ज्ञानस्य स्वस्यैवेत्युक्तमेवमाह ः यदेतद्दृश्यते तव यदेतन्मूर्तं भूतात्मकं
रूपं दृश्यते एतज्ज्ञानात्मनो ज्ञानघनस्य तव ज्ञानमयमेव रूपं ज्ञानात्मकं तवेति पाठः अयोगिनस्तु भ्रान्तिज्ञानेन जगद्रूपभूतमसंपश्य
तीत्यर्थः ३९ इदं वा माहद्रूपं त्वया लीलया धृतं ज्ञानात्मकमिति किं वक्तव्यं येनाय वस्तु तत्त्वरूपाव्यतिरेका जगदपि ज्ञानमयमेवेत्याह ज्ञान।
स्वरूपमिति मोहात्मये संप्लवे संसारसागरे ४० ज्ञानात्मकमेव सर्वमित्यविहदनभवं प्रमाणयति येत्विति ज्ञायतेऽनेनेति ज्ञानं वेदा

परमार्थस्त्वमेवैको नान्योऽस्ति जगतः पते तवैष महिमा येन व्याप्तमेतच्चराचरम् ३८ यदेतद्दृश्यते मूर्तमेतज्ज्ञानात्मनस्तव
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ३९ ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ४०
ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत् ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ४१ प्रसीद सर्व सर्वात्मन् वासाय जगतामिमाम्
उद्धरोर्वीममेयात्मन् शं नो देह्यब्जलोचन ४२ सत्त्वोद्रिक्तोऽसि भगवन् गोविन्द पृथिवीमिमाम् समुद्धर भवायेश शं नो देह्य
ब्जलोचन ४३ सर्गप्रवृत्तिर्भवतो जगतामुपकारिणी भवत्वेषा नमस्तेऽस्तु शं नो देह्यब्जलोचन ४४ पराशर उवाच एवं संस्तू
यमानोऽथ परमात्मा महीधरः उज्जहार क्षितिं क्षिप्रं न्यस्तवांश्च महार्णवे ४५ तस्योपरि समुद्रस्य महती नौरिव स्थिता विततत्वा
त्तु देहस्य न मही याति संप्लवम् ४६ ॥

तपुण्यादितहिरः कृतिश्च सर्वात्वाव्वि देवब्रह्मपत्रात्मसिदं सर्वमित्यादि ४१ स
र्वसर्वात्मन् जङ्गमाजङ्गमस्वरूप भवं त्वास्मिन्निमित्ति भवो निवासस्तदर्थमुर्वीमुद्धर एव वेकृताशेमत्वेनोस्मभ्यं देहि भोऽब्जलोचन पद्मव
त्सुप्रसन्नलोचने यस्य तव ४२ सोऽपि चेतवेदमेवमुक्तमित्याह ः सत्त्वोद्रिक्तोऽसीति द्वाभ्यां भवाय उद्धर्त्वार्थं प्रसन्न वक्षौनिल
यम्भ्रंते लोचनं यस्य ४३ जगदुपकारार्थवास्त्वत्वं ते देवास्माभिः प्रार्थ्यत इति त्वमेव जानासीति पुनः संबोधयति श्रूनेदत्सएवरी
केलोचन हषिय स्माभोधदयसादिन्नित्यर्थः ४६ विततत्वात् विस्तृतत्वात् संप्लवं निमज्जनं न याति ४६ ॥

यथाविभागं यथास्थानं ४७ अमोघवाञ्छितः सत्यसंकल्पः ४८ यथातथं यथावद्भूराद्यांश्चतुरो लोकान्यथापूर्वं समकल्पयत् संकल्पेनैव सृष्ट
वान् पातालेन सह भूरादीनां चतुष्ट्वं यद्वा महर्लोकस्यापि संकर्षणाग्निज्वालाभिर्व्याप्यत्वाभावात्तेनाविनष्टत्वाच्चतुरो लोकानित्युक्तं तथा च श्रु
तिः सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं चान्तरिक्षमथो स्वः इति दिवः पृथग्ग्रहणात्स्वःशब्देन महर्लोको गृह्यते ४९
नन्वेवं भूभुवादिलोकरचनापर्यन्तं नारायणमूर्तेर्हरेर्लीलोक्ता अथैतेनैव ब्रह्मरूपेण कृतां देवादिसृष्टिमाह ब्रह्मरूपेति ५० रजसावृत
स्त्वेवकार्ये तदुक्तं तत्र रजोगुणस्य कर्मशक्तिरूपत्वादिदं तत्वाद्वयेण निरंकुशमेवं स्वितादिप्राप्तिमाशंक्याह निमित्तमात्रमिति असौ
हरिर्ब्रह्मरूपधरः अयमर्थः सृज्यानां सर्गे ब्रह्मा निमित्तमात्रं पर्जन्यवत्सन्निधिमात्रेण साधारणकारणमेव न तु प्रतिसृज्यं स्वयं व्याप्रि।

ततः क्षितिं समीकृत्य पृथिव्यां सोऽचिनोद्गिरीन् यथाविभागं भगवाननादिः परमेश्वरः ४७ प्राक्सर्गदग्धानखिलान्पर्वतान्पृथि
वीतले अमोघेन प्रभावेन ससर्जामोघवाञ्छितः ४८ भूविभागं ततः कृत्वा सप्तद्वीपं यथातथम् भूराद्यांश्चतुरो लोकान्पूर्ववत्स
मकल्पयत् ४९ ब्रह्मरूपधरो देवस्ततोऽसौ रजसावृतः चकार सृष्टिं भगवांश्चतुर्वक्त्रधरो हरिः ५० निमित्तमात्रमेवासौ
सृज्यानां सर्गकर्मणि प्रधानकारणीभूता यतो वै सृज्यशक्तयः ५१ निमित्तमात्रं मुक्त्वैकं नान्यत्किंचिदपेक्षते नीयते तपतां श्रेष्ठ
स्वशक्त्या वस्तु वस्तुताम् ५२ ॥ इति श्रीविष्णुपुराणे प्रथमेंऽशे चतुर्थोऽध्यायः ४ ॥ २२ ॥

यत एतदुक्तं यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते इत्यत्र तर्हि मुख्यं कारणं किमित्यत आह प्रधानकारणीभूता इति प्रधानं मुख्यमसा
धारणं कारणं तथाभूता यतः कारणात्सृज्यशक्तयः ५१ एतद्विवृणोति निमित्तमात्रमिति निमित्तमात्रं समवधानं सत्यकारणात्म
नाऽस्थितं सत्यं वस्तु स्वपरिणामशक्त्यैव वस्तुतां स्थूलरूपतां नीयते निमित्ताय इत्युक्तं स्थूलरूपपरिणामार्थं नापेक्षते यथा धा
न्यादिबीजेषु सत्स्वात्मना स्थितं मेघवर्षादिपर्जन्ये सति स्वपरिणामशक्त्यैव तथा परिणमते तेन
हतः अतोऽनेनोक्तदोषप्रसंगः इत्यर्थः ५२ ॥ इति विष्णुपुराणटीकायां
आत्मप्रकाशाख्यायां प्रथमेंऽशे चतुर्थोऽध्यायः ४ ॥

ब्रह्मस्वरूपधरो देवः सृष्टिं चकारेत्युक्ते तत्प्रकारं जिज्ञासुः पृच्छति यथेति द्वाभ्यां भूव्योमसलिलाम्भोकौ मिश्र्यातानेषां तान् १ यद्गु-
णाभिमानादिगुणाः समाधिः स्वभावः शांतघोरत्वादिः स्वरूपं हि पाठे तथ्यादित्या याकारः याहग्गुणा शीलाकारमित्यर्थः ३ अविद्या वि-
नास्मृष्ट्वं देहेषु जीवानां कर्तृत्वभोक्तृत्वमसंभवात्प्रथम मविद्याविर्भावमाह सृष्टिमिति अबुद्धिपूर्वकः अनवधानस्थूलः तमोम-
यः अविद्याविद्रूपः ४ तदेवाह तम इति अन्यसंज्ञितः अथतामिस्रः पंचपर्वाण्याह त्रिविशेषाः यस्याः सा तच्च तमो देहादावात्माभि-
मानः मोहस्तस्मिन्नेव पिभुत्रादिषु स्वाम्यहमस्मीत्यभिमानः महामोहः शब्दादिभोगस्पृहा तामिस्रः तस्य प्रतिघाते क्रोधः अथता-

मैत्रेय उवाच यथा ससर्ज देवोऽसौ देवर्षिपितृदानवान् मनुष्यतिर्यग्वृक्षादीन्भूव्योमसलिलौकसः १ यद्गुणं यत्स्वरूपं च य-
त्स्वभावं जगद्द्विज सर्गादौ सृष्टवान्ब्रह्मा तन्ममाचक्ष्व तत्त्वतः २ पराशर उवाच मैत्रेय कथयाम्येष शृणुष्व सुसमाहितः
यथा ससर्ज देवोऽसौ देवादीनखिलान्विभुः ३ सृष्टिं चिंतयतस्तस्य कल्पादिषु यथा पुरा अबुद्धिपूर्वकः सर्गः प्रादुर्भूतस्तमोमा-
यः ४ तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः अविद्या पंचपर्वैषा प्रादुर्भूता महात्मनः ५ पंचधावस्थितः सर्गो ध्या-
यतोऽप्रतिबोधवान् बहिरंतोऽप्रकाशश्च संवृतात्मा नगात्मकः ६ ॥

मिस्रो विनाशादिशंकया नित्यं तद्रक्षणाद्यभिनिवेशः एते पंच पंच विपर्ययाः पातंजले क्लेशशब्देनोक्ताः अविद्यास्मितारागद्वेषाभि-
निवेशाः पंच क्लेशा इति ५ तदेवमविद्याया मुक्तत्वात्तया सत्या प्रथमं ततः तमोमयं स्थावरसर्गमाह पंचधेति सार्द्धेन ततस्स
सृष्टिं ध्यायतः सतो नगात्मकः स्थावररूपः सर्गः पंचधावस्थितः वृक्षगुल्मलतावीरुत्तृणजातय इति पंचमोपाव-
द्वमाणः पंचप्रकारो जात इत्यर्थः तस्य सामान्यलक्षणं अप्रतिबोधवान् कोऽहमिति परामर्शशून्यः बहिः शब्दादिविषयेष्वंतः
सुखादौ च अप्रकाशः ज्ञानशून्यः संवृतात्मा मूढस्वभावः ६ ॥

मुख्यमिव प्रथमं ब्रह्मणः सर्गो भवतीति मुख्या नगाः स्थावराः अव्यक्तपर्वतानां स्थावरत्वेपि ब्राह्मसर्गात्प्रागेव वराहेण स्थापितत्वान्नाज्ञानवशे-
षः इति पंचवेयतृक्तं यद्वा पर्वतानां पक्षच्छेदनिमित्तमागतं कं स्थावरत्वं न स्वाभाविकमिति, तत्राज्ञानप्रवेशः मुख्यसर्गापरितोषेण सर्गां-
तरं ध्यायतः तस्मात् किं विडंतः कश्चिन्तिर्यक्सर्गो जात इत्याह तेद्दष्ट्वेति सार्द्धैस्त्रिभिः असाधकं पुरुषार्थाप्रसाधकं दृष्ट्वा मुख्यसर्गं परे सर्गमभ्यमन्यत ध्या-
तवानित्यर्थः अमन्यत परं प्रभुरिति पाठः स्पष्टः ७ तिर्यक्स्रोताः अभ्यवर्तत संपिंडार्थः यस्मात्तिर्यक् प्रवृत्तः तिर्यग्गा आहारसंचारेण प्रसृष्टं
तद्वृत्तिर्जीवनं यस्य सः ८ पश्वादय इति आदिशब्देन पक्ष्यादिः तेषां लक्षणं तमःप्रायाः तमोधिकाः अवेदिनः अनुसंधानशून्याः तथा च
श्रुतिः अथेतरेषां पशूनामशनापिपासे एवाभिज्ञानं न विज्ञातं वदंति न विज्ञातं पश्यंति न विदुः श्वस्तनं न लोकालोकाविति उत्पथग्रा-

मुख्यानगा यतः प्रोक्ता मुख्यसर्गस्ततस्त्वयम् तं दृष्ट्वासाधकं सर्गममन्यदपरं प्रभुः ७ तस्याभिध्या-
यतः सर्गस्तिर्यक्स्रोतोभ्यवर्तत यस्मात्तिर्यक्प्रवृत्तः स तिर्यक्स्रोतास्ततः स्मृतः ८ पश्वादयस्ते वि-
ख्यातास्तमःप्रायाह्यवेदिनः उत्पथग्राहिणश्चैव तेऽज्ञाने ज्ञानमानिनः ९ अहंकृता अहंमाना
अष्टाविंशद्वधात्मिकाः ॥

हिणः उन्मार्गवर्तिनः भक्ष्याभक्ष्यगम्यागम्यादिविवेकरहिता इत्यर्थः अज्ञाने विपर्ययज्ञाने सम्यक्ज्ञानाभिमानिनः ९ अहं-
कृताः साहंकारमेव कृतं कर्म येषां ते अहंमानाः साहंकार एव मानो बोधो येषां ते अष्टाविंशद्वधात्मकाः अष्टाविंशतिवधस्वभावाः श्रो-
तःसुलादोषवधप्रकाराः प्रकृतिज्ञानं येषां ते ग्राहतास्तु परस्परं अन्योन्याभिज्ञानस्वभावाद्य नभिज्ञाः अष्टाविंशतिवधाः सांख्योक्ताः
एकादशेंद्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा सप्तदशधा तु बुद्धेर्विपर्ययात्तुष्टिसिद्धीनां अध्यात्मिकाश्चतस्रः प्रकृत्युपादानकाल-
भाग्याख्याः वाह्यविषयोपरमाश्च पंच नव तुष्टयोभिहिताः ऊहः शब्दोध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः दानं च सिद्धयोष्टौ सिद्धेः पूर्वो

वि तु
पु टी
१८

ऊष्णास्त्रिविधः प्रथमस्तर्क्यः इंद्रियवधा एकादश ग्रंथवधिरत्वादिरूपाः एकस्या स्वार्थग्रहणाशक्तिरूपाः तुष्टीनां नवानां सिद्धीनां चाष्टानां वैकल्यात्सप्त
दशधा बुद्धेर्वधाः तदेवमष्टाविंशतिविधात्मकाऽशक्तयः यद्यपि मनुष्यादीनामपींद्रियाद्यशक्तयः संभवंति तथापि तिरश्चां न दार्थिका देवमनुष्य
तद्धर्मवत्तुष्टीराह आध्यात्मिकाः प्रकृत्युपादानकालभाग्याख्यास्तुष्टयः तत्राशरविधप्रकृत्यां चित्तलयान्मुक्तोऽस्मीति प्रकृत्याख्या तुष्टिः संन्यासमेव
यो यावन्मात्रेण मुक्तोऽस्मीति तुष्टिरुपादानाख्या कालेनैव सेत्स्यति किं ध्यानक्लेशेनेति तुष्टिः कालाख्या भाग्यादेव सेत्स्यतीति तुष्टिर्भाग्य
ख्या एताश्चात्मानमधिकृत्य भवंतीत्याध्यात्मिकास्तुष्टयः बाह्या नामार्जनरक्षणक्षयभोगहिंसादोषदर्शनेन शब्दादिपंचविषयोपरमात्पंचतु
ष्टयो बाह्यविषयत्वाद्बाह्याः एवं नव तुष्टयोऽभिहिताः अष्टौ सिद्धीराह ऊह इति उपदेशानपेक्षमेवार्थोच्चयनमूहः सिद्धिः शाब्दिकाशब्द
श्रवणादर्थज्ञानं शाब्दसिद्धिः गुरूपदेशादेव तत्त्वविवेकार्थज्ञानमध्ययनसिद्धिः दुःखत्रयविघातास्तिस्रः सिद्धीराह दुःखेति उपदेशत्रयः सु

श्लोकः प्रकाशास्ते सर्वेवाहृताम्परस्परम् १० ॥

ह्याप्तिर्नोऽर्थसिद्धिः विहन्नयमिमुच्छूवालभ्यार्थसिद्धिरित्यष्टौ सिद्धयः अथ वैद्रियाशक्तिर्तुष्टिसिद्धिरूपस्त्रिविधः सिद्धेरंकुशः पूर्वोऽङ्कुशः इति
वा तक इति श्लोकत्रयस्यार्थः आसां च तुष्टिसिद्धीनामभावसलिलावेत्यादिपारीभाषिकसंज्ञानं तत्र दर्शनांतरभेदश्च विस्तरभयान्न लिख्यते
एषामष्टाविंशतिर्हि यात्मकाऽशक्तिपादः तदा तु भागवतोक्तानवद्विशफाः षडेकशफाः त्रयोदशपंचनखाः इत्यष्टाविंशतिर्भेदा याताः तदुक्तं गौरजो
महिषः कृष्णः सूकरो गवयो रुरुः द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा एते चैकशफाः स्वनः पृ
ष्ठपंचनखाः पशुः श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ सिंहः कपिर्गजः कूर्मो गोधा च मकरादय इति १० ॥

वाधिर्यंकुष्ठतान्धत्वं जडतावाग्निजिघ्रता तथा मूकता कौण्यपंगुत्वं क्लैब्योदावर्तमत्तता यथासंख्यं श्रोत्रादीनामिंद्रियाणां वधाः ॥ १४

तिर्यक्सर्गापरितोषेण पुनर्ध्यायतो देवसर्गोऽभूदित्याह तमपीति त्रिभिः ऊर्ध्वं उपरि देहाद्बहिश्च वेश्मन्याहारस्य प्रवर्तनं यस्य सः अनन्तरं पीनादे वत्पुत्रः तथा वक्ष्यति । अहर्दैवे देवाः सृष्टा इति तस्य पूर्वं तेन देवाः सृष्टा इति श्रुतिः सात्त्विकोर्ध्वं सात्त्विकं सत्त्वप्रकाशादिकमूर्ध्वं मध्यके यथा । भवत्येवमवर्तत ११ ते देवा हृतत्ता इति सर्वविषयेन्द्रिययोगजं प्रीतिस्तत्तन्निमित्ता हर्षः सत्त्वाद्रिक्तत्वात् सुखप्रीती बहुले येषां ते तथा १२ सत्याभिध्यायिनः सत्यसंकल्पस्य भगवद्ध्यानशीलस्येति वा अव्यक्तादिति मुख्यादिसर्गेष्वपि समानं तथापि कारणान्तरस्यानुक्तत्वात्तथाचावाप्तुः अव्यक्ताज्जायते वा स्वमनसा यद्यदिच्छति वशीकृत्य त्रैगुण्यात्मोपलक्षत्वात्स्वभावत इति १५ यस्मादर्वागधः प्रविशेनाहारेण प्रवर्तन्ते तमोद्रेकात् दुःखबहुलाः रजोऽधिकत्वाद्भूयो भूयः कर्मशीलाः प्रकाशबहुलत्वाद्बहिरन्तश्च प्रकाशाः प्रकृष्टज्ञानाः साधकाः कर्मत्वाद्यपि

२९

पुनरसाधकमत्वं

तमप्यसाधकं मत्वा ध्यायतोऽन्यस्ततोऽभवत् ऊर्ध्वस्रोतस्तृतीयस्तु सात्त्विकोर्ध्वमवर्तत ११ ते सुखप्रीतिबहुला बहिरन्तश्च नावृताः प्रकाशा बहिरन्तश्च ऊर्ध्वस्रोतोभवाः स्मृताः १२ तुष्टात्मनस्तृतीयस्तु देवसर्गस्तु स स्मृतः तस्मिन्सर्गेऽभवत्प्रीतिर्निष्पन्ने ब्रह्मणस्तदा १३ ततोऽन्यं स तदा दध्यौ साधकं सर्गमुत्तमं असाधकांस्तु तान्ज्ञात्वा मुख्यसर्गादिसंभवान् १४ तथाभिध्यायतस्तस्य सत्याभिध्यायिनस्ततः प्रादुर्बभूव चाव्यक्तादर्वाक्स्रोतस्तु साधकः १५ यस्मादर्वाक्प्रवर्तन्ते ततोऽर्वाक्स्रोतसस्तु ते ते च प्रकाशबहुलास्तमोद्रिक्ता रजोऽधिकाः १६ तस्मात्ते दुःखबहुला भूयो भूयश्च कारिणः प्रकाशा बहिरन्तश्च मनुष्याः साधकास्तु ते १७ इत्येते कथिताः सर्गाः षडत्र मुनिसत्तम प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः १८ ॥

कारित्वात् १७ षडेवेति द्वितीयाध्यायोक्ताः सह षडेते सर्गाः तथाहि इन्द्रियदेवतासर्गस्य वायुदेवतासर्गस्य च देवतासर्गस्य च देवतासर्गे ऽन्तर्भावेन्द्रियसर्गेण सहाभेदस्य वक्ष्यते वैकारिकविद्यासर्गयोश्च बुद्धिभेदत्वात् बुद्ध्यात्मकमहत्तत्त्वान्तर्भावः भौतिकत्वभ्रांत्या सर्गस्य भूतसर्गे ऽन्तर्भावः एवं च सति महत्तत्त्वभूतेन्द्रियसर्गास्त्रयः मुख्यतिर्यगूर्ध्वमनुष्यसर्गाश्चत्वार इत्येवं षडेते सर्गाः कथिता इत्यर्थः नानवकिंचिद त्ताद्भेदविवक्षया नववधा विद्धान्न तु महत् प्रथमो महतस्तत्त्वादितो विराट्समस्तशरीराभिमानिनो ब्रह्मणो महत्तत्त्वं लिंगशरीरं अतो सौ ब्रह्मणः सर्गो विज्ञेय इत्यर्थः यद्वा ब्रह्म परमात्मा तत्कर्तृकः सर्गो विज्ञेय इत्यर्थः १८ ॥

देवतासर्गो भेदविवक्षयैन्द्रियसर्ग एव वैकारिक इत्युच्यते १९ इत्येष प्राकृतः प्रकृतौ नो ब्रह्मणोऽकामतो सर्ग इत्यर्थः अबुद्धिर्विद्या अप्रकृतिः तत्र
पूर्वकः संभूतो यद्यपि बुद्धिमहदादिसर्गस्तथापि बुद्धिपूर्वकत्वं नास्तीत्यर्थः २० तिर्यग्योनयो तिर्यक्स्रोतसः तिर्यग्योनिः स एव तैर्यग्योन्यः स्वार्थे ष्यञ् तस्य च सम
र्ग उच्यते इत्यर्थः २१ तत्र सात्त्विको देवसर्गः पूर्वमुक्तः इदानीं सात्त्विकतामसोभयस्वभावमपरं देवसर्गमाह अष्टम इति स च वायुप्रो
क्तो विवृतः अष्टमोऽनुग्रहसर्गः स च चतुर्धा व्यवस्थितः विपर्ययेण वा शक्त्या सिद्ध्या तुष्ट्या तथैव च स्थावरेषु विपर्यासात् तिर्यग्योनिषु शक्तितः सि
द्ध्यात्मना मनुष्येषु तुष्ट्या देवेषु कृत्स्नशः इति विपर्ययस्तामसः एव तमो मोह इत्यादयः अशक्तिरेकादशेन्द्रियवैकल्यलक्षणा सिद्धिरष्ट
विधा तुष्टिश्च नवविधा प्रायो वक्ष्यति नास्या वक्तव्यं विपर्ययादिस्वभावेषु तत्तत्स्वभावानुग्राहको देवसर्गादि अनुग्रह इत्युच्यते

तस्माच्चार्वाग्द्वितीयस्तु भूतसर्गस्तु स स्मृतः वैकारिकस्तृतीयस्तु सर्ग ऐन्द्रियकः स्मृतः १९ इत्येष प्राकृतः सर्गः संभूतो बुद्धि
पूर्वकः मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः २० तिर्यक्स्रोतास्तु यः प्रोक्तस्तैर्यग्योन्यः स उच्यते तदूर्ध्वस्रोतसां
षष्ठो देवसर्गस्तु स स्मृतः २१ ततोऽर्वाक्स्रोतसां सर्गः सप्तमः स तु मानुषः अष्टमोऽनुग्रहः सर्गः सात्त्विकस्तामसश्च सः २२
पंचैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः प्राकृतो वैकृतश्चैव कौमारो नवमः स्मृतः २३ इत्येते वै समाख्याता नव सर्गाः
प्रजापते प्राकृता वैकृताश्चैव जगतो मूलहेतवः २४ सृजतो जगदीशस्य किमन्यच्छ्रोतुमिच्छसि मैत्रेय उवाच संक्षेपा
त्कथितः सर्गो देवादीनां मुने त्वया विस्तराच्छ्रोतुमिच्छामि त्वत्तो मुनिवरोत्तम २५ ॥

सवस्थावरेषु तिर्यक्षु च तमसः पोषकत्वात्तामसः मनुष्येषु देवेषु च सिद्धितुष्टिरूपसत्त्वोपबृंहकत्वात्सात्त्विक इत्यर्थः २२ पंचैते
ऽऽद्यसर्गा ह्येते वैकृता विकृतीनां सर्गा महदादयः प्राकृता देवतासर्गास्त्रय इत्याह प्राकृता इति कौमारः नीललोहितरुद्रः सनत्कुमारादीनां
सर्गः तत्र सनत्कुमारादिसर्गो वैकृतविकृतभूतेन ब्रह्मणा कृतत्वात् रुद्रसर्गस्तु प्राकृतः प्रकृतितः स्वयमेवोद्भूतत्वादिति केचित्
तथा च वक्ष्यति अङ्कगतोऽसौ त्वभो रोदके कुमारो नीललोहित इति अन्ये त्वाहुः रुद्रसर्गो विकृत्यनुत्पन्नकत्वात्प्राकृतः सनत्कुमारादीनां तैः
कानां सर्गो विकृत्यन्तः समन्वयात् कन्याहेतुतयैवेति २३ जगत्सृजतः ईश्वरस्य जगतो मूलहेतव एते नव सर्गाः समाख्याता इत्यर्थः २५ ॥

ब्रह्मणः शरीरादिस्तावेण सृष्टिं वक्तुं कर्माराद्यैस्तानत्यनिमित्तं मानसीं सर्वादिसृष्टिं पूर्वोक्तामनुवदति कर्मभिरिति द्वाभ्यां पूर्वैः कर्मभिर्भाविता
श्च वासिताः अत एवाः प्रजाः संहारे उपसंहृता अपि तया ख्यात्या तत्कर्मवासनारूपया बुद्ध्या अनिर्मुक्ताः न तिरस्कृताः विमुक्ता संस्काररूपेण स्थितास्तैव जाति
देहतेनेत्यन्वयः २९ स्थावरान्ताः स्थावरपर्यन्ताः चतुर्विधाः २० इदानीं शरीरसृष्टिमाह तत इत्यादिना यावदध्यायसमाप्ति देवादीन् चतुष्ट
यं च सिसृक्षुः तान् अम्भांसि अम्भःसंज्ञानि सत्वादीनि स्वमात्मानं मनो अयूयुजत् समाधये इत्यन्वयः तानि वा एतानि चत्वारि अम्भांसि देवा मनुष्याः पितरोऽसु
रा इति श्रुतेर्देवादीनामम्भः २८ तमस्तमोमात्रा लेशः स्वस्वरूपवशादुद्रिक्ताभूत् २९ तमोमात्रात्मिकां तनुमिति विशेषणान्तमासये

पराशर उवाच कर्मभिर्भाविताः पूर्वैः कुशलाकुशलैस्तु ताः । ख्यात्या तया ह्यनिर्मुक्ताः संहारे ह्युपसंहृताः २९ स्थावरान्ताः
सुराद्यास्तु प्रजा ब्रह्मंश्चतुर्विधाः । ब्रह्मणः कुर्वतः सृष्टिं जज्ञिरे मानसास्तु ताः २७ ततो देवासुरपितॄन्मनुष्यांश्च चतुष्टयं
सिसृक्षुरम्भांस्येतानि स्वमात्मानमयूयुजत् २८ युक्तात्मनस्तमोमात्रा उद्रिक्ताभूत्प्रजापतेः सिसृक्षोर्जघनात्पूर्वमसुरा
जज्ञिरे ततः २९ उत्ससर्ज ततस्तां तु तमोमात्रात्मिकां तनुं सा तु त्यक्ता तनुस्तेन मैत्रेयाभूद्विभावरी ३० सिसृक्षुरन्यदेहस्थः प्रीतिमा
प ततः सुराः सत्त्वोद्रिक्ताः समुद्भूता मुखतो ब्रह्मणो द्विज ३१ त्यक्ता सापि तनुस्तेन सत्त्वप्रायमभूद्दिनं ततो हि बलिनो रात्रावसु
रा देवता दिवा ३२ सत्त्वमात्रात्मिकामेव ततोऽन्यां जगृहे तनुं पितृवन्मन्यमानस्य पितरस्तस्य जज्ञिरे ३३ उत्ससर्ज पितॄन्सृष्ट्वा
ततस्तामपि स प्रभुः सा चोत्सृष्टाभवत्सन्ध्या दिननक्तान्तरस्थितिः ३४ रजोमात्रात्मिकामन्यां जगृहे स तनुं ततः रजोमात्रोत्क
टा जाता मनुष्या द्विजसत्तम ३५॥

भावमुत्ससर्जेत्यर्थः एवमन्यत्रापि सा विभावरी रात्रिः कृतिस्वभावमित्रा भवदिति ३० अन्यदेहस्थः सात्त्विकभावे स्थितः सन् सिसृक्षुः प्रीति
सन्तोषं वा पर्यवतः समुखाद्देवानस्तेनेति श्रुतेः ३१ सत्त्वप्रायं प्रकाशात्मकमहरभूदित्यादिकथने सोपपत्तिमाह ततो हीति
यतस्तमोमयी रात्रिभूता या स्तेनोतिर्गताः ततो … रात्रौ कार्यं तत्वं … एवं देवा दिवा … ३२ सत्त्वमात्र … गृहीत्वा वा
त्मानं जरासि … पितरो जाता यथाह वायुः पितृवन्मन्यमानस्य … प्रभुः स पितॄन् …

मधुरमनेनतत्र डुहिमंतवेण स्वतन्तुयामीना सीतिर्दर्शितं ज्योत्स्नाप्रभावे ३८ संध्यासमयेसंध्योपलक्षितेअपरान्हइत्यर्थः अपरा
ह्नः पितृणामिति श्रुतेः ३० तस्माज्ज्योत्स्नाराज्यहःसंध्यासमयाब्रह्मणस्तु शरीराणीतुप्रासनार्थमुक्तं ३८ तयाह्यन्यया ३९ ततो
ध्यानः सन्तैष कारोप्यस्यतास्तृजत्स्वमभ्यथावतभक्षयितमितिपाठः ४० तेषामेवमध्येयेन्नेवादाममायसुमक्षन्नहुः तेयक्षाणांतुभ
क्षयानः सत्त्वाः ४१ यतोतद्प्रियाइववहितिवाइतिश्रुतेः ४२ पीर्ये
क्षणायवसायायस्त्वा जक्षाभक्षसमनयोः जक्षइतिवक्षत्व्यककारः परोक्षनार्थः

तामप्यस्मत्स्वाजननंभय प्रजापतिः ज्योत्स्नासमभवत्साऽपि प्राकंसंध्यायामिधीयते ३९ ज्योत्स्नाह्नमेतबलिनामनष्या
पितरस्तथा मैत्रेयसंध्यासमयेतस्मादेतेभवंतिवै ३० ज्योत्स्नारात्र्यहनीसंध्याचत्वार्येतानिवैप्रभोः ब्रह्मणस्तुशरीर
णि त्रिगुणापाश्रयाणितु ३८ रजोमात्रात्मिकामेवततोन्योजगृहेतनुं ततः क्षुद्ब्रह्मणोजाताजज्ञेकोपस्तयाततः ३९
क्षुत्क्षामानंधकारेथसोसृजद्भगवांस्ततः विरूपाःश्मश्रुलाजातास्तेभ्यधावंस्ततःप्रभुम् ४० मैवंभोरक्ष्यतामेष येरुक्तंरा
क्षसास्तुते ऊचुःखादामइत्यन्येयेतेयक्षास्तुभक्षणात् ४१ अप्रियानथतान्दृष्ट्वाकेशाःशीर्यंतवेधसः हीनाश्चशिरसो
भूयःसमारोहंततच्छिरः ४२ सर्पणात्तेभवन्सर्पाहीनत्वादहयःस्मृताः ततःक्रुद्धोजगत्स्रष्टाक्रोधात्मनोविनिर्ममे ४३
वर्णेनकपिशेनोग्राभूतास्तेपिशिताशनाः ध्यायतोगांततस्तस्यगंधर्वाजज्ञिरेसुतात् पिबंतोजज्ञिरेवाचंगंध
र्वास्तेनतेद्विज ४४ पिबंतोजज्ञिरेवाचंगंधर्वास्तेनतेद्विज एतानिसृष्ट्वाभगवान्ब्रह्मातच्छक्तिनोदितः ४५ ततःस्वच्छंदतोन्यानिवयांसिवयसोसृजत् अवयोवक्ष
सश्चक्रेमुखतोजाःससृष्टवान् सृष्टवानुदराद्गाश्चपार्श्वाभ्यांचप्रजापतिः

तेअपीर्येतअहीयंतेत्यर्थः शिरोहीनाःसंतःपुनस्तच्छिरःसमा
रुह्याः ४२ सर्पणाच्छिरसमारोहणात्क्रोधात्मनः क्रोधात्मकान् ४३ गांवर्वचंध्यायंतेपिबंतेगायतइत्यर्थः ४४ गांपिबंतोगायंतो
जज्ञिरे ते नेतगंधर्वाः तच्छक्तिनोदितः तेषांसृष्टानांशक्तिभिप्राक्कर्मसंस्कारैःप्रेरितःसन् ४५ तन्नहुडिहजिभिरेतानिस्व
च्छास्वच्छंदतः तत्तत्कर्मवशाद्देवोत्पन्नयास्वेच्छयावयसः देहावस्थाविशेषात वयांसिपक्षिणः अवयोमेषाः ४७ ॥

[illegible]

श्वसुतरानश्व समातङ्गान् गवयान् कसमासादि वन्मृगविशेषान् न्यङ्कूनन्याश्च जातयः तिर्यग्जातीः ४८ त्रेतायां कल्पस्यादावेव पशूनोषधीश्च सृष्ट्वा ते तां
त्रेतायुगमुखे ब्रह्मा प्रसक्ति ग्राम्यारण्यव्यवस्थया यानदाध्वरे सोमयनतयायुयोज कृतयुगे यज्ञानामप्रवृत्तेः ४९ ग्राम्यारण्यभेदमेवाह गौरिति हिंस्राभ्यं
श्वापदं व्याघ्रादि द्विखुरो गवयादिस्त्रौदकाः कूर्मादयः सरीसृपाः सर्पगोधादयः ५१ पूर्वादिमुखेभ्यः सृष्टिमाह चतुर्भिः गायत्रं छन्दः ऋ
ग्वेदं त्रिवृत्स्तोमं स्तोत्रसाधनभूतानामृचां समुदायं रथन्तरं साम यज्ञानां मध्येऽग्निष्टोमं सोमयागसंस्थाविशेषं ५२ यजूंषि यजुर्वेदं उ

उष्ट्रानश्वतरांश्चैव न्यङ्कूनन्याश्च जातयः ओषध्यः फलमूलिन्यो रोमभ्यस्तस्य जज्ञिरे ४८ त्रेतायुगमुखे ब्रह्मा कल्पस्यादौ द्वि
जोत्तम सृष्ट्वा पश्वोषधीः सम्यग्युयोज स तदाध्वरे ४९ गौरजः पुरुषो मेषाश्चाश्वाश्वतरगर्दभाः एतान्ग्राम्यानमूनाहुरारण्यांश्च
निबोध मे ५० श्वापदं द्विखुरं हस्ती वानराः पक्षिपञ्चमाः औदकाः पशवः षष्ठाः सप्तमास्तु सरीसृपाः ५१ गायत्रं च ऋचश्चैव त्रि
वृत्स्तोमं रथन्तरं अग्निष्टोमं च यज्ञानां निर्ममे प्रथमान्मुखात् ५२ यजूंषि त्रैष्टुभं छन्दः स्तोमं पञ्चदशं तथा बृहत्साम तथोक्थं च
दक्षिणादसृजन्मुखात् ५३ सामानि जगतीछन्दः स्तोमं सप्तदशं तथा वैरूपमतिरात्रं च पश्चिमादसृजन्मुखात् ५४ एकविंश
मथर्वाणमप्तोर्यामाणमेव च अनुष्टुभं सवैराजमुत्तरादसृजन्मुखात् ५५ उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे दे
वासुरपितॄन्सृष्ट्वा मनुष्यांश्च प्रजापतिः ५६ ततः पुनः ससर्जादौ संकल्पस्य पितामहः यक्षान्पिशाचान्गन्धर्वांस्तथैवा
प्सरसां गणान् ५७ ॥

क्थं सोमसंस्थां ५३ सामानि सामवेदं वैरूपं साम अतिरात्रं सोमसंस्थां ५४ एकविंशं स्तोमं अथर्वाणमप्तो
र्यामाणं सोमसंस्थां अनुष्टुभं छन्दः वैराजं साम ५५ सृष्टानां सर्वेषां भूतानां कर्मस्वभावादि वक्तुं पूर्वोक्तमेव सृष्टिप्रपञ्चमनु
वदति उच्चावचानीति सार्द्धैस्त्रिभिः उच्चावचानि उत्कृष्टनिकृष्टानि देवासुरादीनि ५७ ॥

नरकिन्नरभेदस्य नेराश्वजचनोपिस्याति त्रं सवनुलोवनरइसभिधानोक्तेः अव्ययं चिरकालावस्थायिप्रवाहनित्यं वाव्ययं तद्विपरीतं ५८ ।
एवं स्रष्टानां तेषां भूतानां मध्ये नोन्येव कर्माण्याह हिंस्रं मारकं अहिंस्रं तद्विपरीतं एवा वीरं कर्मन्मृदु सदयं क्रूरं तद्विपरीतं मानसंकर्मस
न्तेवान्तं तद्वाचिकं किं विद्धि स्वमायं पमयवयथाग्नीषोमीयादिपशुालंभनं अहिंस्रमपि परस्त्रीगमनादिकमधर्मः मृदुकर्मादि कि
विदधर्मः यथा वानां चैवादिरव्हणे क्रूरमपि किंचिद्धर्मः यथा राजोद्दण्डनं सत्यमपि किंचिदधर्मः यथा ब्राह्मणादेर्वधप्रसङ्गे
तदनृतं अनृतमपि ब्राह्मणादिरक्षणे धर्म एव वचनोपमाय माविनितत्वेयाः पृथक्प्रहणं ज्ञाविना तेर्हिंस्रादिकर्माभिवासिताः
तस्माद्यापि यायद्वासना वासिताः तस्मै तदेव रोचते ६० एवं वस्तुनाना सनावासारेणेवइन्द्रियार्थेषु नानात्वं अन्यतमत्र फलं तरणमित्या।

नरकिन्नररक्षांसि वयःपशुमृगोरगान् अव्ययं च व्ययं चैव यदिदं स्थाणुजंगमम् ५८ तत्सर्जनं तदा ब्रह्मा भगवानादिकृद्वि
भुः तेषां ये यानि कर्माणि प्राक्सृष्ट्यां प्रतिपेदिरे ५९ तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः हिंस्राहिंस्रे मृदुक्रूरे धर्मा
धर्मावृतानृते ६० तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते इन्द्रियार्थेषु भूतेषु शरीरेषु च स प्रभुः ६१ नानात्वं विनियो
गं च धातैव व्यसृजत्स्वयं नामरूपं च भूतानां कृत्यानां च प्रपंचनं ६२ वेदशब्देभ्य एवादौ देवादीनां चकार सः ऋषीणां ना
मधेयानि यथा वेदश्रुतानि वै यथानियोगयोग्यानि सर्वेषामपि सोऽकरोत् ६३ यथर्तुष्वृतुलिंगानि नानारूपाणि पर्यये
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ६४

दिभोग्यविषयविभागो भूतेषु नानात्वं जलस्थलचरादिविभागं शरीरेषु
नानात्वं द्विपाच्चतुष्पदादिविभागं विनियोगं च भूतेन जीवेनेदं कार्यमित्यादि तत्तत्कर्मानुसारेण स्वयमेवासृजत् ६१ नाम इन्द्राग्नि
यम इत्यादि रूपं च वज्रहस्तत्वादि कृत्यानां च वर्षण दहन संयमनादीनां प्रपंचनं ततश्चान्तरभेदः ६२ किं च ऋषीणां वसिष्ठादी
नां नामानि तस्माहसिष्ठो ब्रह्मा कार्य इत्यादि नियोगयोग्यानि तत्तत्कर्मचाप्तिदर्शनयोग्यानि च वेदे यथा श्रुतानि तथैव सृष्टवान्
६३ ननु देवादीनामपि नित्यानां कथं तन्नित्यत्वं देनाभिधानमित्याशंक्य प्रवाहनित्यत्वं दृष्टान्तेन दर्शयति यथेति यस्मिन्यस्मि
न्नृतावृतौ यानि ऋतुलिंगानि पुष्पफलादीनि पर्यये तस्यावृत्तौ पुनस्तानि तान्येव दृश्यन्ते तथैव युगसन्धानरके स्यादिषु

उपसंहरति करोतीति सिसृक्षाशक्तिः सर्गेच्छया तया युक्तः ६५ इति विष्णु॰ स्वप्रकाशाख्यायां प्रथमांशे पंचमोध्यायः ५ विस्तरतो ब्रूही
ति यदुक्तं तदेव विवृणोति यथा चेति २ तामेव प्रक्रियामाह सत्याभिध्यायिन इत्यादिभिः स्पष्टार्थाः जाड्ये पंचमे चातुर्वर्ण्यं चत्वारो वर्णाः ५ एतदेव विभागेन स्पष्टयति ब्रा
ह्मणा इति पादोरुवक्षःस्थलतो मुखतश्च समुद्गता इति यथासंख्येन संबंधः ६ तत्सृष्टेः प्रयोजनमाह यज्ञनिष्पत्तये सर्वमिति यज्ञसाधन
भूतमुत्तममेव चातुर्वर्ण्यं चकारेत्यन्वयः यद्यप्यध्ययनाद्यभावान्न कर्माणि स्यादिति स्त्रचाज्ञेमतिः शूद्रस्याप्यध्ययनाद्यभावेऽपि तत्कारेण मन्त्र

करोत्येवंविधां सृष्टिं कल्पादौ स पुनः पुनः सिसृक्षाशक्तियुक्तोसौ सृज्यशक्तिप्रचोदितः ६५ इति श्रीविष्णु॰ प्रथ॰ पंचमोध्या
यः ५ मैत्रेय उवाच अर्वाक्स्रोतास्तु कथितो भवता यस्तु मानुषः ब्रह्मन्विस्तरतो ब्रूहि ब्रह्मा तमसृजद्यथा १ यथा च वर्णा
नसृजद्यद्गुणांश्च महामुने यच्च तेषां स्मृतं कर्म विप्रादीनां तदुच्यतां २ पराशर उवाच सत्याभिध्यायिनः पूर्वं सिसृक्षोर्ब्रह्म
णो जगत् अजायन्त द्विजश्रेष्ठ सत्त्वोद्रिक्ता मुखात्प्रजाः ३ वक्षसो रजसोद्रिक्तास्तथा वै ब्रह्मणोऽभवन् रजसा तमसा चैव सम
द्रिक्तास्तथोरुजाः ४ पद्भ्यामन्याः प्रजा ब्रह्मा ससर्ज द्विजसत्तम तमःप्रधानास्ताः सर्वाश्चातुर्वर्ण्यमिदं ततः ५ ब्राह्मणाः क्ष
त्रिया वैश्याः शूद्राश्च द्विजसत्तम पादोरुवक्षःस्थलतो मुखतश्च समुद्गताः ६ यज्ञनिष्पत्तये सर्वमेतद्ब्रह्मा चकार वै चातुर्वर्ण्यं
महाभाग यज्ञसाधनमुत्तमं ७ यज्ञैराप्यायिता देवा वृष्ट्युत्सर्गेण वै प्रजाः आप्याययन्ते धर्मज्ञ यज्ञाः कल्याणहेतवः ८ ॥

ते तथापि द्विजशुश्रूषाद्वारेण तत्साधनत्वान्नमस्कारेण पंचयज्ञान्हापयेदित्यादिस्मृतेः पाकयज्ञादिषु साक्षादपि कारान्न विरोधः ७
यज्ञनिष्पादनस्योपयोगमाह यज्ञैरिति आप्यायितास्तर्पिता देवा वृष्ट्युत्सर्गेण ताः यज्ञकर्त्रीः प्रजास्तर्पयन्ति अग्नौ प्रास्ताहुतिः स
म्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मृतेः अतो यज्ञाः कल्याणहेतवः ८ ॥

वि॰ पु॰
प्र॰ टी॰
१८

तेषु श्रेष्ठानधिकारिणो दर्शयति निष्पाद्येतदिति स्वधर्मेषु श्रौतेष्वभिवर्त्तते : विशुद्धाचरणं स्नानादिविहितं तद्युपेतैः पापोज्झितैर्विरुद्धाचरणाद्व्यपेतैर्निवृत्तैः सद्भिर्विद्वद्भिः सन्मार्गगामिभिः मन्वादिसमानाचारानुवर्त्तिभिः ९ एतावता धर्माधिकारित्वान्मानुषं स्तौति स्वर्गापवर्गाविति यथाभिरुचितं स्थानं सप्तलोकादि १० तदेवं चातुर्वर्ण्यव्यवस्थितये ताः प्रजाः सृष्टाः सम्यक् श्रद्धया यः समाचारस्तस्मिन् प्रवणाः ११ चातुर्वर्ण्यव्यवस्थाफलमाह यथेच्छेति द्वाभ्यां यथेच्छया आवासः गिरिकन्दरादिस्थाने तस्मिन्निरताः यतः सर्वबाधाभिः शीतोष्णादिपीडाभिर्विवर्जिताः शुद्धाः सत्कुलीनाः १२ तासां शुद्धे ज्ञाने भवति येन ज्ञानेन तत्पदं प्रपश्यन्ति १३ तदेवं धर्मान्

निष्पाद्यैतेन वै तेन स्वकर्माभिरतैस्तथा विशुद्धाचरणोपेतैः सद्भिः सन्मार्गगामिभिः ९ स्वर्गापवर्गौ मानुष्यात्प्राप्नुवन्ति नरा मुने यथाभिरुचितं स्थानं तद्यान्ति मनुजा द्विज १० प्रजास्ता ब्रह्मणा सृष्टाश्चातुर्वर्ण्यव्यवस्थितौ सम्यक्श्रद्धासमाचारप्रवणा मुनिसत्तम ११ यथेच्छावासनिरताः सर्वबाधाविवर्जिताः शुद्धान्तःकरणाः शुद्धाः सर्वानुष्ठाननिर्मलाः १२ शुद्धे च तासां मनसि शुद्धेऽन्तःसंस्थिते हरौ शुद्धज्ञानं प्रपश्यन्ति विष्ण्वाख्यं येन तत्पदम् १३ ततः कालात्मको योऽसौ स चांशः कथितो हरेः स पातयत्यघं घोरमल्पमल्पाल्पसारवत् १४ अधर्मबीजसम्भूतं तमोलोभसमुद्भवं प्रजासु तासु मैत्रेय रागादिकमसाधकम् १५ ॥

ष्ठानफलमुक्तं इदानीं कालवशेन तद्धेतुकल्याणानामनिष्टप्राप्तिमाह तत इत्यादिना ततः त्रेतायुगे किंचिदिति क्रोधेन तिर
सिद्धः कालात्मको योऽसौ हरेरंशः कथितः स चांशः पापं रागादिविषयाभिलाषं देहे ममात्मीयादिकमसाधकं पुरुषार्थप्रतिबन्ध
कं तासु प्रजासु पातयति क्षिपतीति द्वयोरन्वयः कथंभूतं घोरं बहुदुःखप्रदं अल्पाल्पसारवत् अत्यल्पसारवत् इयता अत्यल्प
बलेऽत्यन्तिसमयस्य वृद्धिमनायेत्याह निर्ज्ञेन तेषामेव १४ अधर्मबीजं तत्र धर्मस्य बीजं भूतं तत्र हेतुः तमोऽभिनिवेशः लोभस्तस्मात्

ततः किमित्यत आह तत इति सहजा स्वाभाविकी सा सिद्धिः सर्वबाधाविवर्जिता इत्युक्तात्वृत्तिं यास्यादिहं ठजपलक्षणानातीव
वृज्ञायते रसोल्लासादयः सिद्धयः कृतादिशोक्ताः रसस्य स्वत एवा सोत्पलामः स्यात्कृते युगे रसोल्लासाख्या सा सिद्धिस्तया हेतिव
यतवः स्त्रियादिनिरपेक्षेण सदा तृप्ताः प्रजास्तदा द्वितीया सिद्धिरुद्दिष्टा सा तृप्तिर्मुनिसत्तमे ः प्रथमो धर्मतत्त्वेनास्य स्यास्तातृती
याभिधीयते वर्तथीं तुल्यता तासां मानुषः स्वल्वनुरूपयोः एकांतावलवाद्ब्रुल्यं विपाकानामपंचमी परमात्मापरत्वेन तत्पाध्याना
दिनिष्ठिता षष्ठी निकामचारित्वं सप्तमे मसिद्धिरुच्यते अष्टमी च तथा प्रोक्ता यत्र कंचनशायितेति १६ शीतोष्णादिहैठैरभिभवाद् ः
खिवातोः पीडिताः १७ ततस्ताराद्रिभयपरिहारार्थे डर्गाणि पीतादिपनीकाशार्थे च गृहाणि जीविकायर्थे च कृषिवाणिज्यादीनि च क्र
तित्याह ततोडर्गाणि त्यादिना कृत्रिमपरिखाद्यौवृते शाकारादि प्रराद्दीनां लक्षणभगता कृत्नपावासः ग्रीष्मक्राविवाधुरमपोघ्नते

ततः सा सहजा सिद्धिस्तेषां नातीव ज्ञायते रसोल्लासादयश्चान्याः सिद्धयोष्टौ भवन्ति याः १८ तासु क्षीणास्वशेषासु वर्द्धमाने
वयातके द्वंद्वाभिभवदुःखोत्तीव्रात्रभवंति ततः प्रजाः १७ ततोडर्गाणि ताश्चक्रुर्वार्क्षं पार्वतमौदकं कृत्रिमं च तथाडर्गं ओस्वा
वैदकादिकं १८ गृहाणि च यथान्यायं तेषु चक्रुः ओरादिषु शीतातपादिबाधानां प्रशमाय महामते १९ प्रतीकारमिदं कृत्वा
पीता द्वंद्वाः प्रजाउनः वार्तापायं ततश्चक्रुर्हस्तसिद्धिं च कर्मजां २० ब्रीहयश्च यवाश्चैव गोधूमाश्चणवस्तिलाः प्रि.

एकतोयवरनुग्रामो नगरं चैकतः स्थितं मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयं विशाश्चविभृत्याश्रयवेवैवसंतित सतुग्राम इति प्रोक्तः शूद्राणां वासयववपाप
क्रियादिनिपुणैः स्थानवर्णपजनैर्युतं अनेकजातिसंबद्धं नैकशिल्पिसमाकुलं सर्वदैवतसंबद्धं नगरं त्वभिधीयत इति १८ गृहाणि च विस्पष्टकर्मोक्तानि भु
वं यथान्यं जंघकातं विपुलं विजयं तथा सुपक्षं सुमुखं नन्दं निधनं च मनोरमं इत्यादीनि यथान्यायं यथानिमित्तादिप्रक्रसोरणयथावस्तुशास्त्रं १९ वार्ता
पायं जीविकासाधनं कृष्यादि हस्तसिद्धिं हस्ताभ्यां साध्यां सिद्धिं भृतिं तामेवाह कर्मजां तत्कर्मनिर्मितां २० तत्र कृषिफलं प्रपंचयति ब्रीहयश्चेति
साईवाश्चेव श्यणवः खद्दशालायः प्रियंगुसहर्षान्हणधान्यपि पंगवः केंगवः उदाराः दीर्घनालाः कोरदूषाः कोद्रवाः चीनकाः श्यामकाः २१॥

वि॰ पु॰
अ॰ टी॰
१९

निष्पावाबल्लाः आढक्यस्तुवरः चणाः शणः गुल्यपदानवव ः इत्येता ग्राम्याः साकविसाध्यानां जातय ः सप्तदश २२ ताः सर्वौषधयः श्यामाकांत्य कोनदूश यत्तियाः यज्ञसाधनभूताः आरण्यानीवारा याश्चैव यज्ञसाधनभूताः अयवाश्यामाकाश्च ग्राम्याः रण्या एव तृणधान्यत्वेऽपि तासां नीवारा आरण्य व्रीहयः जर्तिला ः आरण्यास्तिलाः गवेधुकाः कुसुंभसदृशवीजाः वेणुयवा वेणुवीजानि मर्कटकाः आरण्याः प्रियंगव ः एता श्चतुर्दश यज्ञनिष्पत्तयेस्मृतादृत्य त्वयः २५ यज्ञस्यासामौषधीनां हेतुः वृष्टिद्वारेण २६ प्रजानां परं कारणं हृदि हेतुत्वात् परापरविदः यज्ञाः कारणं प्रजास्तत्कार्यमित्येवं विदः २७ अहन्यहनि यच महायज्ञानामनुष्ठानेश्शरस्यानां प्रत्यहं क्रियमाणस्य येव सुतालक्षणस्य पापस्य शांतिर्दानाशकं २८ तदे

माषाम्मुद्गामसूराश्च निष्पावास्सकुलत्थकाः आढक्यश्चणकाश्चैव शणाः सप्तदशास्मृताः २२ इत्येता ओषधीनां तु ग्राम्याणां जात योमुने औषध्यो यज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश २३ व्रीहयः सयवामाषा गोधूमाश्चणवस्तिलाः प्रियंगुसप्तमा ह्येता अष्टमास्तु कुलत्थकाः २४ श्यामाकास्त्वथ नीवारा जर्तिलाः सगवेधुकाः तथा वेणुयवाः प्रोक्तास्तथा मर्कटका मुने २५ ग्राम्यारण्याः स्मृता ह्येता ओषध्यश्च चतुर्दश यज्ञनिष्पत्तये यज्ञस्तथासां हेतुरुत्तमः २६ एताश्च सह यज्ञेन प्रजानां कारणं परं परापरविदः प्राज्ञास्ततो यज्ञान्वितन्वते २७ अहन्यहन्यनुष्ठानं यज्ञानां मुनिसत्तम उपकारकरं पुंसां क्रियमाणाघशांतिदम् २८ येषां तु कालसृष्टोसौ पापबिन्दुर्महामते चेतःसु ववृधे चक्रुस्ते न यज्ञेषु मानसम् २९ वेदवादांस्तथा वेदान्यज्ञकर्मादिकं च यत् तत्सर्वं निन्दमानास्ते यज्ञव्यासेधकारिणः ३० प्रवृत्तिमार्गव्युच्छित्तिकारिणो वेदनिंदकाः दुरात्मानो दुराचारा बभूवुः कुटिलाशयः ३१ संसिद्धायां तु वार्तायां प्रजाः सृष्ट्वा प्रजापतिः मर्यादां स्थापयामास यथास्थानं यथागुणं ३२ ॥

वेदवादसृष्टानां यज्ञांगभूतानामोषधीनां कृष्यादिप्रवृत्ता प्रवाहनित्यत्वमनेनयज्ञानांचदर्शितंदृष्टलक्षणमहत्फलमुक्तं तथापि तेषां केषांचिदनुष्ठाने प्रवृत्त्यभावे रागादिकं कारणमाह येषामिति त्रिभिः तेयज्ञेषु मानसं न चक्रुः २९ यज्ञानां व्यासेधकारिणः प्रति हंतारः ३० अतएव प्रवृत्तिमार्गोच्छेदकारिणः यज्ञानुष्ठाने देवैश्वर्यपुष्ट्यात्मनाभावे तत्प्रजावृद्ध्यभावः सिद्धे ३१ तदेवं प्रजाः सृष्ट्वा तासां वार्तायां कृष्या दिनासिद्धायां सत्यां यथागुणं सत्वादिकार्यं स्वायंभुवः ब्राह्मणादीनां वर्णानां धर्मस्य प्रमाणं च मर्यादां स्थापयामास यथास्थानं तत्तत्स्वधर्मानुसारे

१९

भव्यात् शम्भुरित्यत्र ध्रुवाच्छिष्टिं च भव्यं च जनयामास ध्रुवः भार्या शंभोरिति केचित्पठन्ति १२ वारुण्यां वरुणसंजातजातायामरण्य
स्य प्रजापतेरात्मजायां पुष्करिण्यां वारुण्यां चाक्षुषो मनुं षष्ठमन्वन्तरपतिं जनयामासेत्यन्वयः ३ वैराजस्य प्रजापतेः कन्यायां नड्वलायां मनोर्महौ

पराशर उवाच ध्रुवाच्छिष्टिं च भव्यं च भव्याच्छम्भुरजायत शिष्टेराधत्त सुच्छाया पंच पुत्रानकल्मषान् १ रिपुं रिपुंजयं विप्रं वृक
लं वृकतेजसं रिपोराधत्त बृहती चाक्षुषं सर्वतेजसं २ अजीजनत्पुष्करिण्यां वारुण्यां चाक्षुषो मनुं प्रजापतेरात्मजायामरण्य
स्य महात्मनः ३ मनोरजायन्त दश नड्वलायां महौजसः कन्यायां जयतां श्रेष्ठ वैराजस्य प्रजापतेः ४ कुरुः पुरुः शतद्युम्न
स्तपस्वी सत्यवाक्कविः अग्निष्टोमोऽतिरात्रश्च सुद्युम्नश्चेति ते नव ५ अभिमन्युश्च दशमो नड्वलायां महौजसः कुरोरजनयत्पु
त्रान्षडाग्नेयी महाप्रभान् ६ अंगं सुमनसं ख्यातिं क्रतुमंगिरसं शिबिं अंगात्सुनीथापत्यं वै वेनमेकमजायत ७ प्रजार्थमृ
षयस्तस्य ममंथुर्दक्षिणं करं वेनस्य पाणौ मथिते संबभूव महामुने ८ वैन्यो नाम महीपालो यः पृथुः परिकीर्तितः येन दु
ग्धा मही पूर्वं प्रजानां हितकारणात् ९ मैत्रेय उवाच किमर्थं मथितः पाणिर्वेनस्य परमर्षिभिः यत्र जज्ञे महावीर्यः स पृथु
र्मुनिसत्तम १० पराशर उवाच सुनीथा नाम या कन्या मृत्योः प्रथमजाभवत् अंगस्य भार्या सा दत्ता तस्यां वेनो व्यजायत ११
स मातामहदोषेण तेन मृत्योः सुतात्मजः निसर्गादेव मैत्रेय दुष्ट एव व्यजायत १२ अभिषिक्तो यदा राज्ये स वेनः परमर्षि
भिः घोषयामास स तदा पृथिव्यां पृथिवीपतिः १३ न यष्टव्यं न होतव्यं न दातव्यं कदाचन भोक्ता यज्ञस्य कस्त्वन्यो ह्यहं यज्ञ
पतिः प्रभुः १४ ततस्तमृषयः पूर्वं संपूज्य जगतीपतिम् ऊचुः सामकलं सम्यक् मैत्रेय समुपस्थिताः १५ ऋषय ऊचुः
भो भो राजन् शृणुष्व त्वं यद्वदाम तव प्रभो राज्यदेहोपकाराय प्रजानां च हितं परं १६ ॥

जसो दश पुत्रा अजायन्तेत्यन्वयः ४४ नड्वलायां
महौजसं शतिपुत्र कक्रिस्त नड्वलायां महौजसो वेदपोत्पन्न वादेन तयन इति विधानार्थः ६ १५ सामकलं साम्ना कलं मधुरं वा साम ऊचुः १५

॥ विष्णुपुराणटीकायां २१ ॥

वि० पु०
प्र० टी०
२०

दीर्घसत्रेण महता सवत्सरेण गोश्रेष्ठो भागः पुण्यपदभागमात्रे न्यायेन परिपालयन्निति स्मृतेः १७ मया यथा यदा तत्र न देवाय ददातव्यमिति हविर्भागपरिणामो वा यादि हारा १५ को यज्ञ इत्यर्थस्य भगवन्निंदाद्य सहतेन तामर्थं समन्विताः २७ मन्यन्त इति धा देवमिम मन्यमाना दिप्यर्थः दग्यस्य॥ २३

दीर्घसत्रेण देवेशं सर्वयज्ञेश्वरं हरिम्। पूजयिष्याम भद्रं ते तत्रांशस्ते भविष्यति १७ यज्ञेन यज्ञपुरुषो विष्णुः संप्रीणितो नृप। अस्माभि भवतः कामान्सर्वानेव प्रदास्यति १८ यज्ञैर्यज्ञेश्वरो येषां राष्ट्रे संपूजितो हरिः। तेषां सर्वेप्सितावाप्तिं ददाति नृप भूभृतां १९ वेन उवाच मत्तः कोभ्यधिकोयोस्ति यश्चाराध्यो ममापरः। कायं हरिरिति ख्यातो यो वो यज्ञेश्वरो मतः। २० ब्रह्मा जनार्दनः शंभुरिंद्रो वायुर्यमो रविः। हुतभुग्वरुणो धाता पूषा भूमिर्निशाकरः। २१ एते चान्ये च ये देवाः शापानुग्रहकारिणः। नृपस्यैते शरीरस्थाः सर्वे देवमयो नृपः। २२ एतज्ज्ञात्वा मयाज्ञप्तं यथावत्क्रियतां तथा न दातव्यं न होतव्यं न यष्टव्यं च वो द्विजाः। २३ भर्तृशुश्रूषणं। धर्मो यथा स्त्रीणां परो मतः। ममाज्ञापालनं धर्मो भवतां च तथा द्विजाः। २४ ऋषय ऊचुः देहानुज्ञां महाराज मा धर्मो यातु संक्षयं हविषां परिणामोयं यदेतदखिलं जगत् २५ पराशर उवाच इति विज्ञानमानोपि सर्वैः स परमर्षिभिः यदा दत्तानिनानुज्ञां प्रोक्तः प्रोक्तः पुनः पुनः २६ ततस्तु मुनयः सर्वे कोपामर्षसमन्विताः हन्यतां हन्यतां पापः इत्यूचुस्ते परस्परं २७ योयं यज्ञपुरुषं देवमनादिनिधनं प्रभुं विनिंदत्यधमाचारो न स योग्यो भुवः पतिः २८ इत्युक्त्वा मंत्रपूतैस्तैः कुशैर्मुनिगणा नृपम्। निजघ्नुर्निहतं पूर्वं भगवन्निंदनादिना २९ ततश्च मुनयो रेणुं ददृशुः सर्वतो द्विज। किमेतदिति चासन्नान्पप्रच्छुस्ते जनं तदा आख्यातं च जनैस्तेषां चौरीभूतैरराजके राष्ट्रे तु लोकैरारब्धं परस्वादानमातुरैः। तेषामुदीर्णवेगानां चोराणां मुनिसत्तमाः सुमहान्दृश्यते रेणुः परवित्तापहारिणां ३२ ततः संमन्त्र्य ते सर्वे मुनयस्तस्य भूभृतः। ममन्थुरूरुं पुत्रार्थमनपत्यस्य यत्नतः। ३३ मथ्यतश्च समुत्तस्थौ तस्य

...णां अतीकाशः दग्धस्थाणुसमः तत्त्व हस्वश्च सवर्णः इत्यर्थः खर्वटास्यः ह्रस्वमुखः

निषिदेत्यादिकं च ...कं तस्यार्थः खर्वटास्य इति पाठः केचित्तु खर्वटाव इति पठित्वा गवादिद्वयादिशीर्षयस्येति व्याचक्षते ३४॥ २०

अतस्तन्नामसंभवेत् तया भूतमस्याभिषेकं निषीदेति तमूचुः ३५ पापरूपं कर्मैवोपलक्षणं चिह्नं येषां ते ३६ तेन द्वारेण निषादरूपेण ३७ अग्निरिति यथा काष्ठे मथ्यमाने धूमरूपेण तमस्यमले निष्क्रान्ते पश्चादग्निरुत्पद्यते तथा निषादरूपेणैव कल्मषे निष्क्रान्ते पश्चादग्निरिव देदीप्यमानः पृथुरुत्पन्नः आद्यं शार्ङ्गं पिनाकमंसं धनुः ३९ पुन्नाम्न इति पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतस्तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति वचनात् ४१ ४२

किं करोमीति तान्सर्वान्विप्रानाह त्वरान्वितः । निषीदेति तमूचुस्ते निषादस्तेन सोऽभवत् ३५ ततस्तत्संभवा जाता विन्ध्यशैलनिवासिनः । निषादा मुनिशार्दूल पापकर्मोपलक्षणाः । तेन द्वारेण तत्पापं निष्क्रान्तं तस्य भूपतेः । निषादास्ते ततो जाता वेनकल्मषनाशनाः ३७ ततोऽस्य दक्षिणं हस्तं ममन्थुस्ते द्विजाः । मथ्यमाने च तत्राभूत्पृथुर्वैन्यः प्रतापवान् ३८ दीप्यमानेन वपुषा साक्षादग्निरिव ज्वलन् आद्यमाजगवं नाम खात्पपात ततो धनुः ३९ शरांश्च दिव्यान्नभसः कवचं च पपात ह तस्मिञ्जाते तु भूतानि संप्रहृष्टानि सर्वशः ४० सत्पुत्रेणैव जातेन वेनोऽपि त्रिदिवं ययौ पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना ४१ तं समुद्राश्च नद्यश्च रत्नान्यादाय सर्वशः तोयानि चाभिषेकार्थं सर्वाण्येवोपतस्थिरे ४२ पितामहश्च भगवान्देवैराङ्गिरसैः सह स्थावराणि च भूतानि जङ्गमानि च सर्वशः ४३ समागम्य तदा वैन्यमभ्यषिञ्चन्नराधिपम् हस्ते तु दक्षिणे चक्रं दृष्ट्वा तस्य पितामहः ४४ विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ विष्णुचिह्नं करे चक्रं सर्वेषां चक्रवर्तिनाम् ४५ भवत्यव्याहतो यस्य प्रभावस्त्रिदशैरपि महता राजराज्येन पृथुर्वैन्यः प्रतापवान् ४६ सोऽभिषिक्तो महातेजा विधिवद्धर्मकोविदैः पित्रापरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः अनुरागात्ततस्तस्य नाम राजेत्यजायत आपस्तस्तम्भिरे चास्य समुद्रमभियास्यतः ४८ पर्वताश्च ददुर्मार्गं ध्वजभङ्गश्च नाभवत् अकृष्टपच्या पृथिवी सिद्ध्यन्त्यन्नानि चिन्तया ४९ ॥

स्थावराणि चेति तदभिमानिदेवताः ४३ चक्रमिति रेखात्मकं लाञ्छनं रेखामयं चक्रं दृष्ट्वा तत्र्यर्थः नडक्तं यस्याप्रतिहतं चक्रमेषाः स परमेष्ठिन इति ४४ राजराज्येन चक्रवर्तित्वेन ४६ अपरञ्जिताः क्लेशिताः ४७ ध्वजभङ्गश्च न भङ्गो नाभवत् अकृष्टपच्या कृषिं विनैव सफला ४९

वि. पु.
प्र. टी.
३०

पुटके पर्णादिसंस्थानविशेषे॥ यतः सर्वसमर्थोऽजनि अतो जातमात्रस्य यज्ञस्यापि तेऽस्य पुत्रजायते इति मत्स्योक्तेः पैतामहे पितामहदैवत्ये पृथोर्वैन्यपूजेन व
तु पितामहकर्तृके यथाहुर्वायुः वैन्यस्य हि पृथोर्यज्ञे वर्तमाने महात्मनः। सूतः सूत्यां समुत्पन्न इति ५० सूत्यामिति सुतिरभिषुतिः अभिषु
यते कट्टाते सोमो यस्यामिति सूतिः सोमाभिषवभूमिः। तस्यां सौत्येऽहनि तस्मिन्नेव दिने ५१ वायुवचः। ५२ अस्माभिरिति अस्मदो द्वयोश्चेति बहुवचनं

५४

सर्वकामदुघा गावः पुटके पुटके मधु तस्य वै जातमात्रस्य यज्ञे पैतामहे शुभे ५० सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामतिः त
स्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ५१ प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ स्तूयतामेष नृपतिः पृथुर्वैन्यः प्रतापवान्
कर्मैतदनुरूपं वां पात्रं स्तोत्रस्य चापरं ततस्तावूचतुर्विप्रान् सर्वानेव कृताञ्जली ५२ अद्य जातस्य नो कर्म ज्ञायतेऽस्य महीपतेः गुणा
न चास्य ज्ञायन्ते न चास्य प्रथितं यशः ५४ स्तोत्रं किमाश्रयं त्वस्य कार्यमस्माभिरुच्यतां ऋषय ऊचुः करिष्यत्येष यत्कर्म चक्रवर्ती म
हाबलः गुणा भविष्या ये चास्य तैरयं स्तूयतां नृपः ५५ पराशर उवाच ततः स नृपतिस्तोषं तच्छ्रुत्वा परमं ययौ सद्गुणैः श्लाघ्यता
मेति श्लाघ्या भाव्या गुणा मम ५६ तस्माद्यदद्य स्तोत्रेण गुणनिर्वर्णनं त्विमौ करिष्यतः करिष्यामि तदेवाहं समाहितः ५७ यदिमौ
वर्जनीयं च किञ्चिदत्र वदिष्यतः तदहं वर्जयिष्यामीत्येवं चक्रे मतिं नृपः ५८ अथ तौ चक्रतुः स्तोत्रं पृथोर्वैन्यस्य धीमतः भविष्यैः क
र्मभिः सम्यक् सुस्वरौ सूतमागधौ ५९ सत्यवाग्दानशीलोऽयं सत्यसन्धो नरेश्वरः ह्रीमान्मैत्रः क्षमाशीलो विक्रान्तो दुष्टशासनः ६०
धर्मज्ञश्च कृतज्ञश्च दयावान्प्रियभाषकः मान्यमानयिता यज्वा ब्रह्मण्यः साधुसंमतः ६१ ॥

चक्रवर्ती दक्षिणहस्ते तस्य चिह्नं स च क्रस्योपलब्धेः महाबलस्य विस्वंषानानात अथ सर्वेऽप्यस्य गुणाः सकर्माणि च भविष्यन्त्येव अतो भविष्यैरेव गु
णकर्मभिरेष स्तूयतां अयं भावः नीचेन निगुण्यते देवेरुन्नमस्तत्प्रियोक्तिभिरिति न्यायादयं गुणकर्मस्त मैवरस्य कार्ये विनायनीय इति ५५ पृथुरे
पि दुष्यन्तेनेन स्तुतिमिषेणाममायं ऋषिभिरुपदेश एव क्रियत इति मत्वा तथैव कर्तव्यमध्यवसितवानित्याह तत स इत्यादि त्रिभिः ५६ सत्यसं
धः सत्यप्रतिज्ञः सत्यमर्यादो वा ह्रीमान् अकार्ये लज्जायुक्तो वान् ६० ६१॥

३०

तस्मिंकालेन्नेनपृथुराज्यसंस्थौ ८५ सकलाश्चौषधीश्चौषध्योग्रस्ताः ८६ ननाशयलायत ८७ आत्मनोयोगबलेनपृथ्वीभावंप्राप्यधारयिष्यामि य
यावहतिवेशे

समः शत्रौचमित्रेचव्यवहारेस्थितोन्नृपः सूतेनोक्तान्गुणानित्थंसतदामागधेनच ८२ चकारक्वदितारककर्मणाकृत।
वानसौ ततः सपृथिवीपालः पालयन्वसुधामिमां ८३ इयाजविविधैर्यज्ञैर्महद्भिर्भूरिदक्षिणैः तंप्रजाः पृथिवीनाथमुपतस्थुः क्षुधा
र्दिताः ८४ औषधीषुप्रणष्टासुतस्मिन्कालेह्यराजके तमूचुस्तेनताः पृष्टास्तत्रागमनकारणं ८५ प्रजाऊचुः अराजकेनृपश्रेष्ठ
धरित्र्यासकलौषधीः ग्रस्तास्ततः क्षयंयांतिप्रजाःसर्वाःप्रजेश्वर ८६ त्वंनोवृत्तिप्रदोधात्राप्रजापालोनिरूपितः देहिनःक्षुत्परीता
नांप्रजानांजीवनौषधीः ८७ पराशरउवाच ततोथनृपतिर्दिव्यमादायाजगवंधनुः शरांश्चदिव्यान्कुपितःसोभ्यधावद्वसुंधरां ८८
ततोननाशत्वरितागौर्भूत्वातुवसुंधरा सालोकान्ब्रह्मलोकादींस्तत्कमाद्गमन्मही ८९ यत्रयत्रययौदेवीसातत्रभूतधारिणी
तत्रतत्रतुसावैण्यंददर्शाभ्युद्यतायुधम् ७० ततस्तंप्राहवसुधापृथुंपृथुपराक्रमं प्रवेपमानातद्बाणपरित्राणपरायणा ७१
पृथिव्युवाच स्त्रीवधेत्वंमहापापंकिंनरेंद्रनपश्यसि येनमांहंतुमत्यर्थंप्रकरोषिनृपोद्यमं ७२ पृथुरुवाच एकस्मिन्यत्र
निधनंप्रापितेदुष्टकारिणि बहूनांभवतिक्षेमंतस्यपुण्यप्रदोवधः ७३ पृथिव्युवाच प्रजानामुपकाराययदिमांत्वंहनिष्य
सि आधारःकःप्रजानांतेनृपश्रेष्ठभविष्यति ७४ पृथुरुवाच त्वांहत्वावसुधेबाणैर्मच्छासनपराङ्मुखीम् आत्मयोगब
लेनेमाधारयिष्याम्यहंप्रजाः ७५ पराशरउवाच ततःप्रणम्यवसुधातंभूयःप्राहपार्थिवं प्रवेपितांगीपरमंसाध्वसंसमुपाग
ता ७६ पृथिव्युवाच उपायतःसमारब्धाःसर्वेसिद्ध्यंत्युपक्रमाः तस्मादृदाम्युपायंतेतत्कुरुष्वयदीच्छसि ७७ समस्ताश्चम
याजीर्णानरनाथमहौषधीः यदीच्छसिप्रदास्यामिताःक्षीरपरिणामिनीः ७८ तस्मात्प्रजाहितार्थायममधर्मभृतांवर
तंतुवत्संप्रयच्छत्वंक्षरेयंयेनवत्सला ७९

आत्मानंपयपयिनेमाधारयिष्याम्यहंप्रजाइति ७५ क्षरेयंक्षीररूपेणौषधीःस्त्रवेयं ७९॥

मांचसर्वस्मांकुरुपेनसमस्थलत्वेनधीरेसर्वत्रभावयेधास्यामि ८० विवर्धिताःसक्केकत्रोच्चतराःकृताः ८१ पूर्वविसर्गेपृथूत्पत्तेःपूर्वसृष्टौ ८२
८३ ८४ तदापृथ्व्याःपूर्वमराजकेकालेसोपिफलाद्याहारःकृच्छ्रेणसंपाद्योभवत् ८५ सपृथुस्तंप्रजासंतानप्रवर्त्तकंमनुंवत्संकृत्वास्वपाणौ

समांचकुरुसर्वत्रयेनधीरेसमेततः। वत्सौषधीवीजभूतंवीरसर्वत्रभावये ८० पराशरः
ततउत्सारयामासशैलाञ्छतसहस्रशः। धनुःकोट्यातदावैन्यस्ततःशैलाविवर्धिता ८१
नहिपूर्वविसर्गेवैविषमेपृथिवीतले प्रविभागःपुराणांवाग्रामाणांवातदाभवत् ८२ न
सस्यानिनगोरक्षंनकृषिर्नवणिक्पथः। वैन्यात्प्रभृतिमैत्रेयसर्वस्यैतस्यसंभवः ८३ य
त्रसमंत्वस्याभूमेरासीत्तत्राधिपः। नत्रतत्रप्रजानांहिनिवासंसमरोचयत् ८४ आहारः
फलमूलानिप्रजानामभवत्तदा कृच्छ्रेणमहतासोपिप्रनष्टास्वोषधीषुवै ८५ स
कल्पयित्वावत्संतमनुंस्वायंभुवंप्रभुः। स्वपाणौपृथिवीनाथोदुदोहपृथिवींपृथुः।
८६ सस्यजातानिसर्वाणिप्रजानांहितकाम्यया तेनान्नेनप्रजास्तातवर्त्ततेद्यापिनित्य
शः ८७ प्राणप्रदातासपृथुर्यस्माद्भूमेरभूत्पिता ततस्तुपृथिवीसंज्ञामवापाखि
लधारिणी ८८॥

इयंपात्रेसस्यजातानिपृथिवींदोदोहेत्यन्वयः ८६ प्राणप्रदानात् अभयप्रदानाद्भूमेःपिताअभूत् यथाह्नःजनकश्चोपनेताचयश्च
विद्यांप्रयच्छति अन्नदाताभयत्रातापंचैतेपितरस्मृताइति ८८॥

देवादिभिर्दुग्धाभिर्वैष्टैः स्वस्वाभिमतेयात्रमुपादाय तत्तत्स्वाभिमतेययोभूमिर्दुग्धा तदेषां देवादीनां तद्योग्यवत्सा नजातीयाय च वत्सविशेषा
दोग्धृविशेषाश्चाभवन् तमेव देवादिषु दोग्धृवत्सादिक्रमं हरिवंशमत्स्याग्नेयकूर्मसंवादेयेणाव दर्शयाम: देवानामिन्द्रो वत्सः मित्रो दोग्धा सौवर्णपात्रं च
ऊर्जं क्षीरं मनीनां सोमो वत्सः बृहस्पतिर्दोग्धा छन्दांसि पात्रं तपो ब्रह्म च क्षीरं दैत्यानां विरोचनो वत्सः द्विमूर्द्धा दोग्धा आयसं पात्रं मायाक्षीरं राक्ष
सानां सुमाली वत्सः जननामा दोग्धा ब्रह्मिमयं पात्रं रुधिरं क्षीरं अद्रीणां हिमवान् वत्सः मेरुर्दोग्धा शिलामयं पात्रं औषधी रत्नं क्षीरं गन्धर्वाणां
चित्ररथो वत्सः विश्वावसुर्दोग्धा पद्मपात्रं गन्धं क्षीरं नागानां तक्षको वत्सः धृतराष्ट्रो दोग्धा अलाबुपात्रं विषं क्षीरं यक्षाणां कुबेरो वत्सः स

ततश्च देवैर्मुनिभिर्दैत्यै रक्षोभिरद्रिभिः । गन्धर्वैरुरगैर्यक्षैः पितृभिस्तरुभिस्तथा ॥ ८९ ॥ तत्तत्पात्रमुपादाय
तत्तद्दुग्धा मुने पयः । वत्सदोग्धृविशेषाश्च तेषां तद्योनयोऽभवन् ॥ ९० ॥ सेषा धात्री विधात्री च धारणी पोषणी तथा ।
सर्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥ ९१ ॥ एवंप्रभावः स पृथुः पुत्रो वेनस्य वीर्यवान् । जज्ञे महीपतिः पूर्वो
राज्ञाभूज्जनरञ्जनात् ॥ ९२ ॥ य इदं जन्म वैन्यस्य पृथोः कीर्तयते नरः । न तस्य दुष्कृतं किंचित्फलदायि प्रजायते ॥ ९३ ॥

कर्णौ दोग्धा आमे मृन्मये पात्रं अन्तर्धानं क्षीरं पितॄणां यमो वत्सः अन्तको दोग्धा राजतं पात्रं स्वधा क्षीरं तरूणां सालो वत्सः प्लक्षो दोग्धा पालाशं पात्रं
छिन्नसंरोहणं क्षीरं तदुक्तं हरिवंशे देवा मित्रेन्द्रसौवर्णं बलं तथा मुनयस्तथा बृहस्पतीन्दुवेदैश्च तपो दैत्यास्त्विमूर्द्धं तु विरोचनायसानां च मा
यां रक्षोगणा अपि जनुनामसुमालिभ्याम स्वादुरक्तं ततोदय: मेरुहेमाद्रिशैलैस्तु रत्नं गन्धर्वजातय: सरुचित्ररथो भोज्ये गंधं तत्र भुजगास्ततः
धृतराष्ट्रतक्षकालाबुभिश्च विषमल्वाणय यक्षास्तु कर्णाय नदामैस्तु तर्पिधि पितृव्रजा: अन्तकप्रेतराट् रौप्ये स्वधामथ महीरुहः शालप्लक्षपला
शैश्च छिन्नसंरोहणं मुदा स्वदोग्धृवत्सपात्रैस्ते तत्र तत्र उदुदुरुर्वरामिति ॥ ९० ॥ धात्री माता विधात्री कर्त्री धारिणी आधारा पोषणी पोषणकर्त्री

वि० पु०
प्र० टी०
प०

इति श्रीस्वप्रकाशव्याख्यायां प्र० त्रयोदशोऽध्यायः १३ अंतर्द्धिर्वेवांतर्धानं तस्माज्जायायां शिखंडिनी हविर्धानं पुत्रमसूयत १ आग्नेयी अग्निवंशजा धिषणानाम्नी २ प्राचीनाग्राः कुशाः सर्वत्र यज्ञानुष्ठानात् तदुक्तं यस्येदं देवयजनं मम यज्ञं वितन्वन प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलमिति ४ तपसः पारे सवर्णासंज्ञायां कृतदारः तपस्तप्त्वानंतरं तेनोपयीनवानित्यर्थः तमम इति पाठे तमसमो नरकस्य पारे निमित्तेषु

दुःस्वप्नोपशमं नॄणां शृण्वतां चैतदुत्तमम् पृथोर्जन्म प्रभावश्च करोति सततं नॄणाम् ५४ इति श्रीवि० पु० त्रयोदशोऽध्यायः १३
पृथोः पुत्रौ महावीर्यौ जज्ञातेंऽतर्द्धिपालिनौ शिखंडिनी हविर्धानमंतर्द्धानाद्व्यजायत १ हविर्धानात्षडाग्नेयी धिषणाजनयत्सुतान् प्राचीनबर्हिषं शुक्रं गयं कृष्णं व्रजाजिनौ २ प्राचीनबर्हिर्भगवान्महानासीत्प्रजापतिः हविर्धानान्महाराजो येन संवर्द्धिताः प्रजाः ३ प्राचीनाग्राः कुशास्तस्य पृथिव्यामभवन्मुने प्राचीनबर्हिर्भगवान्ख्यातो भुवि महाबलः ४ समुद्रतनयायां स कृतदारो महीपतिः महतस्तपसः पारे सवर्णायां महीपते ५ सवर्णाधत्त सामुद्री दश प्राचीनबर्हिषः सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः ६ अपृथग्धर्मचरणास्तेऽतप्यंत महत्तपः दशवर्षसहस्राणि समुद्रसलिलेशयाः ७
मैत्रेय उवाच यदर्थं ते महात्मानस्तपस्तेपुर्महामुने प्रचेतसः समुद्राम्भस्येतदाख्यातुमर्हसि ८ पराशरः पित्रा प्रचेतसः प्रोक्ताः प्रजार्थममितात्मना प्रजापतिनियुक्तेन बहुमानपुरःसरं ९ ब्रह्मणा देवदेवेन समादिष्टोऽस्म्यहं सुताः प्रजाः संवर्धनीयास्ते मया चोक्तं तथेति तत् १० तन्मम प्रीतये पुत्राः प्रजावृद्धिमतंद्रिताः कुरुध्वं माननीया च ममाज्ञा च प्रजापतेः ११ पराशरः ततस्ते तत्पितुः श्रुत्वा वचनं नृपनंदनाः तथेत्युक्त्वा च तं भूयः पप्रच्छुः पितरं मुने १२ प्रचेतस ऊ० येन तात प्रजावृद्धौ समर्थाः कर्मणा वयं भवेम तत्समस्तं नः कर्म व्याख्यातुमर्हसि १३ पितोवाच

ज्ञोत्पन्ना नरकतरणार्थमित्यर्थः ५ सवर्णा दश प्रचेतसो पुत्रानसूयत ६ अपृथग्धर्मचरणाः समानधर्मचारिणः यत्तपस्तेपो वक्ष्यमाणमेकभार्यात्वं संभावयितुमुक्तं समुद्रसलिलेशयाः तत्र निमग्नाः संतः ७ तेन यया प्रजाः संवर्धनीया इ

मन्विच्छतां धर्माद्यनंतरं मोक्षमपीच्छतां पुंसां १६ यस्मिन्नाराधिते यमाराध्येत्यर्थः तमाराध्य तस्मिन्नाराधिते इत्यर्थः १७ प्रचेतस एव प्राचेतस
१८ येस्तवं चक्रुस्तं वक्तुमर्हसि २१ जगद्बीजतया नन्वाचत्तरूपविभागतः सुहृद्रूपप्रणामेन तद्भेदः विसृष्टः प्रचेतसोत्र प्रथमं जगत्कारणतया
प्रणमंति नताःस्मेति द्वाभ्यां २३ अनौपम्यं सूर्याद्युपमानशून्यं चिद्रूपमित्यर्थः अनंतं निर्भेदं अपारवत् अवधिशून्यं २४ कालरूपेण प्रण

तस्मात्प्रजाविवृद्ध्यर्थं सर्वसत्त्वप्रभुं हरिं आराधयत गोविन्दं यदि सिद्धिमभीप्सथ १५ धर्ममर्थं च कामं च मोक्षं चान्विच्छतां सदा
आराधनीयो भगवाननादिपुरुषोत्तमः १६ यस्मिन्नाराधिते सर्गं चकारादौ प्रजापतिः तमाराध्याच्युतं वृद्धिः प्रजानां वो भविष्यति
१७ पराशरउवाच इत्येवमुक्तास्ते पित्रा पुत्राः प्राचेतसा दश मग्नाः पयोधिसलिले तपस्तेपुः समाहिताः १८ दशवर्षसहस्राणि
न्यस्तचित्ता जगत्पतौ नारायणे मुनिश्रेष्ठ सर्वलोकपरायणे १९ तत्रैवावस्थिता देवमेकाग्रमनसो हरिम् तुष्टुवुर्यः स्तुतः कामान्
स्तोतुरिष्टान्प्रयच्छति २० मैत्रेय: स्तवं प्राचेतसो विष्णोः समुद्राम्भसि संस्थिताः चक्रुस्तन्मे मुनिश्रेष्ठ सुपुण्यं वक्तुमर्हसि २१ पराश
रउवाच शृणु मैत्रेय गोविंदं यथा पूर्वं प्रचेतसः तुष्टुवुस्तन्मयीभूताः समुद्रसलिलेशयाः २२ प्रचेतसऊचुः नताःस्म सर्ववच।
सां प्रतिष्ठा यत्र शाश्वती तमाद्यंतमशेषस्य जगतः परमं प्रभुम् २३ ज्योतिराद्यमनौपम्यमण्वनंतमपारवत् योनिभूतमशेषस्य स्था
वरस्य चरस्य च २४ यस्याहः प्रथमं रूपमरूपस्य तथा निशा संध्या च परमेशस्य तस्मै कालात्मने नमः भुज्यतेनुदिनं देवैः पितृभिश्च
सुधात्मकः जीवभूतः समस्तस्य तस्मै सोमात्मने नमः २६ यस्तमो हंति तीव्रात्मा प्रभाभिर्भासयन्नभः घर्मशीताम्भसां योनिस्तस्मै
सूर्यात्मने नमः २७ काठिन्यवान्यो बिभर्ति जगदेतदशेषतः शब्दादिसंश्रयो व्यापी तस्मै भूम्यात्मने नमः २८ यद्योनिभूतं ज
गतो बीजं यत्सर्वदेहिनाम् तत्तोयरूपमीशस्य नमामो हरिमेधसः २९ ॥

मंति यस्याहरिति २५ विश्वरूपेण प्रणमंति भुज्यत इत्यादि दशभिः जीवभूत जीवनरूपः २६ घर्मस्तापः शीतं च ते च अम्भांसि तेषां योनिः कार
णं २७ शब्दादीनां पंचानामपि गुणानां संश्रयः २८ योनिभूतं शोणितरूपेण बीजं च शुक्ररूपेण २९ ॥

वि उ॰
प्रती॰
५१

योऽग्रयष्टदेवानां मखे कव्यभुक् पितॄणां च भूतं ३० पंचधा प्राणादिरूपेण ३१ अनंतस्य मूर्तिरस्य मूर्तित्वं नैतद्धात्र भवतीत्यनेनत्व मूर्तिमान् ३२ स्थानमालंबनं विषयश्चासौ यः ३३ क्षरः स्थूलदेहावच्छेदेन अक्षरो लिंगदेहस्य नैवन ज्ञानमूलाय शब्दादिज्ञानसाधनाय ३४ प्रधानरूपेण प्रणमति यस्मिन्निति यस्मिन्ननंते विश्वं तिष्ठति प्रकृतेर्धर्मा सत्वादयो गुणा सत्वं स्येति प्रकृतिधर्मी तस्मै ३६ पुरुषरूपेण प्रणमति शुद्ध इति गुणवानिव गुणप्रेरकत्वेन

योऽग्रस्त्वं सर्वदेवानां हव्यभुक्कव्यभुक्तथा पितॄणांच नमस्तस्मै विष्णवे पावकात्मने ३० पंचधावस्थितो देहे यश्चेष्टां कुरुते निशं आकाशयोनिर्भगवांस्तस्मै वाय्वात्मने नमः ३१ अवकाशमशेषाणां भूतानां यः प्रयच्छति अनंतमूर्तिमान् शुद्धस्तस्मै व्योमात्मने नमः ३२ समस्तेंद्रियवर्गस्य यः सदा स्थानमुत्तमं तस्मै शब्दादिरूपाय नमः कृष्णाय वेधसे ३३ गृह्णाति विषयान्नित्यमिंद्रियात्मा क्षराक्षरः यस्तस्मै ज्ञानमूलाय नतास्मि हरिवेधसे ३४ गृहीतानिंद्रियैरर्थानात्मनि यः प्रयच्छति अंतःकरणभूताय तस्मै विश्वात्मने नमः ३५ यस्मिन्ननंते सकलं विश्वं यस्मात्तथोद्गतं लयस्थानं च यस्तस्मै नमः प्रकृतिधर्मिणे ३६ शुद्धः संल्लक्ष्यते भ्रांत्या गुणवानिव यो गुणः तमात्मरूपिणं देवं नतास्म पुरुषोत्तमं ३७ अविकारमजं शुद्धं निर्गुणं यन्निरंजनं नतास्म तत्परं ब्रह्म विष्णोः यत्परमं पदं ३८ अदीर्घह्रस्वमस्थूलमनण्वश्याममलोहितं अस्नेहच्छायमतनुमसक्तमशरीरिणम् ३९ अनाकाशमसंस्पर्शमगंधमरसं च यत् अचक्षुश्रोत्रमचलमवाक्प्राणममानसं ४० अनामगोत्रमसुखमतेजस्कमहेतुकं अभयं भ्रांतिरहितमनिद्रमजरामरं ४१ अरजोऽशब्दममृतमप्लुतं यदसंवृतं पूर्वापरे न वै यस्मिंस्तद्विष्णोः परमं पदं ४२ परमेशित्वगुणवत्सर्वभूतमसंश्रयम् नतास्म तत्पदं विष्णोर्जिह्वादृग्गोचरं न यत् ४३ ॥

तेषामसंकर इव आत्मरूपिणं प्रत्यग्रूपम् ३७ शुद्धं रूपं प्रणमति अविकारमिति षड्भिः शुद्धं स्वभावतः एव निर्मलं निरंजनं आगंतुकमलशून्यं ३८ अनिर्देश्यं निरवयवं ४१ अप्लुतं गतिशून्यं पूर्वापरे दिक्कालकृते ४२ परं निरुपाधिकं ईशित्वादिगुणवत् स्वाभाविकषड्गुणैश्वर्ययुक्तं मायया सर्वभूतमपि असंश्रयं निराधारम् अतएव जिह्वाया दृशश्च अगोचरो न भवति न नतास्म ४३ ।

तस्मिन्नेव समाधिस्थितैः कांक्ष्येयं ते ते तत्समाधयः ४४ ४५ इति श्रीवि० प्र० चतुर्दशोध्यायः १४ पराशरउवाच। ततः तपश्चरत्सु तत्र पितरि चिरनाशदानन्वन्तानं प्राप्य राज्यं तपस्कावनं गते सतीति द्रष्टव्यं तदुक्तं प्राचीनबर्हिषं त्वं चेत्कर्मस्वासक्तश्चेत संतारो ध्यात्मतत्वज्ञः कृपालुः प्रतिबोधयदित्यादिना पुरंजनाख्यानेन श्रुतो रक्षमाणां पृथिवीं कर्षणादंशभावान्महीरुहा आवृतवंतः १ वायोरग्नेश्च स्रष्टेः प्रयोजनमाह

वेशं उपदेशरूपा १ कुमार्गस्य देशक उपदेष्टा २ सर्वेशास्त्रसर्पगतादीन्दृष्ट्वा तेन कोपि मंत्रादिप्रतीकारः कृत इत्यत आह तस्मादविज्ञातं यथा भवत्येवं सर्वभक्ष्ये

तस्मिन्प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरलमल्पकास्ते समाश्रिताद्ब्रह्मतरोरनंतान्निःसंशयं प्राप्स्यथ वै महत्फलं ५१ इति वि-पुरा-
सप्तदशोध्यायः १७ पराशर उवाच तस्यैवं दानवाश्चेष्टां दृष्ट्वा दैत्यपतेर्भयात् आचचख्युः स चोवाच सूदानाहूय सत्वरः १ हिरण्यकशिपु
रुवाच हे सूदा मम पुत्रोसावन्येषामपि दुर्मतिः कुमार्गदेशको दुष्टो हन्यतामविलंबितं २ हालाहलं विषं तस्य सर्वभक्ष्येषु दीयतां अवि
ज्ञातमसौ पापो हन्यतां मा विचार्यतां ३ पराशर उवाच ते तथैव ततश्चक्रुः प्रह्लादाय महात्मने विषदानं यथाज्ञप्तं पित्रा तस्य महात्मनः
४ हालाहलं विषं घोरमनंतोच्चारणेन सः अभिमंत्र्य सहान्नेन मैत्रेय बुभुजे तदा ५ अविकारं स तद्भुक्त्वा प्रह्लादः स्वस्थमानसः अ
नंतख्यातिनिर्वीर्यं जरयामास तद्विषं ६ ततः सूदा भयत्रस्ता जीर्णं दृष्ट्वा महद्विषं दैत्येश्वरमुपागम्य प्रणिपत्येदमब्रुवन् ७
सूदा ऊचुः दैत्यराज विषं दत्तमस्माभिरतिभीषणं जीर्णं तेन सहान्नेन प्रह्लादेन सुतेन ते ८ हिरण्यकशिपुरुवाच त्वर्यतां
त्वर्यतां हे हे सद्यो दैत्यपुरोहिताः कृत्यां तस्य विनाशाय उत्पादयत माचिरात् ९ पराशर उवाच सकाशमागम्य ततः प्रह्लादस्य पुरो
हिताः सामपूर्वमथोचुस्ते प्रह्लादं विनयान्वितं १० पुरोहिता ऊचुः जातस्त्रैलोक्यविख्यात आयुष्मन्ब्रह्मणः कुले दैत्यराजस्य
तनयो हिरण्यकशिपोर्भवान् ११ ॥

षु अवं हलकादिषु विषं दत्वा हन्यतामित्यर्थः ३ अनंतस्य नाम्ना भक्ष्यभोज्यादि सर्व
मभिमंत्र्य तस्मै निवेद्य तदुच्छिष्टं प्रसादरूपेणानित्यमसौ भुंक्ते अत एव तदा सौ विषमपि तथैव बुभुजे ५ तस्मादनेन तस्याख्यात्या कीर्त्या निर्वीर्यत्वादवि
कारं यथा भवत्येवं जरयामास ६ सर्वस्माद्ब्रह्मणः क्लिरयि केतिमत्वा ब्रह्मणात्रिशं कृत्वेत्वर्यतामिति ९ १० ११ ॥ ५४

तेपितासर्वलोकानामाश्रयः १२ व्रजणेमारीचेःकुले १५ नापराध्यामितान्यथाकरोमि १७ यथायैर्यैर्दोषैस्तेनदर्शनंतथासर्वान्दोषान्कोब्रवीति
दोषानेनात्रकोपिवक्तुंशक्नोतीत्यर्थः तथाकिंविहर्तुमीशाद् किंत्विति १७ किमनेनतेनसाधितत्वादिपुनरुक्तिर्लोपालभात्सेपार्थे २० इदंश्रुत्वा
येवतएवंयस्मात्स्नेनाद्भवतितस्मात्किंस्यादितीदंविर्धर्यकंवाकिमितिहृथैवोच्यतइत्यर्थः २१ पुरुषार्थचतुष्टयप्राप्तिमेवोदाहरन्नाह मरीचि

किंदेवैःकिमनेनतेनकिममेतनवाश्रयः पितातेसर्वलोकानांत्वंतथैवभविष्यसि १२ तस्मात्परित्यजैनांत्वंविपत्तस्त्वसंदितास्
वार्वपितासमस्तानांगुरूणांपरमोगुरुः १३ प्रह्लादउवाच एवमेतन्महाभागाःश्लाघ्यमेतन्महाकुलं मारीचेःसकलेप्यस्मिंत्रैलो
क्येकोन्यथावदेत् १४ पितावममसर्वस्मिंजगत्युत्कृष्टचेष्टितः एतदप्यवगच्छामिसत्यमत्रापिनानृतं १५ गुरूणामपिसर्वेषामपि
तापरमकोगुरुः यदुक्तंभ्रांतिसत्रापिमस्वल्पापिहिनविद्यते १६ पितागुरुर्नसंदेहः पूजनीयःप्रयत्नतः तत्रापिनापराध्यामीत्येवं
मनसिमेस्थितम् १७ यदेतत्किमनेनेतेनेत्युक्तंयुष्माभिरीदृशम् कोब्रवीतियथायुक्तंकिंत्वेतन्नहवोर्थवत् १८ इत्युक्त्वासोभवन्मौ
नीतेषांगौरवयंत्रितः प्रहस्यचपुनःप्राहकिमनेनेनसाधितिति १९ साधुभोःकिमनेनेनसाधुभोगुरवोमम श्रूयतांयदनेनेतनयदिवे
दंनयास्यथ २० धर्मार्थकाममोक्षाख्याःपुरुषार्थाउदाहृताः चतुष्टयमिदंयस्मात्तस्मात्किंकिमिदंहृथा २१ मरीचिमिश्रैर्दक्षेण
तथैवान्यैरनेनतः धर्मःप्राप्तस्तथैवान्यैरर्थःकामस्तथापरैः २२ तत्तत्ववेदिनोभूत्वाज्ञानध्यानसमाधिभिः ग्रवाप्तर्मुक्तिमपरेपुरुषा
ध्वस्तबंधनाः २३ संपदैश्वर्यमाहात्म्यज्ञानसंततिकर्मणाम् विमुक्तेश्चैकमालभ्यंमूलमाराधनंहरेः २४ यतोधर्मार्थकामाख्यं
मुक्तिश्चापिफलंद्विजाः तेनापिहिकिमित्येवमनेनेतनकिमुच्यते २५ किंवात्रबहुनोक्तेनभवंतोगुरुवोमम वदंतुसाधुवासाधु

मिश्रैरितिचतुर्भिःमिश्रशब्दस्यसर्वत्रयोगान्मारीचिमिश्रैर्मरीचिमुख्यैरित्यर्थः २२ एकतालभ्यंसमग्रह्मिमात्रस्तुलभंहरेराराधनमेवसंपदादीनां
विमुक्तेश्चमूलं २४ यतोधर्मादिचतुर्विधंफलंतेनाप्यनेनेवनकिमित्येवंकिमिदमुच्यते २५ सोपालंभोक्तिंनिगमयतिकिंवेति २६

एवं विपक्षस्तिष्ठंश्चाग्नौ वा भूयो न वदसीति मन्ताः एवमस्माभिस्त्वं रक्षितोऽसि प्रबुद्धिमांस्त्वमिति नैव तातोऽसि २७ मोहग्राहं प्रबुद्धिकृतं ग्रहः २८

पुरोहिता ऊचुः दह्यमानस्त्वमस्माभिरग्निना बाल रक्षितः भूयो न वक्ष्यसीत्येवं नैव ज्ञातोऽस्य बुद्धिमान् २७ यदा स्मठचनान्मोह।
ग्राहेन त्यक्ष्यते भवान् ततः कृत्यां विनाशाय तव स्रक्ष्याम दुर्मते २८ प्रह्लाद उवाच कः केन हन्यते जन्तुर्जन्तुः कः केन रक्ष्यते
हन्ति रक्षति चैवात्मा ह्यसत्साधु समाचरन् २९ पराशर उवाच इत्युक्तास्तेन ते क्रुद्धा दैत्यराजपुरोहिताः कृत्यामुत्पादयामा
सुर्ज्वालामालोज्ज्वलाकृतिम् ३० अतिभीमाः समागम्य पादन्यासक्षतक्षितिः शूलेन साधु संक्रुद्धा तं जघानाशु वक्षसि ३१
तत्तस्य हृदयं प्राप्य शूलं बालस्य दीप्तिमत् जगाम खण्डितं भूमौ तत्रापि शतधा गतम् यत्रानपायी भगवान् हृद्यास्ते हरिरीश्वरः
भङ्गो भवति वज्रस्य तत्र शूलस्य का कथा ३३ अपापे तत्र पापैश्च पातितां दैत्ययाजकैः तानेव सा जघानाशु कृत्या नाशं जगाम च
३४ कृत्यया दह्यमानांस्तान्विलोक्य स महामतिः त्राहि कृष्णेत्यनन्तेति वदन्नभ्यवपद्यत ३५ प्रह्लाद उवाच सर्वव्यापिन् जगद्रू
प जगत्स्रष्टर्जनार्दन पाहि विप्रानिमानस्माद्दुःसहान्मन्त्रपावकात् ३६ यथा सर्वेषु भूतेषु सर्वव्यापी जगद्गुरुः विष्णुरेव
तथा सर्वे जीवन्त्वेते पुरोहिताः यथा सर्वगतं विष्णुं मन्यमानोऽनपायिनम् चिन्तयाम्यरिपक्षेऽपि ३७ जीवन्त्वेते पुरोहिताः ये हन्तुमागता दत्तं यैर्विषं यैर्हुताशनः यैर्दिग्गजैरहं क्षुण्णो दष्टः सर्पैश्च यैरपि ३८ तेष्वहं
मित्रभावेन समः पापोऽस्मि न क्वचित् तथा तेनाद्य सत्येन जीवन्त्वसुरयाजकाः ४० पराशर उवाच इत्युक्तास्तेन ते सर्वे संस्प
ृष्टाश्च निरामयाः समुत्तस्थुर्द्विजा भूयस्तमूचुः प्रश्रयान्वितम् ४१ पुरोहिता ऊचुः दीर्घायुरप्रतिहतबलवीर्यसमन्वितः
पुत्रपौत्रधनैश्वर्यैर्युक्तो वत्स भवोत्तम ४२ पराशर उवाच ॥

असत्समाचरन्नात्मैवात्मानं हन्ति साधु समाचरन्नात्मैवात्मानं रक्षति चेत्यन्वयः २९ पादयोर्न्यासैर्विदीर्णा क्षता क्षितिर्यया सा तथा ३१ खण्डितं भग्नं सत् पुनर्भूमौ पतितं शतधा गतमिति शेषः ३४ अभ्यवपद्यत रक्षणार्थं तदभिमुखमधावदित्यर्थः ३५ ॥

स्पमस्मत ४२ इति स्वप्रकाशव्याख्यायां प्रथमे षोडशोऽध्यायः १८ सहजं नैसर्गिकं सामान्यं समानः ४ किंच अन्येषां यः पापानि तत्फला
निदुःखानि न चिंतयति तस्य पापागमो दुःखागमो नास्ति ५ यतस्तत्र्यीशकरणमेव बीजं तस्माज्जन्मयस्य तद् शुभे पापं तस्य कर्तुः अपि किं फलति

इत्युक्तास्ततो गत्वा यथावृत्तं गुरोर्हिताः दैत्यराजाय सकलमाचचख्युर्महात्मने ४३ इति श्रीवि० प्र० प्रह्लादचरिते अष्टादशः
१८ पराशर उवाच हिरण्यकशिपुः कृत्यां तां कर्मां वितथीकृताम् आहूय पुत्रं पप्रच्छ प्रभावस्यास्य कारणं १ हिरण्यकशिपुरु०
प्रह्लाद सुप्रभावोऽसि किमेतत्ते विचेष्टितम् एतन्मन्त्रादिजनितमुताहो सहजं तव २ पराशर उवाच एवं पृष्टस्तदा पित्रा प्रह्लादो
सुरबालकः प्रणिपत्य पितुः पादाविदं वचनमब्रवीत् ३ प्रह्लाद उवाच न मे मन्त्रादिकृतं तात न च नैसर्गिकं मम प्रभाव एष सामा
न्यो यस्य यस्याच्युतो हृदि ४ अन्येषां यो न पापानि चिंतयत्यात्मनो यथा तस्य पापागमस्तात हेत्वभावान्न विद्यते ५ कर्मणा मनसा
वाचा परपीडां करोति यः तद्बीजं जन्म फलति प्रभूतं तस्य चाशुभं ६ सोऽहं न पापमिच्छामि न करोमि वदामि वा चिंतयन् सर्वभूत
स्थमात्मन्यपि च केशवम् ७ शारीरं मानसं दुःखं दैवं भूतभवं तथा सर्वत्र शुभचित्तस्य तस्य मे जायते कुतः ८ एवं सर्वेषु भूते
षु भक्तिरव्यभिचारिणी कर्तव्या पंडितैर्ज्ञात्वा सर्वभूतमयं हरिम् ९ पराशर उवाच इति श्रुत्वा स दैत्येंद्रः प्रासादशिखरे स्थित
क्रोधांधकारितमुखः प्राह दैतेयकिंकरान् १० दुरात्मा क्षिप्यतामस्मात्प्रासादाच्छतयोजनात् गिरिपृष्ठे पतत्वस्मिन् शिलाभि
न्नांगसंहतिः ११ ततस्तं चिक्षिपुः सर्वे बालं दैतेयदानवाः पपात सोऽप्यधः क्षिप्तो हृदयेनोद्वहन्हरिम् १२ पतमानं ज
गद्धात्री जगद्धातरि केशवे भक्तियुक्तं दयारं तमुपसंगम्य मेदिनी १३ ॥

दुःखफलात्मना वर्धते ६ एवं सर्वभूतमयं हरिं ज्ञात्वा सर्वेषु भूतेषु नद्भक्तिः कर्तव्या ९ क्रोधेनांधकारितं जातं अंधकारमिव दुःप्रेक्ष्यं मुखं
यस्य सः १० शस्त्रविषाग्निकृत्यादीनां मन्त्रमंत्रादिभिः स्तंभनं संभवति पतने तु न किंचित्स्तंभनीयमाशयेन दैत्यानादिदेश इति दुरात्मा

विष्णुपु १ ३८

वि॰ पु॰
प्र॰ टी॰
५९

बालैरुपायैर्हतेन माया वा त्वत्र हृदये मायाश्चिनं विनियुंक्ते नास्माभिरितिनि सूदय विनाशय १७ सुदर्शनेपुद्धज्ञानमयं १९ श्रयेन मायासहस्रं प्र
त्येकं विनाशितं २० दृश्येपवथोपायेषु प्रतीकारमसौ करोतीत्यहृशवायुंसुयुंक्तेस्माद संशोषकमिति, २१ लघुशीघ्रं लघुरितिप्राठे

ततोविलोक्य तं स्वस्थमवशीर्णास्त्रपंजरम् हिरण्यकशिपुः प्राह शंबरं मायिनां वरम् १४ हिरण्यकशिपुरुवाच नास्मा
भिः शक्यते हंतुमसौ दुर्बुद्धिबालकः मायां वेत्ति भवांस्तस्मान्माययैनं निषूदय १५ शंबर उवाच सूदयाम्येष दैत्येन्द्र पश्य
मायाबलं मम सहस्रमात्रं मायानां पश्य कोटिशतं तथा १६ पराशर उवाच ततः स ससृजे मायां प्रह्लादे शंबरोऽसुरः वि
नाशमिच्छन्दुर्बुद्धिः सर्वत्र समदर्शिनि १७ समाहितमतिर्भूत्वा शौरिं सोऽपि विमत्सरः मैत्रेय सोऽपि प्रह्लादः सस्मार मधुसूद
नम् १८ ततो भगवता तस्य रक्षार्थं चक्रमुत्तमं आजगाम समाज्ञप्तं ज्वालामालीसुदर्शनम् १९ तेन मायासहस्रं तच्छंबर
स्याशुगामिना बालस्य रक्षता देहमेकैकशेन सूदितम् २० संशोषकं तथा वायुं दैत्येन्द्रस्त्विदमब्रवीत् शीघ्रमेष ममादे
शाद्दुरात्मा नीयतां क्षयम् २१ तथेत्युक्त्वा तु सोऽप्येनं विवेश पवनो लघु शीतोऽतिरूक्षः शोषाय तद्देहस्यातिदुःसहः २२
तेनाविष्टमथात्मानं स बुद्ध्वा दैत्यबालकः हृदयेन महात्मानं दधार धरणीधरम् २३ हृदयस्थस्ततस्तस्य तं वायुमतिभीष
णम् पपौ जनार्दनः क्रुद्धः स ययौ पवनः क्षयम् २४ क्षीणासु सर्वमायासु पवने च क्षयं गते जगाम सोऽपि भवनं गुरोरेव
महामतिः २५ अहन्यहन्यथाचार्यो नीतिं राज्यफलप्रदाम् ग्राहयामास तं बालं राज्ञामुशनसा कृताम् २६ गृही
तनीतिशास्त्रं तं विनीतं च यदा गुरुः मेने तदैनं तत्पित्रे कथयामास शिक्षितम् २७ आचार्य उवाच गृहीतनीतिशा
स्त्रस्ते पुत्रो दैत्यपते कृतः प्रह्लादस्तत्त्वतो वेत्ति भार्गवेण यदीरितम् २८ ॥

लघुवात् शीतोतिरूक्षस्तु शीतज्वरप्रायः २२ तेनाविष्टं व्याप्तं धरणीधरं वायुभक्षं शेषस्वरूपम् २३ २८ ॥

त्रिषु कालेषु क्षयवृद्धिस्थानसमयेषु २९ मंत्रिषु बुद्धिसहायेषु अमात्येषु कार्यसहायेषु तदुक्तं मंत्री बुद्धिसहायः स्यात् अमात्यः कार्यसहायकृत् इति बा-
ह्येषु अन्तःपुराधिकृतेषु आभ्यंतरेषु अंतःपुरमहानसाद्यधिकृतेषु हरेषु वा शंकितेषु जितबलाद्दासीकृतेषु भूतेषु इतरेषु असंसर्गिषु च ३० कृत्या-
कृत्यविधानं संधिविग्रहादिषु कर्तव्यं किं कृत्यं कर्तव्यं किम् अकृत्यम् इत्येवं प्रकारः यद्वा कृत्याः शत्रुभिर्भेद्यास्तेषाम् अकृत्यविधानं अभेद्यत्वकरणं दुर्गं प-
र्वतोदकादि अटविकाः महारण्यनिवासिनः पुलिंदम्लेच्छादयस्तेषां साधनं वशीकरणं कंटकाश्चौरा गूढशत्रवो वा तेषां शोधने निरसने ३१ प्र-

हिरण्यकशिपुरुवाच मित्रेषु वर्तेत कथम् अरिवर्गेषु भूपतिः प्रह्लाद त्रिषु कालेषु मध्यस्थेषु कथं चरेत् २९ कथं मंत्रिष्वमात्ये-
षु बाह्येष्वाभ्यंतरेषु च चारेषु पौरवर्गेषु शंकितेष्वितरेषु च ३० कृत्याकृत्यविधानं च दुर्गाटविकसाधनम् प्रह्लाद कथ्यतां सम्य-
क् तथा कंटकशोधनं ३१ एतच्चान्यच्च सकलम् अधीतं भवता यथा तथा मे कथ्यतां ज्ञातुं तवेच्छामि मनोगतम् ३२ पराशर
उवाच प्रणिपत्य पितुः पादौ तदा प्रश्रयभूषणम् प्रह्लादः प्राह दैत्येंद्रं कृतांजलिपुटस्तथा ३३ प्रह्लाद उवाच ममोपदिष्टं स-
कलं गुरुणा नात्र संशयः गृहीतं तु मया किंतु न सदेतन्मतं मम ३४ साम चोपप्रदानं च भेददंडौ तथापरौ उपायाः कथिता
ह्येते मित्रादीनां च साधने ३५ तानेवाहं न पश्यामि मित्रादींस्तात मा क्रुधः साध्याभावे महाबाहो साधनैः किं प्रयोजनं ३६
सर्वभूतात्मके तात जगन्नाथे जगन्मये परमात्मनि गोविंदे मित्रामित्रकथा कुतः ३७ त्वय्यस्ति भगवान्विष्णुर्मयि चान्यत्र चास्ति
सः यतस्ततोयं मित्रं मे शत्रुश्चेति पृथक् कुतः ३८ तदेभिरलमत्यर्थं दुष्टारंभोक्तिविस्तरैः अविद्यांतर्गतैर्यत्नः कर्तव्यस्तात शोभने

सत्त्वसामभेदादि ३२ प्रश्रय एव भूषणं यस्य सः ३३ कुपितस्य पुत्रत्वादिभिः साधनं साम अपेक्षमाणस्य न स्थितानां भयजननादिना नाप्ययकर-
णं भेदः भूमिधनादिसमर्पणम् उपप्रदानं वधोद्वधाताडनादि दंड इत्येते उपायाः ३५ मा क्रुध क्रोधं मा कार्षीः ३६ सर्वभूतात्मके सर्वेषां भूता-
नाम् आत्मनि परमात्मनि सर्वजीवनियंतरि ३७ तदेवाह त्वय्यस्तीति पृथग्भेदः कुतः ३८ दुष्टारंभा द्वेषादिपूर्वकाः ये आरंभा उद्यमास्तेषा-
म् उक्तिविस्तरैः निष्फलैः अलं दुष्टारंभेति पाठे दुष्टारोहिकामोक्षार्थारंभाः शोभने निष्कामे आत्मविद्यायां च ३९ ॥

विपु।
प्र टी।
५०

तन्नवन्नाशुर्वेदोथनवेदोगांधर्वदेवमिति तेनत्र यः श्रयेशास्त्र वनर्थान्कविद्यात्र स्यादशैवतितिस्रतेदंडनीत्यादिकमपिविद्यैवकथमविद्यां नगीतैर्दित्सनेतन्ना।
ह विद्याबुद्धिरितिबाल्ल:।त्वेद्यातमग्निं किंनमन्यतेत्र्यपितमन्यतएवतद्वत् ४- शोभनेयत्न:कर्तव्यइतियदुक्तं तदेव शोभनंकर्मादिकमाह त
त्कर्मेति श्रपरंश्रर्थकामाद्यर्थंकर्म श्रायासायश्रमायैवश्रमाविद्यासर्वशास्त्रादिशल्पनैपुण्यंयेंद्रजालिकादिशिल्पविद्यावत्कौशलमात्रमेव
तच्चफलतादिसर्थः ४१ तदेतद्राज्यादिसाध्यसमारंभंतच्चोत्तान्नाउत्तमंसाधयंयत्नकर्षेणब्रवीमितन्निशामयेत्यन्वय: ४२ किंचराज्यादेश्चे

विद्याबुद्धिरविद्यायामज्ञानान्नातजायते बालोग्निं किंनखद्योतमसुरेश्वरमन्यते ४- तत्कर्मयन्नबंधाय साविद्यायाविमुक्तये आयासा
यापरंकर्मविद्यान्याशिल्पनैपुणम् ४१ तदेतदवगम्याहमसारंसारमुत्तमम् निशामयमहाभागप्रणिपत्यब्रवीमिते ४२ नचिंतय
तिकोराज्यंकोधनंनाभिवांछति तथापिभाव्यमेवैतदुभयंप्राप्यतेनरैः ४३ सर्वएवमहाभागमहत्त्वंप्रतियांतिवा: तथापिपुंसा
भाग्यानिनोद्यमाभूतिहेतवः ४४ जडानामविवेकानामशूराणामपिप्रभो भाग्यभोज्यानिराज्यानिसंत्यनीतिमतामपि ४५
तस्माद्यतेतपुण्येषुयइच्छेन्महतींश्रियम् यतितव्यंसमत्वेचनिर्वाणमपिचेच्छता ४६ देवामनुष्यापशव:पक्षिवृक्षसरीसृपा:
रूपमेतदनंतस्यविष्णोर्भिन्नमिवस्थितम् ४७ एतद्विजानताविश्वंजगत्स्थावरजंगमम् द्रष्टव्यमात्मवद्विष्णुर्यतोयंविश्वरूप
धृक् ४८ एवंज्ञातेसभगवाननादि:परमेश्वरः प्रसीदत्यच्युतस्तस्मिन्प्रसन्नेक्लेशसंक्षय: ४९ पराशरउवाच एतच्छ्रुत्वातुकोपे
नसमुत्थायवरासनात् हिरण्यकशिपु:पुत्रंपदावक्षस्यताडयत् उवाचचसकोपेनसामर्ष:प्रज्वलन्निव निष्पिष्यपाणिनापाणिंह
न्तुकामोजगद्यथा ५१ हिरण्यकशिपुरुवाच हेविप्रचित्तेहेराहोहेवलैषमहार्णवे नागपाशैर्दृढैर्बद्ध्वाक्षिप्यतांमाविलंबथ ५२॥

फलत्वेपितदर्थंउद्यमयत्न:कार्य: नकेवलंहर्षोद्यमममात्रेतस्यव्यभिचारित्वादित्याहनेतित्रिभि: भाव्यंप्राक्तनपुण्यवशादवश्यंभावितव्यमेवतदुभयंराज्यंधनंच
प्राप्यते ४३ महत्त्वंराज्यधनादिविभूतिं यतिभाग्यान्येवभूतेराज्यादेर्हेतव:नतूद्यमा: ४४ तैर्विनापिराज्यादेर्दृश्यमानत्वादित्याहजडानामिति श्रनुद्यमा
नांनष्टानष्टविवेकशून्यानांराज्यानिसंतीति ४६ समत्वहृष्टानिर्वाणमाह देवाइतित्रिभि: ४७ सामर्ष:सहासहत: ५१ श्रयेतावत्सर्वैरुपायैर्नहंतव्यः
कृतेउपेक्षितस्तुसकलंलोकंविस्मृतकंहत्वानाशयेत् श्रतोनागपाशैर्बद्ध्वासमुद्रेक्षिप्यवर्तनैवाक्रमणीय:ततःकालेनमरिष्यतीत्याह

॥ ५० ॥ विष्णुपुराणटीका

५०

दोषोपशांतिर्देत्यबाढ्योऽस्मानामध्युपकारकमथव ५४ करुणालयेसमुद्रेनिवंतवैः पर्वतैस्छीयतांउपर्युपरितिद्यमिम्शक्रमतां ५८ आह्निकवेलायां
मरंरहः कर्तव्यभोजनादिसमये ६३ ब्रह्मण्यानोदेवाय५५हाय ६५ विश्वरूपत्वेनस्तौतिदेवाइतिसप्तभिर्देवाइत्यादीनांसर्वत्वमेवेतितत्तोये।

भूयःयासकलोलोकस्ययांदैत्येयदानवाः अन्नयास्येतिमूर्धस्मतमस्यउवात्मनः ५३ वद्धयोवारितोस्माभिरपेपावस्लयापरे ः स्त
तिकरोतिउष्टानांवधपवोपकारकः ५४ पराशरउवाच ततस्तेसत्वरादैत्यावधात्वानागबन्धनैः भर्तराज्ञोपुरस्कृतविचिह्निपुःसलिलाल
ये ५५ ततश्चचालसवलताप्रह्लादेनमहार्णव। उद्वेलोभूत्परंक्षोभमुपेत्यवसमंततः।५६ भूलोकमखिलंदृष्ट्वाप्लाव्यमानंमहांभसा
हिरण्यकशिपुर्दैत्यानिदमाहमहामते ५७ हिरण्यकशिपुः दैतेयाःसकलैःदैत्यैःअत्रैववरुणालये निश्छिद्रैःपर्वतैःसर्वैः
श्चीयतांमेवउर्मतिः ५८ नाग्निर्दहतिनैवायंशस्त्रैश्छिन्नोनचोरगैः क्षयंनीतोनवातेननविषेणनकृत्यया ५९ नमायाभिर्नचैवोच्चा
त्पातितोनचदिग्गजैः वालोतिउष्टचित्तोयंनानेनार्थोस्तिजीविना ६० तदेषतोयथावत्रसमाक्रांतोमहीधरैः तिष्ठत्वब्दसहस्रांते
प्राणान्हास्यतिउर्मतिः ६१ ततोदैत्यादानवाश्चपर्वतैस्तंमहोदधौ आक्रम्यचयनंचक्रुर्योजनानिसहस्रशः ६२ सचितःपर्वतैरंतः
समुद्रस्यमहामतिः तुष्टावाह्निकवेलायामेकाग्रमतिरच्युतं ६३ प्रह्लादउवाच नमस्तेपुंडरीकाक्षनमस्तेपुरुषोत्तम नमस्ते
सर्वलोकात्मन्नमस्तेतिग्मचक्रिणे ६४ नमोब्रह्मण्यदेवायगोब्राह्मणहिताय च जगद्धिताय कृष्णाय गोविंदाय नमोनमः ६५
ब्रह्मात्वंसृजतेविश्वंस्थितौपालयतेपुनः रुद्ररूपायकल्पांतेनमस्तुभ्यंत्रिमूर्तये ६६ देवायक्षासुराःसिद्धानागागंधर्वकि
न्नराः पिशाचाराक्षसाश्चैवमनुष्यापशवस्तथा ६७ पक्षिणःस्थावराश्चैवपिपीलिकसरीसृपाः भूम्यापोग्निर्नभोवायुःशब्द
स्पर्शास्तथारसः ६८ रूपंगंधोमनोबुद्धिरात्माकालस्तथागुणाः एतेषांपरमार्थंचसर्वमेतत्वमच्युत ६९ विद्याविद्येभवान्सत्य
मसत्यंत्वंविषामृते प्रवृत्तंचनिवृत्तंचकर्मवेदोदितंभवान् ७०॥

नानयःयत्नाश्चासराश्च ६७ आत्माअहंकारःगुणाःसत्वादयःएतेषांपरमार्थतत्वंकारणम् ६९ ७० ॥

ऐश्वर्यं सामर्थ्यातिशयं गुणं श्रुमत्वमेकस्यादीन् सूचयतीत्यैश्वर्यगुणसंसूचिकी तवैव सद्धि रूपस्य व्याप्तिः ७२ अत एव त्वामेव योगिनश्चिंतयंति त्वामेव च याज
का यजंति पितृदेवस्वरूपधृक् त्वमेव हव्यकव्यभुक् ७३ उक्तं प्रपंचितं स्पष्टमनुवदन् शुद्धस्वरूपमाह स्वरूपमिति द्वाभ्यां विश्वरूपं सावरणं ब्रह्मांडं एतज्जगद्रू।
ह्मांडं तदंतर्वर्तिविराड्रूपं रूपं महत्ते स्थितमत्र विश्वमिति पादे तेन महद्रूपं विश्वं ब्रह्मांडं अत्रास्थितं जगदेतन्न तस्य सूक्ष्मं रूपमितरत्वयः ततोपि सूक्ष्माणि रू
पाणि भूतभेदाः जरायुजादिचतुर्विधा देहास्तेषु अंतरात्माख्यं क्षेत्रज्ञसंज्ञमतीव सूक्ष्मरूपं ७४ तस्मादपि परं सूक्ष्मादिविशेषणानामविषयेव
र्तमानं तव किमप्यचिंत्यं रूपमस्ति तस्मै पुरुषोत्तमाख्याय ते रूपाय नमः यस्मात्क्षरमतीतो हमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरु

समस्तकर्मभोक्ता च कर्मोपकरणानि च त्वमेव विष्णो सर्वाणि सर्वकर्मफलं च यत् ७१ मय्यन्यत्र तथाशेषभूतेषु भुवनेषु च तवैव व्या
प्तिरैश्वर्यगुणसंसूचिकी प्रभो ७२ त्वां योगिनश्चिंतयंति त्वां यजंति च यज्विनः हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक् ७३ रू
पं महत्ते स्थितमत्र विश्वं ततश्च सूक्ष्मं जगदेतदीश रूपाणि सर्वाणि च भूतभेदास्तेष्वंतरात्माख्यमतीव सूक्ष्मं ७४ तस्माच्च सूक्ष्मादिविशे
षणानामगोचरे यत्परमात्मरूपम् किमप्यचिंत्यं तव रूपमस्ति तस्मै नमस्ते पुरुषोत्तमाय ७५ सर्वभूतेषु सर्वात्मन्या शक्तिरपरा तव।
गुणाश्रया नमस्तस्यै शाश्वतायै सुरेश्वर ७६ यातीतगोचरा वाचां मनसां चाविशेषणा ज्ञानिज्ञानपरिच्छेद्या तां वंदे चेश्वरीं पराम् ७७॥

षोत्तम इति स्मृते। ७५ नन्वेवं भूतस्य ज्ञातः स्थूलसूक्ष्माद्यनेकरूपत्वमित्याशंक्यात उपपादकं शक्तिद्वयं वर्णयति सर्वभूतेष्विति द्वाभ्यां अपरा जडशक्तिः
प्रकृत्याख्या ७६ वाचां मनसां च यातीतगोचरा अतिक्रांतगोचरा विषयो यया सा यस्मादविशेषणा जातिगुणादिविशेषणशून्या ज्ञानिनोद्वेत्रज्ञानां या
नि शास्त्रादिविषयाणि प्रादेशिकानि ज्ञानानि तैः परिच्छेद्या सर्वत्र प्रसरद्भिर्निरुक्तैरोदकैर्महासरोवत्सर्वगतत्वेन गम्याय द्वा ज्ञानिनो जीवज्ञानेन स्वितडभयम्
पि परिच्छेद्येव घटादिवस्तु का प्रपंचस्य सा तस्या सर्वभासकत्वात् तां ईश्वरीं ईश्वरस्य तत्त्वस्वरूपभूतां परां चिच्छक्तिं वंदे एवं स्वशक्तिविशिष्टे वस्तुपते स्व
भाविकी ज्ञानबलक्रिया चेति श्रुतेः अतएवं भगवान् शक्तिद्वयेनाचिंत्यनिरतिशयैश्वर्यात्कृतं स्थूलसूक्ष्माद्यनेकरूपत्वं च संगच्छत एवेति ७७॥

हार्दगाहारमेवं प्रतिस्थायद्रूपेण प्रणमति ७७ नमस्त्विद्वाभ्यां ७८ नमस्तस्मा इति त्रिभुवनरूपं महदिति श्लोकोक्तं वैतन्यापाधिभूतैर्विश्वरूपजगद्रूपभू
तरूपेण प्रणाम नामरूपं न यस्यैतस्मै नमस्त्यनेकंगाक्षुद्रद्वेत्रजरूपेण एको योस्तित्वेनोपलभ्यते तस्मै महात्मने नमः इति सर्वाणि ब्रह्मरूपेणत्व प्रणाम
इति द्रष्टव्यं ७९ नन्वेवं केवलस्येत्यपरमेश्वरस्य [illegible]हितस्याविषयत्वार्दचनादिकं न घटेतेत्याशंक्याह यस्येति ८० नन्वेवं परमेश्वर[illegible]दर्वतीयस्य
द्रोहादीनां स्वत्ताकथमित्याशंक्यातेषामंतर्यामिस्वरूपेणैव युज्यत इत्याशयेनाह योंतरिति जडस्यापि जगतः परमेश्वरात्मत्वेनापास्यत्वम्।

ओं नमो वासुदेवाय तस्मै भगवते सदा व्यतिरिक्तं न यस्यास्ति व्यतिरिक्तोऽखिलस्य यः ७८ नमस्तस्मै नमस्तस्मै नमस्तस्मै महात्मने
नाम रूपं न यस्यैको योस्तित्वेनोपलभ्यते ७९ यस्यावताररूपाणि समर्चंति दिवौकसः अपश्यंतः परं रूपं नमस्तस्मै महात्मने
८० योंतस्तिष्ठन्नशेषस्य पश्यतीशः शुभाशुभं तं सर्वसाक्षिणं विश्वं नमस्ये परमेश्वरम् ८१ नमोस्तु विष्णवे तस्मै यस्याभिन्नमि
दं जगत् ध्येयः स जगतामाद्यः स प्रसीदतु मेव्ययः ८२ यत्रोतमेतत्प्रोतं च विश्वमक्षरमव्ययं आधारभूतः सर्वस्य स प्रसीदतु मे
हरिः ८३ नमोस्तु विष्णवे तस्मै नमस्तस्मै पुनः पुनः यत्र सर्वं यतः सर्वं यः सर्वं सर्वसंश्रयः ८४ सर्वगत्वादनंतस्य स
एवाहमवस्थितः मत्तः सर्वमहं सर्वं मयि सर्वं सनातने ८५ अहमेवाक्षयो नित्यः परमात्मात्मसंश्रयः ब्रह्मसंज्ञोहमे
वाग्रे तथांते च परः पुमान् ८६ ॥

स्त्विकिं पुनर्देवतानामित्याशयेनाह नमोस्त्विति अभिन्नत्वे हेतुर्जगतामाद्यकारणं
मिति ८२ तदुपपादयन्नाह यत्रेति यस्मिन्प्रोतं विश्वं दीर्घतंतुषु पटवत् ऋजुस्थितं शेतं च तिर्यक् तंतुषु पट इवानुस्यूतमक्षरमव्ययं च प्रधानमह
दादिरूपं ८३ उक्तं सर्वात्मत्वं संक्षेपतः स्मरन्प्रणमति नमः इति यत्र सर्वं प्रलये तस्मै नमः यतः सर्वं सृष्टौ तस्मै नमः यः सर्वं स्थितौ उ
नस्तस्मै नमः अतएव यः सर्वस्य संश्रयः आधारः पुनस्तस्मै नमः इत्येवं नामस्यावस्थावभेदान्नमस्कारावृत्तिः ८४ तदेवं विष्णोर्ब्रह्मात्मतया
सर्वात्मत्वं भावयन्स्वस्यापि ब्रह्मत्वादविर्भावेन तदभेदं प्रपश्यन्नाह सर्वगत्वादिति द्वाभ्यां ८५ अग्रे सृष्टेः पूर्वं अंते च प्रलयानंतरम् ८६ ॥

प्रथमेंऽशे एकोनविंशोऽध्यायः १९ आत्मानं प्रह्लादोऽहमिति विस्मृतवान् २ क्षीणपापस्य ध्वस्तसमस्तकर्मवासनामलस्य ३ त्रुटितं छिन्नं भावोक्तः
४ भ्रान्ता ग्राहगणा यस्मिन् स सोर्मिः ऊर्मिभिः सह वर्तमानः ५ हे परमार्थ त्वां न नूपदेस्वार्थं टपणरूपत्वान्न स्वरूपमत्यंतनिर्मलं परमार्थतः तमे
वार्थस्वरूपेणाभ्रान्तिदर्शनतः स्थितमिति स्वरूपत्वान्न स्थूलं जाग्रत्तदृश्यरूपं कलातीत निरवयव सकल सावयवा ईशानियामक निरंजन निर्लेप ९ गु णां

इति श्री वि॰ प्रथमेंऽशे एकोनविंशोऽध्यायः १९ पराशर उवाच एवं संचिन्तयन्विष्णुमभेदेनात्मनो द्विज तन्मयत्वमवाप्याग्र्यं मेने चा
त्मानमच्युतम् १ विसस्मार तथात्मानं नान्यत्किंचिदजानत अहमेवाव्ययोऽनंतः परमात्मेत्यचिंतयत् २ तस्य तद्भावनायोगात् क्षी
णपापस्य वै क्रमात् शुद्धेऽन्तःकरणे विष्णुस्तस्थौ ज्ञानमयोऽच्युतः ३ योगप्रभावात्प्रह्लादे जाते विष्णुमयेऽसुरे चलत्युरगबंधैस्तैर्मै
त्रेय त्रुटितं क्षणात् ४ भ्रांतग्राहगणः सोर्मिर्ययौ क्षोभं महार्णवः चचाल च मही सर्वा सशैलवनकानना ५ स च तं शैलसंघा
तं दैत्यैर्न्यस्तमथोपरि उत्क्षिप्य तस्मात्सलिलान्निश्चक्राम महामतिः ६ दृष्ट्वा च स जगद्भूयो गगनाद्युपलक्षणम् प्रह्लादोऽस्मीति स
स्मार पुनरात्मानमात्मना ७ तुष्टाव च पुनर्धीमाननादिं पुरुषोत्तमम् एकाग्रमतिरव्यग्रो यतवाक्कायमानसः ८ प्रह्लाद उवा
च ओं नमः परमार्थार्थ स्थूलसूक्ष्म क्षराक्षर व्यक्ताव्यक्त कलातीत सकलेश निरंजन ९ गुणांजन गुणाधार निर्गुणात्मन्गुण
स्थिर मूर्तामूर्त महामूर्ते सूक्ष्ममूर्ते स्फुटास्फुट १० करालसौम्यरूपात्मन्विद्याविद्यामयाच्युत सदसद्रूप सद्भाव सदसद्भाव
भावन ११ नित्यानित्यप्रपंचात्मन्निष्प्रपंचामलाश्रित एकानेक नमस्तुभ्यं वासुदेवादिकारण १२ ॥

णांजन क्लिष्टसत्त्वाप्रकाशाभ्यामञ्जयतीति तथा गुणानां मायागुणेषु स्थिर पश्चात् स्थितेति निपाठे परमव्यक्तेन रूपेण स्थितेत्यर्थः भक्तानां स्फुटश्चान्येषामस्फु
टः १० करालसौम्यरूपात्मन् सदसद्रूपयोः कार्यकारणयोः सद्भाव उत्पत्तिर्यस्मात् ज्ञाने वेद च सदसद्भावौ भावयति यास्यतीति तथा ११ अमलैर्ज्ञानिभि
राश्रित परमार्थत्वादि घात्रिकारणं संबोधने पुनर्भ्यं नमः इत्यनुषंगेन शेषे कं वा समाप्तिः कर्तव्या १२ ॥

सर्वेषां भूतानां यः प्रकटप्रकाशश्चिद्रूपत्वात् अविश्वहेतोः सर्वकारणव्यतिरिक्तत्वात् १३ तस्मिन् हरावेवं चेतो यस्य १४ विष्णवे इति सेत्यर्थः १५
अवलोकनं कृपया दर्शनं तत्प्रदानेन १६ हे अच्युत त्वयि मे अच्युता अप्रकोतिकी भक्तिरस्तु एकांतपरमभक्तिं प्रीत्या र्थीनेति ततो प्रीतिं प्रार्थयते

यः स्थूलसूक्ष्मः प्रकटः प्रकाशो यः सर्वभूतो न च सर्वभूतः विश्वं यतश्चैतदविश्वहेतोर्नमोऽस्तु तस्मै पुरुषोत्तमाय १३ पराशर
उवाच तस्य तच्चेतसो देवस्तुतिमित्थं प्रकुर्वतः आविर्बभूव भगवान्पीतांबरधरो हरिः १४ ससंभ्रमस्तमालोक्य समुत्थायाकु।
लाक्षरम् नमोऽस्तु विष्णवेत्येतद्व्याजहारासकृद्द्विज १५ प्रह्लाद उवाच देव प्रपन्नार्तिहर प्रसादं कुरु केशव अवलोकनदाने
न भूयो मां पावयाच्युत १६ श्रीभगवानुवाच कुर्वतस्ते प्रसन्नोऽहं भक्तिमव्यभिचारिणीम् यथाभिलषितो मत्तः प्रह्लाद व्रिय।
तां वरः १७ प्रह्लाद उवाच नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि १८ या प्रीतिरवि
वेकानां विषयेष्वनपायिनी त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु १९ श्रीभगवानुवाच मयि भक्तिस्तवास्त्येव भूयोऽप्येवं
भविष्यति वरस्तु मत्तः प्रह्लाद व्रियतां यस्तवेप्सितः २० प्रह्लाद उवाच मयि द्वेषानुबंधोऽभूत्संस्तुतावुद्यते तव मत्पितुस्तत्
कृतं पापं देव तस्य प्रणश्यतु २१ शस्त्राणि पातितान्यंगे क्षिप्तो यच्चाग्निसंहतौ दंशितश्चोरगैर्दत्तं यद्विषं मम भोजने २२ ब
द्ध्वा समुद्रे यत्क्षिप्तो यच्चितोऽस्मि शिलोच्चयैः अन्यानि चाप्यसाधूनि यानि पित्रा कृतानि मे २३ त्वयि भक्तिमतो द्वेषादघं तत्संभवं
च यत् त्वत्प्रसादात्प्रभो सद्यस्तेन मुच्येत मे पिता २४ श्रीभगवानुवाच प्रह्लाद सर्वमेतत्ते मत्प्रसादाद्भविष्यति अन्यच्च ते
वरं ददामि व्रियतामसुरात्मज २५ प्रह्लाद उवाच कृतकृत्योऽस्मि भगवन्वरेणानेन यत्त्वयि भवित्री त्वत्प्रसादेन भक्तिरव्यभिचा
रिणी २६ धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि २७

येति यादृशी प्रीतिर्विषयेषु अससज्ञानां सा तादृशी प्रीतिर्मे हृदयान्माऽपसर्पतु मा अपयातु हृदये सदास्त्वित्यर्थः यद्वा हे मा पल लक्ष्मीपते सा
विषयप्रीतिस्त्वामनुस्मरतो मे हृदयादपसर्पतु निर्गच्छतु ततस्त्वत्प्रीत्यास मोक्षदं तत्स्मरणयोगादित्यर्थः १८ शिलोच्चयैः पर्वतैश्चितोऽस्मि २३

वैसवानभावदर्शी नास्तीति मामसत्तदा तस्मिन्नभवत् ३१ पुनश्च कालांतरे ब्रह्मणा यवणान उद्भूतेन विलुंठ्यमानेति क्रोधात् तेन देन मयत्नेन पितरि नव
सिंहस्वरूपेण विष्णुना उपरतिं नीते प्रह्लादो दैत्यानां पतिरभूत् ३२ राज्यद्युतिं राज्यलक्ष्मीं कर्मशुद्धिकरीं प्राप्य ३३ क्षीणाधिकारभोगो
क्षीणप्रारब्धकर्मा तत्ता नानापूर्वी त्रवे: पुण्यपापविवर्जितः पूर्वसर्वकर्मविनाशादस्मेषा चोक्तत्रेयं तत्सहृतडक्षतेविपुनु तदस्मादिक्षतेनदर्यिग
मेउत्तरपूर्वांह्यपोरक्षेषविनाशीतद्धापदेशादितिन्यायाच्च ३४ अहोरात्रे निरंतरं यत्कृतं पापं तत्सर्वं कृष्णएव त्रेवविशेषेण सवासनं श्रयोहति

श्रीभगवानुवाच यथा ते निश्चलं चेतो मयि भक्तिसमन्वितं तथा त्वं मत्प्रसादेन निर्वाणं परमाप्स्यसि २८ पराशर उवाच इत्युक्त्वां
तर्दधे विष्णुस्तस्य मैत्रेय पश्यतः सचापि पुनरागम्य ववंदे चरणौ पितुः २९ तं पिता मूर्ध्न्युपाघ्राय परिष्वज्य च पीडितम् जीवसी
त्याह वत्सेति बाष्पार्द्रनयनो द्विज ३० प्रीतिमांश्चाभवत्तस्मिन्ननुतापी महासुरः गुरुपत्न्यश्च कारैवं शुश्रूषां सोपि धर्मवित् ३१
पितर्युपरतिं नीते नरसिंहस्वरूपिणा विष्णुना सोपि दैत्यानां मैत्रेयाभूत्पतिस्ततः ३२ ततो राज्यद्युतिं प्राप्य कर्मशुद्धिकरीं
द्विज पुत्रपौत्रांश्च सुबहूनवाप्यैश्वर्यमेव च ३३ क्षीणाधिकारः स यदा पुण्यपापविवर्जितः तदा स भगवद्ध्यानात्परं निर्वाणमा
प्तवान् ३४ एवं प्रभावो दैत्योसौ मैत्रेयासीन्महामतिः प्रह्लादो भगवद्भक्तो यं त्वं माम् अनुपृच्छसि ३५ यस्त्वेतच्चरितं तस्य
प्रह्लादस्य महात्मनः शृणोति तस्य पापानि सद्यो गच्छन्ति संक्षयम् ३६ अहोरात्रकृतं पापं प्रह्लादचरितं नरः शृण्वन्पठंश्च
मैत्रेय व्यपोहति न संशयः ३७ पौर्णमास्याममावास्यामष्टम्या[illegible]मथवा पठन् द्वादश्यां वा तदाप्नोति गोप्रदानफलं द्विज
३८ प्रह्लादं सकलापत्सु यथा रक्षितवान्हरिः तथा रक्षति यस्तस्य शृणोति चरितं सदा ३९ इति वि॰ पु॰ विंशोध्यायः २०

तिथ्यन्तरे तन्नसंपूर्णफलत्वापत्तिरित्याशयेनैकदेशश्रवणाया फलोक्तिः ३७ अमावास्यायामित्यर्थः गोः प्रधानं प्रकर्षेण दानेन कृतं तद्वे स्तर्य
शरणेऽत्र विदेशभयतामुख्याः स्वर्णशृंगादिसंपूर्णदक्षिणादिसकलादिसकलांगकलापेन यथावद्दाने यत्फलं तत्फलमेतच्चरितं संपठ
न्नेव प्राप्नोतीत्यर्थः ३८ सदा श्रवणस्य फलमाह प्रह्लादमिति ३९ करुणं वरणानम्रेक्षकरुणं प्रणतकुहि प्रह्लादवरदं देवेदेनंदसिंहं नृणामीष

प्रह्लादिः प्रह्लादस्य पुत्रः १ बाणो ज्येष्ठो यस्मिन् २ एवं तावद्दितेर्दितेष्ववंशमुक्त्वा इदानीं क्रमप्राप्तानाम् तासां कश्यपभार्याणां वंशान्वक्तुं
दनोर्वंशमाह अभवन्निति सार्धैर्नवभिः ५ एते प्रख्याता इति विशेषणेन हि विशेषमस्यादिशद्दनोः सुत एव तैर्गणिता वैश्वानरश्च हयशिराः सुता
शर्मिष्ठा वृषपर्वण कन्या ६ उपदानवी च हयशिराश्च तस्यैव कन्ये इति केचित् अन्ये दीये इत्यन्ये वैश्वानरसुतायाश्च तस्याश्च रुद्रर्शना: उप

पराशर उवाच संह्रादपुत्र आयुष्माञ्छिबिर्बाष्कलमेव च विरोचनस्तु प्राह्लादिर्बलिर्जज्ञे विरोचनात् १ बलेः पुत्रशतं त्वासीद्बाण
ज्येष्ठं महामुने हिरण्याक्षसुताश्चासन्सर्व एव महाबलाः २ झर्झरः शकुनिश्चैव भूतसंतापनस्तथा महानाभो महाबाहुस्तारकश्च
महाबलः ३ अभवन्दनुपुत्राश्च द्विमूर्धा शंकरस्तथा अयोमुखः शंकुशिराः कपिलः शंबरस्तथा ४ एकचक्रो महाबाहुस्तारकश्च
महाबलः स्वर्भानुर्वृषपर्वा च पुलोमा च महाबलः ५ एते दनोः सुताः ख्याताः विप्रचित्तिश्च वीर्यवान् स्वर्भानोस्तु प्रभा कन्या शर्मि
ष्ठा वार्षपर्वणी ६ उपदानवी हयशिराः प्रख्याता वरकन्यकाः वैश्वानरसुते चोभे पुलोमा कालका तथा ७ उभे सुते महाभागे
मारीचस्तु परिग्रहः ताभ्यां पुत्रसहस्राणि षष्टिर्दानवसत्तमाः ८ पौलोमाः कालकेयाश्च मारीचितनयाः स्मृताः ततोऽपरे महा
वीर्या दारुणास्त्वतिनिर्घृणाः ९ सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तथा व्यंशः शल्यश्च बलवान्नभश्चैव महाबलः १०
वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा अञ्जिको नरकश्चैव कालनाभस्तथैव च ११ स्वर्भानुश्च महावीर्यो वक्त्रयोधी महा
सुरः एते ते दानवाः श्रेष्ठा दनुवंशविवर्धनाः १२ एतेषां पुत्रपौत्राश्च शतशोऽथ सहस्रशः प्रह्लादस्य तु दैत्यस्य निवातकवचाः कु
ले १३ समुत्पन्नाः सुमहता तपसा भावितात्मनः षट् सुताः सुमहासत्त्वास्ताम्रायाः परिकीर्तिताः १४ शुकी श्येनी च भासी च
सुग्रीवी शुचिगृध्रिका शुकी शुकानजनयदुलूकी प्रत्युलूककान् १५ ॥

दानवी हयशिराः पुलोमा कालका तथेति भागव
तायुक्ते ७ मारीचेः कश्यपस्य परिग्रहो भार्या सिंहिकायां हिरण्यकशिपोर्भगिन्यां विप्रचित्तेर्दनुसुतात् १० सिंहावलोकनेन पुन
राह प्रह्लादस्येति भावितात्मनः प्रह्लादस्येत्यन्वयः १३ ताम्राया वंशमाह षडिति त्रिभिः सुताः कन्याः १४ तामेवाह शुकीति सुग्रीवी

नपुंसकत्वं कौसंज्ञासु त्यायनिर्दिष्टत्वात् शुकी शुकान् ततनय उलूकी प्रसूत उलूककानिति मान्योक्तेः श्येन्यौ शुच्यौदकानशुचिरेवशुचीसाम्यौदकान्
जलजान्पक्षिगणान्नवजायत सुग्रीवीतत्पुत्रादीन्यजायतेत्यन्वयः १६ ताम्रायावंशप्रकीर्तितइत्युपसंहरति १७ गरुडं विपिनं इति सुपर्णाइ
तिपततां पक्षिणां श्रेष्ठः सुरसायां सहस्रं जज्ञे इति शेषः १८ कद्रूवंशमाह काद्रवेया इति द्वाभ्यां १९ नैकमस्तका अनेकफणाः २० क्रोधव
शायावंशमाह गणमिति क्रोधवशं गणं क्रोधवशायाजातं विद्धीत्यर्थः २१ तज्जगणस्थान्विधिनत्रिशिने सर्वे दंष्ट्रिणः राक्षसाः सपोश्वरदीग

श्येनी श्येनांस्तथा भासी भासानप्यथ गृध्र्यपि शुच्यौदकान्पक्षिगणान्सुग्रीवी तु व्यजायत १६ अश्वानुष्ट्रान्गर्दभांश्च ताम्रावंशः
प्रकीर्तितः विनतायास्तु द्वौ पुत्रौ विख्यातौ गरुडारुणौ १७ सुपर्णः पततां श्रेष्ठो दारुणः पन्नगाशनः सुरसायां सहस्रं तु सर्पाणाम
मितौजसां अनेकशिरसां ब्रह्मन्खेचराणां महात्मनाम् काद्रवेयास्तु बलिनः सहस्रममितौजसः १८ सुपर्णवशगा ब्रह्मञ्जज्ञि
रे नैकमस्तकाः तेषां प्रधानभूतास्तु शेषवासुकितक्षकाः २० शंखश्वेतो महापद्मः कंबलाश्वतरौ तथा एलापत्रस्तथा नागः का
र्कोटकधनंजयौ २१ एते चान्ये च बहवो दंदशूका विषोल्बणाः गणं क्रोधवशं विद्धि तस्याः सर्वे च दंष्ट्रिणः २२ स्थलजाः पक्षिणोऽब्जा
श्च दारुणाः पिशिताशिनः क्रोधा तु जनयामास पिशाचांश्च महाबलान् २३ गास्तु वै जनयामास सुरभिर्महिषीस्तथा इरा वृ
क्षलतावल्लीस्तृणजातीश्च सर्वशः २४ खसा तु यक्षरक्षांसि मुनिरप्सरसस्तथा अरिष्टा तु महासत्त्वान्गंधर्वान्समजीजनत् २५
एते कश्यपदायादाः कीर्तिताः स्थाणुजंगमाः तेषां पुत्राश्च पौत्राश्च प्रपौत्राश्च सहस्रशः २६ एष मन्वंतरे सर्गो ब्रह्मन्स्वारोचि
षे स्मृतः वैवस्वते च महति वारुणे वितते क्रतौ २७ ॥

णं क्रोधवशाख्यं गणं समजीजनत् दंष्ट्रिणो नियतं तेषां भीमसेनान्वयं गणमिति मत्स्योक्तेः बलो गणः क्रोधवशाद्दीर्घ इति भागवतोक्तेश्च
२२ स्थलजाश्च पक्षाश्च जलजाश्च मांसाशिनो दारुणाः पक्षिणस्तस्या जाताना इत्यपि तं विद्धीत्यन्वयः २३ सुरभेरिरायाः खसायाः मुनेर
रिष्टायाश्च पंचानां वंशानाह गास्त्विति द्वाभ्याम् २४ वैवस्वते च महति मन्वंतरे वारुणे वरुणकर्तृके २७ ॥

मन्वंतरे पूर्वमन्वंतरे तमन्तान्देवान्सप्तर्षीन्गंधर्वांश्च पितामहो ब्रह्मा अत्र च वै प्रजासर्गाधिकारे कल्पयामास नत्वन्यान्मन्वंतरे तत्रयजेष्वा एतनान् पितृत्वेक
ल्पयामास इति पाठे गंधर्वादीनां पितृत्वेन तत्सृष्टौ मत्स्यमुक्तेरन्यथा स्वतः कश्यपादिभ्यो देवदानवादयः पूर्वं जातावैवस्वतमन्वंतरे तन्मरुद्भ्यो पि जाता इत्य
क्तो भवति २७ एकोनपंचाशन्मरुतो देवास्तथा दितेः पुत्रा बभूवुरिति कथापूर्वकमाह दितिरित्यादिना यावत्समाप्ति ३० छेदयामास प्रलोभितवान्
३१ समाहिता शुचिः विस्मृत्यानवधानतः प्रसुप्तवती शौचवती सती शरच्छतं वर्षशतं यदि गर्भं धारयिष्यसि तर्हि तव पुत्रः शक्रं हनिष्यतीत्यर्थः शौचादिनियमं वेत्स्य

जत्कृत्वा तु स ब्रह्मणोऽपि वै प्रजासर्गे इहोच्यते पूर्वं यत्र तु सप्तर्षीन्स्वयं त्वन्यान्समानसान् २८ पितृत्वे कल्पयामास स्वयमेव पितामहः।
गंधर्वभोगिदेवानां दानवानां च सत्तम २९ दितिर्विनष्टपुत्रा वै तोषयामास कश्यपम् तयाचाराधितः सम्यक् कश्यपस्तपतां वरः।
३० वरेणच्छंदयामास सा च वव्रे ततो वरम् पुत्रमिंद्रवधार्थाय समर्थममितौजसं सचतस्मै वरं प्रादाद् भार्यायै मुनिसत्तमः दत्वा च।
वरमत्युग्रं कश्यपस्तामुवाच ह ३२ शक्रं पुत्रो निहंता ते यदि गर्भं शरच्छतम् समाहिता तिप्रयत्ना शुचिनी धारयिष्यसि ३३ इ
त्येवमुक्त्वा तां देवीं संगतः कश्यपो मुनिः दधार सा च तं गर्भं सम्यक्शौचसमन्विता ३४ गर्भमात्मवधार्थाय ज्ञात्वा तं मघवानपि
शुश्रूषितुमथागच्छद्विनयादमराधिप। ३५ तस्यास्त्वेवांतरं प्रेप्सुरतिष्ठत्पाकशासनः ऊने वर्षशते चास्याददर्शांतरमात्मना ३६
अकृत्वा पादयोः शौचं दितिः शयनमाविशत् निद्रामाहारयामास तस्याः कुक्षिं प्रविश्य सः ३७ वज्रपाणिर्महागर्भं तं चिच्छेदाथ
सप्तधा सम्पीड्यमानो वज्रेण प्ररुरोदातिदारुणम् ३८ मा रोदीरिति तं शक्रः पुनः पुनरभाषत सोऽभवत्सप्तधा गर्भस्तमिंद्रः कुपि
तः पुनः ३९ ॥ ॥

तव विस्मृत्यानवधानतः छिन्नापादे वर्वंशु परमत्र पुत्रो भविष्यतीति गूढोभिप्रायः शौचादिनियमास्त्वमात्स्ये प्रोक्ताः संध्यायां नैव भोक्तव्यं गर्भिण्या वर
वर्णिनी नस्नातव्यं न भोक्तव्यं वृक्षमूलेषु सर्वदा वर्जयेत्कलहं लोके गात्रभंगं तथैव च नोन्मुक्तकेशी तिष्ठेच्च नाशुचिः स्यात्कदाचन त्याद्याभाग
वते च नहिंस्यात्सर्वभूतानि न शपेन्नानृतं वदेदित्याद्याः ३३ अंतरं प्रेप्सुः शौचादिसूत्रं कालं छिद्रं चः ३६ अंतरमेवाह अकृत्वेति स्वाहारया

वि॰ पु॰
प्र॰ टी॰
९२

यदुक्तंमेरोदीतितेनमरुतोभवन्तित्यनेनसाम्यान्निरुक्तिः वज्रोपलक्षितःपाणिर्वज्रपाणिः सोऽस्मीतिवज्रपाणौतस्यवीर्यादिप्रश्नेइतिनिश्चयः यथ
५१ इतिश्रीसप्तकाण्डव्याख्यायांएकविंशोऽध्यायः २१ एवंनावेहेवादीनांसृष्टिरुक्ताइदानींतन्नदधिपकथनमुखेनविभोर्विभूतीर्वक्तुमाह यदेत्या

एकैकंसप्तधावक्केवज्रेणाविविदारिणा मरुतोनामदेवास्तेबभूवुरतिवेगिनः ५० यदुक्तंवैमघवतातेनैवमरुतोभवत् दे
वायकोनपंचाशन्महायावज्रपाणिनः ५१ इतिश्रीवि-प्रथमेंशेदैत्यवंशकथनंनामएकविंशः २१ पराशरउवाच यदाभि
षिक्तःसपृथुःपूर्वंराज्येमहर्षिभिः ततःक्रमेणराज्यानिददौलोकपितामहः १ नक्षत्रग्रहविप्राणांवीरुधांचाप्यशेषतः सो
मंराज्येदधद्ब्रह्मायज्ञानांतपसामपि २ राज्ञांवैश्रवणंराज्येजलानांवरुणंतथा आदित्यानांपतिंविष्णुंवसूनामथपावकं ३
प्रजापतीनांदक्षंतुवासवंमरुतामपि दैत्यानांदानवानांचप्रह्लादमधिपंददौ ४ पितॄणांधर्मराजंतंयमंराज्येऽभ्यषेचयत् ऐरा
वतंगजेन्द्राणामशेषाणांपतिंददौ ५ पतत्रिणांतुगरुडंदेवानामपिवासवम् उच्चैःश्रवसमश्वानांवृषभंतुगवामपि ६ शेषंतु
नागराजानंमृगाणांसिंहमीश्वरं वनस्पतीनांराजानंप्लक्षमेवाभ्यषेचयत् ७ एवंविभज्यराज्यानिदिशांपालाननन्तरम्
प्रजापतिपतिर्ब्रह्मास्थापयामाससर्वतः ८ पूर्वस्यांदिशिराजानंवैराजस्यप्रजापतेः दिशःपालंसुधन्वानंसुतंवैसोऽभ्यषेचयत्
९ दक्षिणस्यांदिशितथाकर्दमस्यप्रजापतेः पुत्रंशंखपदंनामराजानंसोऽभ्यषेचयत् १० पश्चिमस्यांदिशितथारजसःपुत्रमच्यु
तम् केतुमंतंमहात्मानंराजानंसोऽभ्यषेचयत् ११ तथाहिरण्यरोमाणंपर्जन्यस्यप्रजापते उदीच्यांदिशिदुर्धर्षंराजानमभ्यषेचय
त् १२॥

दिलापावत्समाप्ति १ नक्षत्रादीनांतपोंतानांराज्येसोममदधात् २ राज्ञोराज्येवैश्रवणंकुबेरमदधात्दिसन्तर्षिगः ३ मरुतोदितिपुत्राणांवासव
मधिपंददौ ४ अन्येषामपिदेवानांवासवमेवददौ ६ सिंहमीश्वरंपतिं ७ दिशांपालानदिक्पालकान् ८ अच्युतमितिकेतुमतोविशेषणं ११ प

॥ २२ ॥ पृथुराज्याभिषेके

९२

उक्तानामनुक्तानां च तत्तत्पतीनां भगवद्विभूतित्वमाह एतदिति सार्द्धैः पंचभिः स्थितौ प्रवृत्तस्य विष्णोर्विभूतिभूताः १४ तत्र हेतुर्न हीति १९ स्थित एव स्थितस्य ब्रह्मादिकर्तृत्वं सर्वमेवाह सृजत्येष इति २० तदेवं सृष्ट्यादिकर्तृत्वेन चतुर्धापि विभजति चतुर्विभाग इत्यष्टभिः संसृष्टौ सम्यक्सृष्टौ च तत्

तिर्यञ्चः पृथिवी सर्वा सद्वीपा सपर्वता यथाप्रदेशमद्यापि धर्मतः परिपाल्यते १३ एते सर्वे प्रवृत्तस्य स्थितौ विष्णोर्महात्मनः वि
भूतिभूता राजानो ये चान्ये मुनिसत्तम १४ ये भविष्यन्ति ये भूताः सर्वभूतेश्वरा द्विज ते सर्वे सर्वभूतस्य विष्णोरंशा द्विजोत्तम १५
ये तु देवाधिपतयो ये च दैत्याधिपास्तथा दानवानां च ये नाथा ये नाथाः पिशिताशिनां १६ पशूनां ये च पतयः पतयो ये च पक्षिणां
मनुष्याणां च सर्पाणां नागानां वाधिपाश्च ये १७ वृक्षाणां पर्वतानां च ग्रहाणां चापि येऽधिपाः अतीता वर्तमानाश्च ये भविष्यन्ति चापरे १८
ते सर्वे सर्वभूतस्य विष्णोरंशसमुद्भवाः न हि पालनसामर्थ्यमृते सर्वेश्वरं हरिम् १९ स्थितं स्थितौ महाप्राज्ञ भवत्यन्यस्य कस्य
चित् सृजत्येष जगत्सृष्टौ स्थितौ पाति सनातनः २० हन्ति चैवान्तकत्वे च रजःसत्त्वादिसंश्रयः चतुर्विभागः संसृष्टौ चतुर्धा संस्थि
तः स्थितौ २१ प्रलयं च करोत्यन्ते चतुर्भेदो जनार्दनः एकेनांशेन ब्रह्मासौ भवत्यव्यक्तमूर्तिमान् २२ मरीचिमिश्राः पतयः प्रजानाम
न्यभागतः कालस्तृतीयस्तस्यांशः सर्वभूतानि चापरः २३ इत्थं चतुर्धा संसृष्टौ वर्ततेऽसौ रजोगुणः एकांशेनास्थितो विष्णुः
करोति प्रतिपालनम् २४ मन्वादिरूपश्चान्येन कालरूपोऽपरेण च सर्वभूतेषु चान्येन संस्थितः कुरुते स्थितिम् २५ सत्त्वं गुणं समा
श्रित्य जगतः पुरुषोत्तमः आश्रित्य तमसो वृत्तिमन्तकाले तथा पुनः २६ रुद्रस्वरूपो भगवानेकांशेन भवत्यजः अग्न्यन्तकादि
रूपेण भागेनान्येन वर्तते २७ कालस्वरूपो भागोऽन्यः सर्वभूतानि चापरः विनाशं कुर्वतस्तस्य चतुर्धैवं महात्मनः २८ विभागक
ल्पना ब्रह्मन् कथ्यते सार्वकालिकी ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः २९ विभूतयो हरेरेता जगतः सृष्टिहेतवः विष्णुर्म
न्वादयः कालः सर्वभूतानि च द्विज ३० स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः रुद्रः कालोऽन्तकाद्याश्च समस्ताश्चैव जन्तवः ३१ ॥

र्विभागस्त्रिविकविन्याठः २१ रज एव गुणो यस्य स एव रजोगुणः २४ एतच्च ब्रह्मादयो दयो हरेरेव विभूतय इत्याह ब्रह्मेति त्रिभिः सार्वका

ब्रह्मादिभगवद्विभूतीनां कालभेदेन स्वरूपमाह जगदादाविति द्वाभ्यां ३२ कालाख्यविभूतेस्तु सर्वदा सृष्टिरिति भिन्नत्वमाह नकालेनेति ३४ एतेदेव
स्थितिप्रलययोरप्यतिदिशति एवमेवेति ३५ उत्पाद्यत्वप्रपालनीयत्वप्रलयत्वमेव सृज्यमात्रोपलक्षणमिति दर्शयन्नाह यत्किंचिदिति सृज्यजातेनैव
प्राणिमात्रेण पालनेऽप्येतदुक्तं द्रष्टव्यं ३६ उक्तं ब्रह्मादीनां विभूतिविभूतित्वमुपसंहरन्नाह एवमिति द्वाभ्यां ३७ गुणप्रवृत्त्या गुणानां क्षोभेण त्रि
विधः ब्रह्मादिरूपस्रष्टादौ संप्रवर्तते ३५ तस्य तत्परमं पदं चतुर्गुणे गुणो महत् तत्पूर्णं तत्स्वरूपप्राप्ति प्रकारायदेष्यार्थं चातुर्विध्यमयद्विपति यच्चेति

चतुर्धा प्रलयायैता जनार्दनविभूतयः जगदादौ तथा मध्ये सृष्टिराप्रलयाद्द्विज ३२ धात्रा मरीचिमिश्रैश्च क्रियते जन्तुभिस्तथा ब्रह्मा स
ज्जत्यादिकाले मरीचिप्रमुखास्ततः ३३ उत्पादयन्त्यपत्यानि जन्तवश्च प्रतिक्षणम् कालेन न विना ब्रह्मा सृष्टिनिष्पादको द्विज ३४ न प्र
जापतयः सर्वे न चैवाखिलजन्तवः एवमेव विभागोऽयं स्थितावप्युपदिश्यते ३५ चतुर्धा देवदेवस्य मैत्रेय प्रलये तथा यत्किंचित्सृज्य
ते येन सत्त्वजातेन वै द्विज ३६ तस्य सृज्यस्य संभूतौ तत्सर्वं वै हरेस्तनुः हन्ति यावच्च यत्किंचित्सत्त्वं स्थावरजंगमम् ३७ जनार्दनस्य तद्रौ
द्रं मैत्रेयान्तकरं वपुः एवमेव जगत्स्रष्टा जगत्पाता तथा जगत् ३८ जगद्भक्षयिता चेशः समस्तस्य जनार्दनः सर्गस्थित्यन्तकालेषु
त्रिधैवं संप्रवर्तते ३९ गुणप्रवृत्त्या परमं पदं तस्यागुणं महत् यच्चज्ञानमयं व्यापि स्वसंवेद्यमनौपमं ४० चतुष्प्रकारं तदपि स्वरूपं प
रमात्मनः मैत्रेय उवाच चतुष्प्रकारतां तस्य ब्रह्मभूतस्य हे मुने ममाचक्ष्व यथान्यायं यदुक्तं परमं पदम् ४१ पराशर उवाच
मैत्रेय कारणं प्रोक्तं साधनं सर्ववस्तुषु साध्यं च वस्त्वभिमतं यत्साधयितुमात्मनः ४२ योगिनो मुक्तिकामस्य प्राणायामादि सा
धनं साध्यं च परमं ब्रह्म पुनर्नावर्तते यतः ४३ साधनालम्बनं ज्ञानं मुक्तये योगिनो हि तत् स भेदः प्रथमस्तस्य ब्रह्मभूतस्य वै मुने ४४

अगुणस्य ज्ञानस्य निर्भेदत्वात्कथं चातुर्विध्यमिति पृच्छति चतुष्प्रकारतामिति ४१ निर्गुणब्रह्मप्राप्तेः प्रागेव तत्प्राप्त्युपायभूतसाधनाद्यालम्बन
मनोवृत्त्याभिव्यंग्यावस्थाभेदात् ज्ञानस्य चातुर्विध्येन स्वरूपेणेति वक्तुमाह मैत्रेयेत्यष्टभिः सर्वेष्वपि वस्तुषु यत्कारणं तत्साधनं प्रोक्तमित्य
न्वयः ४२ प्रस्तुते च मुक्तिकामस्य योगिनो मुक्तेः साधनं देहात्मविवेकरूपं त्वंपदार्थशुद्धिं विना मुक्त्यसंभवात् साध्यं च तत्पदलक्ष्यं परमं
ब्रह्म नित्यमुक्तात्मकत्वात् ४३ ततः किमत आह साधनेति साधने देहात्मविवेके न तत्पदार्थशुद्धिः तदालम्बनं शुद्धत्वंपदार्थविषयं ज्ञानं स प्रथम

क्लेशमुक्त्यर्थं प्रयुंजतः योगमभ्यस्यतो योगिनो यत्साध्यं ब्रह्म तद्विषयं सच्चिदानंदं ब्रह्मेति तत्पदलक्ष्यार्थस्य विशेषेण ज्ञानं द्वितीयो योगः ५५ उभयो।
स्तु विभागेन परस्मै वै केनब्रह्मैवाहं ब्रह्मैव ब्रह्मेति विशिष्टैय च ज्ञानं सोन्यस्तृतीयो भागो मयोदितः ५६ एतस्य त्वंपदार्थेन तदेकविषयस्य यो विशे
षः देहादिविलक्षणोहमिति सच्चिदानंदरूपं ब्रह्मेति ब्रह्माहमिति यस्तत्र तत्र विशेषणस्य निराकरणेन परित्यागः तद्वारेणादर्शितेय च्चतन्तदेका।
कारे समाध्यवस्थस्येवि स्नो ज्ञानमयस्य परमपदाख्यं ज्ञानं च तुर्यमुक्तमिति तृतीयेनान्वयः ५७ तदेव द्वादशभिः पद्यैर्विशिनष्टि निर्व्यापारेत्या नादिसर्व
व्यापारशून्यं चनतय व अनाख्येयं निर्देशानर्हं किं च व्याप्तिमात्रं मनसा ब्रह्माकारतामात्ररूपं अनौपमं तद्रूपमं सर्वज्ञानविज्ञानविलक्षणत्वात्
तदेवाह आत्मनः संबोधः प्रकाशस्तद्विषयं स्वप्रकाशमित्यर्थः तच्चापि सत्तामात्रं आत्मस्वरूपभूतसत्तामात्रं नानेदादिविशेषशून्यं तत्र हेतुः अ
लक्षणं लक्ष्यते येनेति लक्षणं मनोवृत्तिस्तद्रहितं तदुक्तं योगप्रदीपे मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः यासंप्रज्ञातनामासौ स

युंजतः क्लेशमुक्त्यर्थं साध्यं यद्ब्रह्म योगिनः तदालंबनविज्ञानं द्वितीयो योगो महामुने ५५ उभयोस्तु विभागेन साध्यसाधनयोर्हि
यत् विज्ञानमद्वैतमयं तद्भागोन्यो मयोदितः ५६ ज्ञानत्रयस्य चैतस्य विशेषो यो महामुने तन्निराकरणद्वारादर्शितात्मस्वरूपवत् ५७
निर्व्यापारमनाख्येयं व्याप्तिमात्रमनौपमं आत्मसंबोधविषयं सत्तामात्रमलक्षणं ५८ प्रशांतमभयं शुद्धं दुर्विभाव्यमसंश्रितम् वि
ज्ञानं तन्मयस्योक्तं तज्ज्ञाने परमे पदे ५९ तत्राज्ञानविरोधेन योगिनो यांति ये लयं संसारकर्षणोप्तौ ते यांति निर्बीजतां द्विज ६० ॥

माधिरस्मिथीयतेइति ५८ मनोवृत्त्यभावादेव प्रशांतं रागादिशून्यं अत एवाभयं द्वैतास्फूर्तेः शुद्धं निर्विषयं अत एव दुर्विभाव्यं अविनं किंनिर्विषय
त्वादेव असंश्रयं आश्रयशून्यं असंश्रितमिति पाठेपि स एवार्थः इति प्रयोगिनां दाश्रये विषययोः तदुक्तं कापिलयोगे मुक्ताश्रयं यर्हि निर्वि
षयं विरक्तं निर्वाणमृच्छति मनः सहसा ययार्चिः आत्मानमत्र पुरुषोव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाह इति ५९ एवंभूता
ज्ञानस्वरूपे लीना कृतार्था भवंतीत्याह तत्रेति तत्र च तस्मिन् ज्ञानस्वरूपे ब्रह्मण्यज्ञाननिरोधेन अविद्यानाशेन ये लयं ऐक्यं यांति ज्ञाननिरो
धेनेति पाठे पूर्वोक्तज्ञानत्रयविशेषतिरस्कारेणेत्यर्थः संसारकर्षणोप्तौ संसार एव कृष्यतइति कर्षणं क्षेत्रं तस्मिन्नुप्ते निर्बीजाय कर्मकरणे
तस्मिन्निर्बीजतां निर्वासनातां यांति निरहंकारेज्ञानोत्तरकालीनैः कर्मभिर्भोगैश्च न संसरंतीत्यर्थः ५- ५९ ॥

तर्हि योगी किं भवतीत्यत आह एवमिति द्वाभ्याम् एवंप्रकारं परमं ब्रह्मैव योगी प्राप्नोतीति शेषः ५२ तत्राभिसाधनभूतोपासनार्थमाह द्वेरूपे इति मूर्तामूर्ते एव दर्शयन्नाह क्षराक्षरेति ५३ क्षराक्षरे रूपे व्याचष्टे अक्षरमिति अक्षरं सर्वमिदमचेतनात्मकं जगद्व्याप्तिर्हि आश्रयाश्रिततस्माब्रह्म द्विधातद्भावभावतः रूपं मूर्तममूर्तं च परं चापरमेव चेति ननु क्षरस्यापरं ब्रह्मणोखिलत्वेन रूपं कथं स्यादित्याशंक्य दृष्टान्तेनोपपादयति एकदेशेनेति प्रादेशिकस्याप्यग्नेर्दीपादेर्दाहकस्यापि तद्विलक्षणा ज्योत्स्नाप्रभा यथा तत्प्रकाशशक्तिविस्तारः ५४ तथा ब्रह्मणः शक्तिरूपो विस्तारः इदमखिलं ब्रह्मादिरूपं जगत् अनुग्रहांशतेनैव ब्रह्मादिजीवतारतम्यमपि संगच्छत इत्याह तत्रापि दृष्टान्तभूतेग्नावपि आसन्नदूरत्वाद्बहुत्वस्व

एवंप्रकारममलंनित्यंव्यापकमक्षयं समस्तहेयरहितंविष्ण्वाख्यंपरमंपदम् ५१ तद्ब्रह्मपरमंयोगीयतोनावर्ततेपुनः श्रयत्यपुण्यपुण्यो
परमेक्षीणक्लेशोतिनिर्मलः ५२ द्वेरूपेब्रह्मणस्तस्यमूर्तंचामूर्तमेवच क्षराक्षरस्वरूपेतेसर्वभूतेष्ववस्थिते ५३ अक्षरंतत्परंब्रह्म
क्षरंसर्वमिदंजगत् एकदेशस्थितस्याग्नेर्ज्योत्स्नाविस्तारिणीयथा ५४ परस्यब्रह्मणःशक्तिस्तथेदमखिलंजगत् तत्राप्यासन्नदूरत्वाद्बहु
त्वस्वल्पतामयः ५५ ज्योत्स्नाभेदोस्तितच्छक्तेस्तद्वन्मैत्रेयविद्यते ब्रह्मविष्णुशिवाब्रह्मन्प्रधानाब्रह्मशक्तयः ५६ ततश्चदेवामै
त्रेयन्यूनादक्षादयस्ततः ततोमनुष्याःपशवोमृगपक्षिसरीसृपाः ५७ न्यूनान्न्यूनतराश्चैववृक्षगुल्मादयस्तथा तदेतदक्षयंनित्यं
जगन्मुनिवराखिलम् ५८ आविर्भावतिरोभावजन्मनाशविकल्पवत् सर्वशक्तिमयोविष्णुःस्वरूपंब्रह्मणोपरम् ५९॥

ल्पत्वादल्पत्वमित्येवंरूपो यथा ज्योत्स्नाया भेदोस्ति ५५ तद्वद्ब्रह्मशक्तेरपि देवादिरूपाया ब्रह्मादिस्थावरान्तेषु देवेषु विद्यावरणस्याल्पत्वबहुत्ववशात्ता रतम्यं विद्यत इत्यर्थः वक्ष्यति च तथाहि विरोहितत्वाद्वा शक्तिः क्षेत्रज्ञसंज्ञिता सर्वभूतेषु भूपाल तारतम्येन लक्ष्यत इति तदेवाह ब्रह्मेति द्वाभ्यां अस्मता रतम्यस्योपाधिकत्वात्सर्वमिदं जगद्ध्येयमेवोपासितव्यमित्याशयेनाह तदेतदिति आविर्भावतिरोभावौ जन्मनाशौ च उपाधिवशादेवंभूतवि कल्पवदपि तदेतज्जगद्वस्तुतोक्षयं न्यूनाधिक्यशून्यं नित्यं च ब्रह्मैवेत्यर्थः तदेवं स्थूलविश्वरूपोपासनया शुद्धचित्तस्य तत्कारणभूतपरमेश्वरोपासनं प्रत्येतिसर्वशक्तिमय इति स्वप्रादिसर्वशक्त्याश्रयो विष्णुर्मूर्तविश्वरूपोपि नसमस्तात्मकं ब्रह्मणापरं स्वपरं न विद्यते परं यस्मात्तदपरं श्रेष्ठं रूपम् ५९॥

तदेवाह यथायोगिभिः समाधेः पूर्वं योगारंभेषु चिंत्यते नवच्छिन्नप्रयोजनमाह सालंबनइति यत्र यस्मिन्सम्यक् मनस्यव्याहते यकारोऽस्मिन्सालंबनो वै स्मव
सबीजमेवजपादिसहितो महायोगो युंजतां योगिनां संस्थितः संस्थिरः समाधिपर्यंतो जायत इत्यन्वयः ९० यत्रेत्यनेनयच्छब्देनोक्तं स्वरूपं हेतुः सर्वश्रेष्ठ
तमाह सपरइति द्वाभ्यां ब्रह्मणः शक्तीनां ब्रह्मादीनां मध्ये सपरश्रेष्ठः यतः समनंतरः प्रतिनिकटः यतो मूर्तं ब्रह्मतीभर्तं ब्रह्मैव सः तत्र हेतुः सर्वब्र
ह्ममयः कृत्स्नब्रह्मादिवत्तदेशः ९१ तत्र हेतुमाह तत्रेति तस्मिन्नखिलं जगदोतं च प्रोतं च तंतुषु पटवत् सर्वतो नु सूत्रं तत इतरस्य चाह ततो जगत्यस्मिं
स्थितं जगच्चाखिलं सपरकारणात्मकत्वात्कार्यस्य ९२ तदेवं हरेः श्रेष्ठमुक्त्वेदानीं तदुपासनाप्रकारं सूपद्विपतीति कार्यकारणात्मको विष्णुः

स्मृतोयथायोगिभिः पूर्वं योगारंभेषु चिंत्यते सालंबनो महायोगः सबीजो यत्र संस्थितः ९० मनस्यव्याहते सम्यग्युंजतां जायते मुने स
परः परशक्तीनां ब्रह्मणः समनंतरः ९१ मूर्तं ब्रह्म महाभाग सर्वब्रह्ममयो हरिः तत्र सर्वमिदं प्रोतमोतं चैवाखिलं जगत् ततो जग
ज्जगत्यस्मिन् सजगच्चाखिलं मुने ९२ क्षराक्षरमयो विष्णुर्बिभर्त्यखिलमीश्वरः पुरुषाव्याकृतमयं भूषणास्त्रस्वरूपवत् मैत्रेय उ
वाच भूषणास्त्रस्वरूपस्थं यच्चैतदखिलं जगत् बिभर्ति भगवान्विष्णुस्तन्ममाख्यातुमर्हसि ९४ पराशर उ० नमस्कृत्याप्रमेयाय विष्णवे
प्रभविष्णवे कथयामि यथाख्यातं वसिष्ठेन ममाभवत् ९५ आत्मानमस्य जगतो निर्लेपमगुणामलं बिभर्ति कौस्तुभमणिस्वरूपं भगवा
न्हरिः ९६ श्रीवत्ससंस्थानधरमनंते च समाश्रितम् प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे ९७ भूतादिमिंद्रियादिं च द्विधाहंकारमीश्वरः
बिभर्ति शंखरूपेण शार्ङ्गरूपेण च स्थितम् ९८ ॥

पुरुषाव्याकृतमयं पुरुषप्रकृत्यात्मकं सर्वं पुरुषप्रकृत्यात्मकमिदं जगद्भूषणास्त्र
स्वरूपेण बिभर्ति ९३ इति वक्ष्यमाणविशेषतो बुभुत्सुः पृच्छति भूषणेति ९४ प्रभविष्णवे प्रभवनशीलाय भक्तचिंतनमात्रेण सर्वपुरुषार्थदानस
मर्थाय समर्थः यथा मम वसिष्ठेनाख्यातमभवत् तथा तत्कथयिष्यामि ९५ अस्य जगत आत्मानं शुद्धं क्षेत्रज्ञं ९६ प्रधानं च श्रीवत्ससंस्थान
धरं सदनंते समाश्रितमोस्तदन्वयः श्रीवत्सरूपं च गारुडपुराणे प्रोक्तं प्रदक्षिणावर्तविचित्ररोमश्रीवत्ससहितं च विभूषितानमवक्षोविविस्तमि
ति बुद्धिमहत्तत्त्वं प्रधानमपि गदारूपेणास्ते ९७ भूतादिनामसंज्ञं इंद्रियादिं च राजसं द्विधा अहंकारं यथाक्रमं शंखस्वरूपेण शार्ङ्गस्वरूपेण च स्थितं बिभर्ति

बलस्वरूपं प्राणेषु श्रेष्ठं अन्नपदजवेनांतरितः अतिक्रांतो निलो येन तत्मनः सात्त्विकाहंकारात्मकं चक्रस्वरूपं धत्ते ६९ पंचरूपा भूतमात्राणि अस्मरकते
नूनीलवज्रसमानवर्णा हरेर्यावैजयंत्याख्या माला सा भूतहेतुः भूतानां तन्मात्राणां संघातात्मिका भूतमाला च महाभूतरूपेत्यर्थः
यागंतरेष्वयमेवार्थः ७० अविद्यैव धर्मज्ञानावरककोशः संस्थितः ७२ उक्तमेव भूषणादिस्वरूपमनुवदन्नेतद्धारणेप्रयोजनमाह इत्थमिति सा

बलस्वरूपमत्यंतजवेनांतरितानिलम चक्रस्वरूपंचमनोधत्तेविष्णुकरेस्थितम ६९ पंचरूपातुयामालावैजयंतीगदाभृतः साभू
तहेतुसंघाताभूतमालाचवैद्विज ७० यानींद्रियाण्यशेषाणिबुद्धिकर्मात्मकानिवै शररूपाण्यशेषाणितानिधत्तेजनार्दनः ।
७१ विभर्तियच्चासिरत्नमच्युतोत्यंतनिर्मलम् विद्यामयंतुतज्ज्ञानमविद्याकोशसंस्थितम ७२ इत्थंपुमान्प्रधानंचबुद्ध्यहंका
रमेवच भूतानिचहृषीकेशेमनःसर्वेंद्रियाणिच ७३ विद्याविद्येचमैत्रेयसर्वमेतत्समाश्रितम् अस्त्रभूषणसंस्थानस्वरूपंरूप
वर्जितम बिभर्तिमायारूपोसौश्रेयसेप्राणिनांहरिः ७४ सविकारंप्रधानंचपुमांश्चैवाखिलंजगत बिभर्तिपुंडरीकाक्षस्तदेवं
परमेश्वरः ७५ याविद्यायातथाविद्यायत्सद्यच्चासदव्ययम तत्सर्वंसर्वभूतेशेमैत्रेयमधुसूदने ७६ कलाकाष्ठानिमेषादि
दिनर्त्वयनहायनैः कालस्वरूपोभगवानपापोहरिरव्ययः ७७ भूर्लोकोथभुवर्लोकःस्वर्लोकोमुनिसत्तम महर्जनःतपः
सत्यंतप्तलोकाइमेविभुः ७ लोकात्ममूर्तिःसर्वेषांपूर्वेषामपिपूर्वजः आधारःसर्वविद्यानांस्वयमेवहरिःस्थितः ७९

योर्भ्यां ७३ अस्त्रभूषणसंस्थानरूपंसमाश्रितमेतत्सर्वंविभर्तीत्यन्वयः श्रेयसउपासकानांसर्वपुरुषार्थसिद्धये ७४ उक्तंभूषणायुधासनंनिरू
पनामभूतिसविकारमितिद्वाभ्यां ७५ इदानींहरेःसर्वात्मत्वंदर्शयितुंदाधीपतस्थितिकालरूपेणतत्स्थलोकरूपेणयज्ञेनोकस्थूलभूतरूपेणचवक्तुं।
उपासनार्थमाह कलाकाष्ठेतिसप्तभिः ७७ सप्तलोकानितिपाठेव्याप्येतिशेषः ७८ लोकात्मिकामूर्तिर्यस्यसलोकात्मकमूर्तिः ७९ ॥ ९५

ऋगाद्यो वेदाः इतिहासो भारतादिः उपवेदा आयुर्वेदादयः ८१ मन्वादिगदितानि धर्मशास्त्राणि आख्यानानि पुराणानि अनुवादकल्पसूत्रादयः ८२ किं बहुनोक्तेन सर्वाणि वस्तुजातानि तन्मूर्तिरवेत्याह सन्तीति ८४ उपदेशसर्वस्वं तत्फलं चाह अहमिति भवतीति भवोद्दे

देवमानवपश्वादिसंस्थाभिर्बहुभिः स्थितः। ततः सर्वेभ्यो ऽनन्तो ऽमूर्तमूर्तिरमूर्तिमान् ८० ऋचो यजूंषि सामानि तथैवाथर्वणानि वै इतिहासोपवेदाश्च वेदान्तेषु तथोक्तयः ८१ वेदाङ्गानि समस्तानि मन्वादिगदितानि च शास्त्राण्यशेषाण्याख्यानान्यनुवादाश्च ये क्वचित् काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च शब्दमूर्तिधरस्यैतद्वपुर्विष्णोर्महात्मनः ८३ यानि मूर्तान्यमूर्तानि यान्यत्रान्यत्र वा क्वचित् सन्ति वै वस्तुजातानि तानि सर्वाणि तद्वपुः ८४ अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातम् ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वन्द्वगदा भवन्ति ८५ इत्येष ते ऽंशः प्रथमः पुराणस्यास्य वै द्विज यथावत्कथितो यस्मिञ्छ्रुते पापैः प्रमुच्यते ८६ कार्तिक्यां पुष्करस्नाने द्वादशाब्देन यत्फलम् तदस्य श्रवणात्सर्वं मैत्रेयाप्नोति मानवः ८७ देवर्षिपितृगन्धर्वयक्षादीनां च संभवम् भवन्ति शृण्वतः पुंसो देवा वरदा मुने ८८ ॥ इति श्रीविष्णुपुराणे प्रथमें ऽशे द्वाविंशो ऽध्यायः २२ ॥

द्भवस्तस्माद्भवन्तीति भवोद्भवाः द्वन्द्वगदा रागद्वेषादयो ऽपि ज्ञानं न भवन्ति ८५ स्पष्टमन्यत् ८८ ७४५ मूले ९८ टीका संख्या॥ परमानन्दं हरिविष्णुचित्तयोगपतिः श्रीशोपाय मिकैर्या व्यास्यन्त्वप्रकाशाख्यटीकया १ इति स्वप्रकाशाख्यायां विष्णुपुराणप्रथमे ऽशे द्वाविंशो ऽध्यायः २२

वि° पु°
द्वि° टी°
१

ॐ श्रीगणेशाय नमः ॐ संश्रितत्रयमानन्दनृहरिः श्रीधरो यतिः प्रवाणं वै स्वव्याख्यानं स्वप्रकाशाख्यटीकया १ द्वितीयेंशे सृष्टिशेषप्रसंगेन नानुवर्ण्यते भूमंडलं सपातालं ज्योतिश्चक्रादिलक्षणम् २ उक्तानुवादपूर्वकं शेषं पृच्छति भगवन्निति चतुर्भिः सर्गसंबंधि यथा जगद्भूवेत्यादि यत्पृष्टोसि १ जगत्सृष्टौ वा व्याख्या वाचकत्वेन संबन्धः २ ध्रुवो वंशप्रवर्तकस्त्वयोक्तः ३ आत्मजामौरसीं कन्यां कोत्यासंज्ञा

मैत्रेय उवाच भगवन्सम्यगाख्यातं ममैतदखिलं त्वया जगतः सर्गसंबन्धि यत्पृष्टोसि गुरो मया १ योयमंशो जगत्सृष्टिसंबंधो गदितस्त्वया तत्राहं श्रोतुमिच्छामि भूयोपि मुनिसत्तम २ प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य यौ तयोरुत्तानपादस्य ध्रुवः पुत्रस्त्वयोदितः ३ प्रियव्रतस्य नैवोक्ता भवता द्विज संततिः तामहं श्रोतुमिच्छामि प्रसन्नो वक्तुमर्हसि ४ पराशर उवाच कर्दमस्यात्मजां कन्यामुपयेमे प्रियव्रतः सम्राट्कुक्षी च तत्कन्ये दश पुत्रास्तथापरे ५ महाप्रज्ञा महावीर्या विनीता दयिताः पितुः प्रियव्रतसुता ख्यातास्तेषां नामानि मे शृणु ६ आग्नीध्रश्चाग्निबाहुश्च वपुष्मान् द्युतिमांस्तथा मेधा मेधातिथिर्भव्यः सवनः पुत्र एव च ७ ज्योतिष्मान्दशमस्तेषां सत्यनामा सुतोभवत् प्रियव्रतस्य पुत्रास्ते प्रख्याता बलवीर्यतः ८ मेधाग्निबाहुपुत्रास्तु त्रयो योगपरायणाः जातिस्मरा महाभागा न राज्याय मनो दधुः ९ निर्ममाः सर्वकालं तु समस्तार्थेषु वै मुने चक्रुः क्रियां यथान्यायमफलाकांक्षिणो हि ते १० प्रियव्रतो ददौ तेषां सप्तानां मुनिसत्तम विभज्य सप्त द्वीपानि मैत्रेय सुमहात्मनाम् ११ जंबूद्वीपं महाभाग सोग्नीध्राय ददौ पिता मेधातिथेस्तथा प्रादात्प्लक्षद्वीपमथापरं १२ शाल्मले च वपुष्मन्तं नरेन्द्रमभिषिक्तवान् ज्योतिष्मन्तं कुशद्वीपे राजानं कृतवान्प्रभुः १३

मितिवान तत्र स्वाः ५ तेषां मध्ये ज्योतिष्मान्सत्यनामा स्वन्वर्थसंज्ञः तेजस्वीत्यर्थः ८ तेषां विरक्तत्वाद्विरक्तानां विभज्य द्वीपानि ददौ रथचक्रनेमि परिखा तैर्यद्विराम्भूत सप्त द्वीपानि स्वयं विभक्तानि कृत्वा दत्तानीति भागवतोक्तेः विरंत्यादि द्रष्टव्यं जंबूद्वीपादिसन्निवेशश्चोत्तराध्याये वक्ष्यते ११

हिमाह्वंहिमवतोदक्षिणंभारतंवर्षंनामतत्त्वयथामरदेवासस्थानंतदुक्तंमात्स्ये वसन्त्यष्टसुवर्षेषुप्रजायेषुचतुर्विधाः वर्षमित्येवरमणाद्वर्षंतत्तेनतेनभा-
वेति १८ हेमकूटंहिमवदुत्तरं हेमकूटादुत्तरंनिषधगिरेर्दक्षिणं १९ निषधादुत्तरमिलावृतवर्षमिलावृताय प्रददौयत्रमध्येमेरुरस्ति सतिष्ठति इला-

पुत्रमेतंचराजानंक्रौंचद्वीपेसमादिशत् शाकद्वीपेश्वरंचापिभव्यंचक्रेचसप्रभुः १४ सवनंपुष्करद्वीपेराजानंसमकारयत् जंबू-
द्वीपेश्वरोयस्तुआग्नीध्रोमुनिसत्तम १५ तस्यपुत्राबभूवुस्तेप्रजापतिसमानव नाभिःकिंपुरुषश्चैवहरिवर्षइलावृतः १६ रम्यो
हिरण्वान्षष्ठश्चकुरुर्भद्राश्वएवच केतुमालस्तथैवान्यःसाधुचेष्टोनृपोभवत् १७ जंबूद्वीपविभागांश्चतेषांविप्रनिशामय पित्रा
दत्तंहिमाह्वंतुवर्षंनाभेस्तुदक्षिणम् १८ हेमकूटंतथावर्षंददौकिंपुरुषायसः तृतीयंनैषधंवर्षंहरिवर्षायदत्तवान् १९
इलावृतायप्रददौमेरुर्यत्रतुमध्यगः नीलाचलाश्रितंवर्षंरम्यायप्रददौपिता २० श्वेतंतदुत्तरंवर्षंपित्रादत्तंहिरण्वते य-
दुत्तरंशृंगवतोवर्षंतत्कुरवेददौ २१ मेरोःपूर्वेणयद्वर्षंभद्राश्वायप्रदत्तवान् गंधमादनवर्षंतुकेतुमालायदत्तवान् २२
इत्येतानिददौतेभ्यःपुत्रेभ्यःसनरेश्वरः वर्षेष्वेतेषुतान्पुत्रानभिषिच्यसभूमिपः २३ शालिग्राममहापुण्यंमैत्रेयतपसेययौ
यानिकिंपुरुषादीनिवर्षाण्यष्टौमहामुने २४ तेषांस्वाभाविकीसिद्धिःसुखप्रायाह्ययत्नतः विपर्ययोनतेष्वस्तिजराम्रत्युभयंन
च २५ धर्माधर्मौनतेष्वास्तांनोत्तमाधममध्यमाः नतेष्वस्तियुगावस्थाक्षेत्रेष्वष्टसुसर्वदा २६ हिमाह्वयंतुवैवर्षंनाभे-
रासीन्महात्मनः तस्यर्षभोभवत्पुत्रोमेरुदेव्यांमहामतिः २७ ऋषभाद्भरतोजज्ञेज्येष्ठःपुत्रशतस्यसः कृत्वाराज्यंस्वध-
र्मेणतथेष्ट्वाविविधान्मखान् २८ ॥

तादुत्तरोनीलाचलस्तदाश्रितंतदुत्तरं २०
तस्माच्छ्वेतगिरेरुत्तरंवर्षं २१ गंधमादनवर्षंमेरोःपश्चिमं २४ विपर्ययोसुखमकालमृत्युश्च २५ तेषुधर्माधर्मौनास्तांनस्तः तेषांभौमस्व-
र्गत्वेनधर्माधिकाराभावात्युगावस्थादेहादिह्रासलक्षणा २६ सऋषभोराज्यंकृत्वातपस्तप्तुंपुलहस्याश्रमेशालग्रामक्षेत्रेययाविप्रत्रये।

२ ॥ ४४

वि पु॰
द्वि टी॰
२

धमनिभिः संततो व्याप्तः तपसा कृशदेहत्वात् वीटां कंदुकसदृशम् अश्मकवलं मुखे कृत्वा अश्मकवलमिति भागवतोक्तेः वीराध्वानं महाप्रस्थानं ३१
ततश्च ऋषभानंतरं भरतेन पालितत्वात् भारतमेतद्वर्षं गीयते प्रातिष्ठत् प्रस्थानं कृतवानित्यर्थः ३२ इष्टमखः पूजितयज्ञः सम्यग्राज्यं कृत्वा पि।
त्रा तस्मै पुत्राय तद्राज्यं ददौ ३३ पुत्रे संक्रामिता श्री राजलक्ष्मीर्येन सः ३४ पुनः कथयिष्यामीत्यस्यायं भावः स्थूलत्वेन सद्यः दत्तात्प्रथमं तावत्

अभिषिच्य सुतं वीरं भरतं पृथिवीपतिम् तपसे स महाभागः पुलहस्याश्रमं ययौ २९ वानप्रस्थविधानेन तत्रापि कृतनि-
श्चयः तपस्तेपे यथान्यायमियाज स महीपतिः ३० तपसा कर्षितोत्यर्थं कृशो धमनिसंततः नग्नो वीटां मुखे कृत्वा वीराध्वानं
ततो गतः ३१ ततश्च भारतं वर्षमेतल्लोकेषु गीयते भरताय यतः पित्रा दत्तं प्रातिष्ठता वनम् ३२ सुमतिर्भरतस्याभूत्पुत्रः प-
रमधार्मिकः कृत्वा सम्यग्ददौ तस्मै राज्यमिष्टमखः पिता ३३ पुत्रसंक्रामितश्रीस्तु भरतः स महीपतिः योगाभ्यासरतः
प्राणान् शालग्रामेत्यजन्मुने ३४ अजायत च विप्रोसौ योगिनां प्रवरे कुले मैत्रेय तस्य चरितं कथयिष्यामि ते पुनः ३५ सुमते-
स्तेजसस्तस्मादिंद्रद्युम्नो व्यजायत परमेष्ठी ततस्तस्मात्प्रतिहारस्तदन्वयः ३६ प्रतिहर्तेति विख्यात उत्पन्नस्तस्य चात्मजः भव-
स्तस्मादथोद्गीथः प्रस्तावस्तत्सुतो विभुः ३७ पृथुस्ततस्ततो नक्तो नक्तस्यापि गयः सुतः नरो गयस्य तनयस्तत्पुत्रोभूद्विराट्
ततः ३८ तस्य पुत्रो महावीर्यो धीमांस्तस्मादजायत महांतस्तत्सुतश्चाभून्मनस्युस्तस्य चात्मजः ३९ त्वष्टा त्वष्टुश्च विरजो
रजस्तस्याप्यभूत्सुतः शतजिद्रजसस्तस्य जज्ञे पुत्रशतं मुने ४० ॥

त्मा

प्रस्तुतं भरतकौशलं स्थूले निर्जितमात्मानं शनैः सूक्ष्मे धिया नयेदिति भागवतोक्तक्रमेण ग्रहणयोग्यं सूक्ष्मात्मतत्त्वं संवे-
द्यं भरतस्य चरितं पश्चाद्वक्ष्यामि ३५ तस्माद्भरतानंतरं सुमतेस्तेजसो वीर्यादिंद्रद्युम्नो जातः
३६ प्रतिहारस्य पुत्रः प्रतिहर्ता ४० शतजितः पुत्रशतम् ४ ॥

२

विभ्रज्ज्योतिः प्रथानाः विभ्रज्ज्योतिः प्रधानो मन्त्रोयेषां तेन नवभेदं नवभेदाय मिंमन्नतभेदो स्मृतौ याध्याये वक्ष्यति ४१ ननु त्वयापूर्वमुत्तानपादादयोपि सार्व-
भौमाः प्रोक्ताः इदानीं प्रियव्रतादयोपि सार्वभौमाः प्रवोच्यन्ते तेन तु समकालिन संगच्छते ऽत्र नः क्रमो वक्तव्य इत्याशङ्क्य तेषामिति तेषां प्रियव्रतान्वयप्रसू-
तानां वंशप्रसूतैः पुरा प्रथमम् इयं भारती भूमिर्भुक्ता पश्चादुत्तानपादादिभिः कियन्तं कालमियं भुक्तेत्यत आह कृतत्रेतादीनां सर्गेण प्रथमाद्युगा-
ख्याचतुर्युगे व्याप्य तेषां एकसप्ततिर्मन्वन्तरव्याप्यकालं तावन्तं कालमित्यर्थः कृतत्रेतादिसर्गेयमितिपाठे ध्येवमेव योज्यं युगाख्यामेकसप्तति-
पादे तत्स्कन्धोयमित्यर्थः ४२ यतं देवसख्यष्टयति य एव इति तदा देस्मिन्कल्पे यदा स्वायंभुवः पूर्वमस्य प्रथममन्वन्तरस्याधिपो भूत्तदा एष प्रियव्रत-
वंशानां राज्ञां सर्गः ततः स्वारोचिषादन्तूत्तानपादवंश्यानामित्यर्थः स्वतएवोत्तानपादवंश्यस्य प्राचेतसदक्षकन्यायामदित्यां जन्म वैवस्वतमन्व-

विभ्रज्ज्योतिः प्रधानास्ते यैरिमां वर्द्धिताः प्रजाः तैरिदं भारतं वर्षं नवभेदमलंकृतम् ४१ तेषां वंशप्रसूतैश्च भुक्तेयं भारती पुरा कृत-
त्रेतादिसर्गेण युगाख्या ह्येकसप्ततिः ४२ एष स्वायंभुवः सर्गो येनेदं पूरितं जगत् वाराहे तु मुने कल्पे पूर्वमन्वन्तराधिपः ४३
इति वि॰ द्वितीयेंऽशे प्रथमोऽध्यायः १ मैत्रेय उवाच कथितो भवता ब्रह्मन्सर्गः स्वायंभुवश्च मे श्रोतुमिच्छाम्यहं त्वत्तः सकलं मण्डलं भुवः
१ यावन्तः सागरा द्वीपास्तथा वर्षाणि पर्वताः वनानि सरितः पुर्यो देवादीनां तथा मुने २ यत्प्रमाणमिदं सर्वं यदाधारं यदात्मकं
संस्थानमस्य च मुने यथावद्वक्तुमर्हसि ३ पराशर उवाच मैत्रेय श्रूयतामेतत्संक्षेपाद्गदतो मम नास्य वर्षशतेनापि वक्तुं शक्यो हि

तं वंशोत्कर्षमत्र स्यंतपादे प्रथममन्वन्तराधिपस्य स्वायंभुवस्य स्वयंभुवो वंशप्रभूतात्तस्माद् एवमनोर्वंश प्रियव्रतादिसर्गः प्रथमे प्रवृत्त इत्यर्थः यद्वा पूर्वो-
क्तं सर्वं स्वस्ति निगमनमेतत् एष इति ४३ इति स्वप्रकाशव्याख्यायां द्वि॰ प्रथमोऽध्यायः १ उक्तान्ववादेन भवनकोशं सविशेषं बुभुत्सुः
पृच्छति कथित इति स्वयंभुवो ब्रह्मणो मनुर्वंशस्य स्वयंभुः तदीयः प्रियव्रतादिसर्गः कथितः तत्कथनेन च द्वीपवर्षादि विभागो ऽत्रासूचितं भूम-
ण्डलादिकं श्रोतुमिच्छामि २ देवादीनां पुर्यो नगर्यो यावत्यः २ इदं भूमण्डलं संस्थानं रचनाविशेषं आकारमिति यावत् एवमेतेहाद-
शप्रश्नाः एतेषां च यत्प्रमाणोऽस्तन्नसंख्यासंस्थानादिभिर्यथायोगमुत्तराणि द्रष्टव्यानि ३ ॥

वि पु॰
द्वि टी॰
२

जंबादिसप्तद्वीपाः सप्तभिर्लवणादिसंज्ञैः समुद्रैः समं यथा भवन्त्येवं सर्वतस्त्वावृताः ६ चतुरशीतिरेव चाशीतिसहस्रमेव साहस्रमेव साहस्रं च तदधिकाश्चतुरशीतिसहस्राणि प्रमाणं यस्य मेरोरुच्छ्रयः लक्षयोजनप्रमाणो मेरुस्तस्योच्छ्रयो बहिश्चतुरशीतियोजनसहस्रो षोडशैव ततो योजनसहस्राणि अधस्ताद्भूम्यां प्रविष्टः द्वात्रिंशद्योजनसहस्राणि मूर्ध्नि विस्तृतः ८ अतएव मूर्ध्नि विस्तृततया तन्मूले संकुचिततया भूमध्यावस्थानाच्च भूपद्मस्य यस्य कर्णिकाकारेण संस्थितः ९ भारतवर्षमारभ्य मेरोर्दक्षिणतस्ततः स्थितानां षण्णां वर्षाणां मर्यादापर्वतानाह हिमवानिति वर्षाणां व्यवच्छेदकाः पर्वताः १० लक्षप्रमाणौ द्वौ प्राक्पश्चिमतो दैर्घ्येण निषधनीलौ यतः पिजंबूद्वीपस्य मंडला

जंबूप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज कुशः क्रौंचस्तथा शाकः पुष्करश्चैव सप्तमः ५ एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृता लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समम् ६ जंबूद्वीपः समस्तानामेतेषां मध्यसंस्थितः तस्यापि मेरुर्मैत्रेय मध्ये कनकपर्वतः ७ चतुरशीतिसाहस्रो योजनैरस्य चोच्छ्रयः प्रविष्टः षोडशाधस्ताद्द्वात्रिंशन्मूर्ध्नि विस्तृतः ८ मूले षोडशसाहस्रो विस्तारस्तस्य सर्वशः भूपद्मस्यास्य शैलोसौ कर्णिकाकारसंस्थितः ९ हिमवान्हेमकूटश्च निषधश्चास्य दक्षिणे नीलः श्वेतश्च शृंगी च उत्तरे वर्षपर्वताः १० लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्तथापरे सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते ११ भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतं हरिवर्षं तथैवान्यं मेरोर्दक्षिणतो द्विज १२ रम्यकं चोत्तरं वर्षं तस्यैवानु हिरण्मयम् उत्तराः कुरवश्चैव यथा वै भारतं तथा १३॥

कारस्य लक्षयोजनप्रमाणत्वात्तन्मध्यरेखायामेव स्थातुं लक्षप्रमाणत्वं निषधनीलौ ततस्तन्मध्यरेखातो दक्षिणतश्चोत्तरतश्च सप्तदश योजनसहस्रोत्तरितत्वाद्दीर्घ्ये नौ तथापि स्थूलदृष्ट्या लक्षप्रमाणावित्युक्तं अपरे तु हेमकूटश्वेतयोर्दशहीनाद्दशांशेन न्यूनाः हेमकूटश्वेतौ नवतियोजनसहस्रप्रमाणौ हिमवच्छृंगिणौ चैकाशीतियोजनसहस्रप्रमाणौ तदुक्तं वाराहे द्वीपस्य मंडलीभावाद्ध्रासवृद्धी प्रकीर्तिते ११ यथैव भारतमिति द्वीपमंडलप्रान्तवर्तित्वादुत्तराः कुरवो वर्षमित्यर्थः १३॥

एतेषां हिमवदादिमर्यादयावस्थितानां भारतादीनां मध्ये एकैकं वर्षं विस्तरतो नवसहस्रयोजनप्रमाणं इलावृतं च नवसाहस्रं शशविस्तारसाम्येपि न
न किंचिद्विशेषमाह तन्मध्य इति तदाह वायुः यत्तु संस्थानं जैयं हे वर्षं दक्षिणोत्तरे दीर्घमिति तच्च चत्वारि चतुरस्रमिलावृतमिति १४ किं च अत्र इलावृते
मन्ये चत्वारः पर्वता मेरोश्चतुर्दिशं १५ विष्कंभा दायामाधमवष्टंभाई स्वेन रचिताः मन्ययामूलभागान्मूर्द्धभागस्य द्विगुणविस्तारा ह्रेरवेणाभेगव
संगः १६ तेषु चतुर्ष्वष्टंभपर्वतेषु पूर्वादिक्रमेण चत्वारः पादपा एकादशशतयोजनोच्छ्राया गिरेः केतवो ध्वजा इव रचिताः १७ नामहेतुः नाम प्रवृ।

नवसाहस्रमेकैकमेतेषां द्विजसत्तम इलावृतं च तन्मध्ये सौवर्णो मेरुरुच्छ्रितः १४ मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तरम् इलावृ
तं महाभाग चत्वारश्चात्र पर्वताः १५ विष्कंभा रचिता मेरोर्योजनायुतमुच्छ्रिताः पूर्वेण मंदरो नाम दक्षिणे गंधमादनः विपुलः
पश्चिमपार्श्वे सुपार्श्वश्चोत्तरे स्मृतः कदंबस्तेषु जंबूश्च पिप्पलो वट एव च १७ एकादशशतायामाः पादपा गिरिकेतवः जंबूद्वी
पस्य सा जंबूर्नामहेतुर्महामुने महागजप्रमाणानि जंब्वास्तस्याः फलानि वै १८ पतंति भूभृतः पृष्ठे शीर्यमाणानि सर्वतः रसे
न तेषां प्रख्याता तत्र जंबूनदीति वै १९ सरित्प्रवर्तते सा च पीयते तन्निवासिभिः न स्वेदो न च दौर्गंध्यं न जरा नेंद्रियक्षयः २० त
त्पानात्स्वच्छमनसां जनानां तत्र जायते तीरमृत्तद्रसं प्राप्य सुखवायुविशोषिता जांबूनदाख्यं भवति सुवर्णं सिद्धभूषणम् २१
भद्राश्वं पूर्वतो मेरोः केतुमालं च पश्चिमे वर्षे द्वे तु मुनिश्रेष्ठ तयोर्मध्ये इलावृतम् २२ वनं चैत्ररथं पूर्वे दक्षिणे गंधमादनम्
वैभ्राजं पश्चिमे तद्वदुत्तरे नंदनं स्मृतं २३ अरुणोदं महाभद्रमसितोदं समानसम् सरांस्येतानि चत्वारि देवभोग्यानि
सर्वदा २४ शीतांतश्चक्रमुंजश्च कुररी माल्यवांस्तथा वैकंकप्रमुखा मेरोः पूर्वतः केसराचलाः २५ त्रिकूटः शिशिरश्चैव प
तंगो रुचकस्तथा निषधाद्या दक्षिणतः तस्य केसरपर्वताः २६ ॥

त्रिहेतुः फलप्रमाणे विशेषश्च वायुनोक्तः अरत्नीनां शतानि
यष्टावेकषष्ठ्यधिकानि तु फलप्रमाणं संख्यातम् ऋषिभिस्तत्त्वदर्शिभिरिति १९ स्वावस्पर्शो वायुः स्वत्ववायुः तेन विशोषिता सती तज्जीरसमृति
का सिद्धानां भूषणं सुवर्णं भवति २१ तयोर्मध्य इत्यन्तवादः तत्रस्यविष्कंभाद्रिसानुषु चैत्ररथादिवनानामरुणोदादिसरसां च कल्पनार्थः २२

२४

वि॰पु॰
द्वि॰टी॰
४

उक्तानां वक्ष्यमाणानां च केसराचलानां स्थानान्याह मेरोरिति मेरोरनंतरांगेषु सन्निहिता नियामंगानि मूलसमीपस्थानानि तान्येव जठरादीनि पूर्वदक्षि
णपश्चिमोत्तरदेशवर्त्तितया जठरदक्षिणपार्श्वपृष्ठवामपार्श्वसाम्यात् तेष्ववस्थिता मेरोः कर्णिकायाः इव केसरभूता मूलदेशपरितउपलक्षणमेतत् शि
कोकेः २८ लोकपालानां पुरः सार्द्धद्विसहस्रयोजनाः तामन्तपरितो लोकपालानामष्टानां यथादिशं यथारूपं तदीयमानेन पुरोष्टाउपलक्षणमाह
तिशुकोक्तेः ३० तत्र गंगागमनमाह विष्णुपादेति त्रियाविक्रमतो विमार्गामयादांगुष्ठनखनिर्भिन्नोर्ध्वाउकयाद्वविवरेणांतः प्रविष्टा बाह्यजलधाराहि
ब्रह्मदत्ताार्घ्यजलयमंडलसंभूता गंगा साच विष्णुपादाद्विनिष्क्रांता समीदिवौ तत्र ब्रह्मणः पुर्य्यां पतति ३१ सा तत्र पतिता सती चतुर्धाभेदं प्राप्नोति ३२

शिखिवासाः सवैडूर्यः कपिलो गंधमादनः जारुधिप्रमुखास्तद्वत्पश्चिमे केसराचलाः २७ मेरोरनंतरांगेषु जठरादिष्ववस्थिताः
शंखकूटोथ ऋषभो हंसो नागस्तथापरः कालंजराद्याश्च तथा उत्तरे केसराचलाः २८ चतुर्दशसहस्राणि योजनानां महापुरी मे
रोरुपरि मैत्रेय ब्रह्मणः प्रथिता दिवि २९ तस्याः समंततश्चाष्टौ दिशासु विदिशासु च इंद्रादिलोकपालानां प्रख्याताः प्रवराः पुरः १
विष्णुपादविनिष्क्रांता प्लावयित्वेंदुमंडलम् समंताद्ब्रह्मणः पुर्य्यां गंगा पतति वै दिवः ३१ सा तत्र पतिता दिक्षु चतुर्धा प्रतिपद्यते
सीता चालकनंदा च चक्षुर्भद्रा च वै क्रमात् पूर्वेण शैलाच्छीताततु शैलं यात्यंतरिक्षगा ततश्च पूर्ववर्षेण भद्राश्वेनैव सार्णवम् ३३
तथैवालकनंदापि दक्षिणेनैव भारतम् प्रयाति सागरं भूत्वा सप्तभेदा महामुने ३४ चक्षुश्च पश्चिमगिरीनतीत्य सकलांस्ततः =
पश्चिमे केतुमालाख्यं वर्षं गत्वैति सागरम् ३५ भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून् अतीत्योत्तरमंभोधिं समभ्येति महामुने ~

शैलाच्छैलं यातीत्यत्र शुकोक्तेः सीता तु ब्रह्मसदनात् केसराचलादिशिखरेभ्योऽधः पतीत्यादि वायुना चोक्तं सीता तथैव सरिपूर्वेण उपकम्पायव
शतसहस्राणि दारयन्ती महानदी निपपात ततः सा तु जठरे सिद्धसेविते तस्मादुदयगता शैलं देवकूटं तरंगिणी इत्यादि ३३ तथैवालकने
दापीति केसराचलादिक्रमेण निषधहेमकूटहिमवतो निक्रमेत्यर्थः सप्तभेदा भूत्वेति ते च भेदा मात्स्ये प्रोक्ताः नलिनी ह्लादिनी चैव पावनी
च तथापरा सीता च चक्षुः सिंधुश्च तिस्रो वै प्रतीच्यां दिशि गताः सप्तमी त्वन्वगात्तासां दक्षिणेन भगीरथमिति ३४ ॥ ४

पर्वतावद्दक्षिणेनोत्तरतो हिमालयादिभिः षड्भिर्मर्यादागिरिभिर्विभक्तानि भारतादीनि सप्त वर्षाण्युक्तानि इलावृतमेरुमूर्द्धरचनाविशेषमेवागमनत्रका
राष्ट्राक्ताः इदानीं तु भद्राश्वस्य पूर्वतो मेरोः केतुमालं च पश्चिमे इति पूर्वोक्तयोर्वर्षयोर्मर्यादापर्वतावाह आनीलेति उत्तरतो नीलः दक्षिणे निषधः
तत्पर्यन्तौ आयामो दैर्घ्यं ययोस्तौ आनीलनिषधायामौ तत्र पश्चिमे माल्यवान् पूर्वे गन्धमादनः। तथैवेलावृतमर्यादेण पूर्वेण च माल्यवद्गन्ध
मादनावानीलनिषधायतावितिस्फुटोक्तिः केचित्तु नयोः पूर्वे मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतमिलावृतमिति युक्तत्वात् अनेन च त्रिंश
योजनसहस्रायामौ ताविति युक्तं भवति तदाह वायुः चतुस्त्रिंशत्सहस्राणि गन्धमादनपर्वतः उदग्दक्षिणतश्चैव आनीलनिषधायतः इत्यादि ३७

आनीलनिषधायामौ माल्यवद्गन्धमादनौ तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः ३७ भारताः केतुमालाश्च भद्राश्वाः कु
रवस्तथा पत्राणि लोकपद्मस्य मर्यादाशैलवाह्यतः ३८ जठरो देवकूटश्च मर्यादापर्वतावुभौ तौ दक्षिणोत्तरायामावानी
लनिषधायतौ ३९ गन्धमादनकैलासौ पूर्वपश्चायतावुभौ अशीतियोजनायामावर्णवान्तर्व्यवस्थितौ ४० निषधः पारि
यात्रश्च मर्यादापर्वतावुभौ मेरोः पश्चिमदिग्भागे यथा पूर्वौ तथा स्थितौ ४१ त्रिशृङ्गो जारुधिश्चैव उत्तरौ वर्षपर्वतौ पूर्वपश्चाय
तावेतावर्णवान्तर्व्यवस्थितौ ४२ इत्येते मुनिवर्योक्ता मर्यादापर्वतास्तव जठराद्याः स्थिता मेरोस्तेषां द्वौ द्वौ चतुर्दिशम् ४३
मेरोश्चतुर्दिशं ये तु प्रोक्ताः केसरपर्वताः शीतान्ताद्याश्च मुने तेषामतीव हि मनोरमाः ४४ ॥

लोको जम्बूद्वीपं तद्देवाय पद्मं तस्य पत्राणि भारतकुरुवर्षयोर्भद्राश्वकेतुमालयोश्च परस्परं समानत्वादाभिमुख्येनावस्थानाच्च यत्र साहरण्य।
ता ३८ इदानीं मेरोश्चतुर्दिक्षु द्वौ द्वौ परिधिपर्वतौ प्रमाणसंस्थानाभ्यां दर्शयति जठर इति पञ्चभिः इलावृतवर्षपश्चाद्वानरविभागहेतुत्वान्म
र्यादापर्वता विनिर्दिष्टाः नववर्षमर्यादापर्वतानां पूर्वमुक्तत्वात् अस्य स्ववर्षस्यानुसंभवाच्च ३९ अशीतियोजनसहस्रायामो विस्तारो ययोस्तौ माल्य
वद्गन्धमादनयोर्मध्यादर्णवस्यान्तर्व्यवस्थितौ ४० पूर्वौ जठरदेवकूटौ यथा आनीलनिषधायतौ तथैवोभावपि स्थितौ ४१ त्रिशृङ्गो जारु
धिश्चैव उत्तरौ यथा दक्षिणोत्तरयोः स्थितौ तदाह शुकः अष्टाभिरेतैः परिसृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिरिति ४४ ॥

वि॰ पु॰
द्वि॰ टी॰
५

तेषां शैलानामन्तरेषु मध्ये द्रोण्यः दरीविशेषाः सन्ति सिद्धाः अणिमाद्यैश्वर्ययुक्ताः चारणाः देवगायकास्तैः सेविताः ४५ निरातङ्का नीरोगाः ५२ वर्षाणां सहस्राणि दश द्वादश वा स्थिरायुष इति किलाक्लिष्टा कृतादिदेशभेदव्यवस्था यातेषु देवा न वर्षन्ति यतो भौमान्येवाम्भांसि नित्यं सन्ति ५३ कृताचला। न व्याप्ता वेताः तेभ्यः प्रसूता या नद्यस्ताश्च शतशः सन्ति ५४ इति स्वप्रकाशव्याख्यायां द्वितीये द्वितीयोऽध्यायः २ जम्बूद्वीपस्य संस्थानमङ्गं वर्षविभाग

शैलानामन्तरे द्रोण्यः सिद्धचारणसेविताः सुरम्याणि तथा तासु काननानि पुराणि च ४५ लक्ष्मीविष्ण्वग्निसूर्यादिदेवानां मुनिसत्तम तास्वायतनवर्याणि जुष्टानि वरकिन्नरैः ४६ गन्धर्वयक्षरक्षांसि तथा दैतेयदानवाः क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम् ४७ भौमा ह्येते स्मृताः स्वर्गा धर्मिणामालया मुने नैतेषु पापकर्माणो यान्ति जन्मशतैरपि ४८ भद्राश्वे भगवान्विष्णुरास्ते हयशिरा द्विज वराहः केतुमाले तु भारते कूर्मरूपधृक् ४९ मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते जनार्दनः विश्वरूपेण सर्वत्र सर्वः सर्वेश्वरो हरिः ५० सर्वस्याधारभूतोऽसौ मैत्रेयास्तेऽखिलात्मकः यानि किंपुरुषादीनि वर्षाण्यष्टौ महामुने ५१ न तेषु शोको नायासो नोद्वेगः क्षुद्भयादिकम् स्वस्थाः प्रजा निरातङ्काः सर्वदुःखविवर्जिताः ५२ दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः न तेषु वर्षते देवो भौमान्यम्भांसि तेषु वै ५३ कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना सर्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः ५४ नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम ५५ इति श्रीवि॰ द्वि॰ द्वितीयोऽध्यायः २ पराशर उवाच उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् वर्षं तद्भारतं नाम भारती यत्र संततिः १ नवयोजनसाहस्रो विस्तारोऽस्य महामुने कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम् २ महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः ३ ॥

तः तत्रापि भारतं श्रेष्ठमादौ तत्र च पुण्ये वयुः भारती भरतस्य संततिः १ श्रेष्ठे श्रेयःसाधनमनुष्ठेयमन्यत्र न तत्संभवादिति दर्शयन्नाह कर्मभूमिरिति स्वर्गमपवर्गं च गच्छतां पुंसामुभयसाधनभूतानां प्रवृत्तिनिवृत्तिकर्मणां भूमिरियं किंपुरुषादिवर्षाष्टके पुष्करद्वीपे च कर्मणां वाभावात् प्लक्षादिद्वीपपञ्चके केवलं नित्यनैमित्तिककर्मणा नान्यत्र वदन्ति हि ये योऽन्यकर्मकृत्त्वात्स्वाधिकारत्वाय यदि तत्र तेत्र कुशद्वीपे च लम्

२११
५

समस्तपुरुषार्थसाधनं गंगादिपुण्यनदीनां जन्मभूमयः पौलस्त्याश्चैव सेतीत्याद्य महेन्द्र इति [illegible] स्वर्गं च [illegible] नैव कर्मणा प्राप्यत इत्याह
अत इति अतोस्माद्भूभागात्स्वर्गलोकः संप्राप्यते क्रममुक्तिं वास्मात्प्रयांति ४ स्वर्गश्च मोक्षश्च इतः [illegible] मुक्तिः मध्यं मनुष्यलोकः अंतः पा
तालादिरितः एव गम्यते नान्यतः तत्साधनस्यात्रैव सुलभत्वात् यस्मादन्यत्र भूमेर्वर्षान्तरादौ [illegible] कर्म न विधीयते ५ अयं त्विति समुद्र [illegible] नवती

अतः संप्राप्यते स्वर्गो मुक्तिमस्मात्प्रयांति वै तिर्यक्त्वं नरकं चापि यांत्यतः पुरुषा मुने ४ इतः स्वर्गश्च मोक्षश्च मध्यं चांतश्च गम्यते न
खल्वन्यत्र मर्त्यानां कर्मभूमौ विधीयते ५ भारतस्यास्य वर्षस्य नव भेदान्निशामय इंद्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् ६
नागद्वीपस्तथा सौम्यो गंधर्वस्त्वथ वारुणः अयं तु नवमस्तेषां द्वीपः सागरसंवृतः योजनानां सहस्रं तु द्वीपोयं दक्षिणोत्तरात् ७
पूर्वे किराता यस्यांते पश्चिमे यवनाः स्थिताः ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः ८ इज्यायुधवणिज्याद्यैर्वर्तयंतो व्य
वस्थिताः शतद्रूचंद्रभागाद्या हिमवत्पादनिर्गताः ९ वेदस्मृतिमुखाद्याश्च पारियात्रोद्भवा मुने नर्मदासुरसाद्याश्च नद्यो
विंध्याद्रिनिर्गताः १० तापीपयोष्णीनिर्विंध्याप्रमुखा ऋक्षसंभवाः गोदावरीभीमरथीकृष्णवेण्यादिकास्तथा ११ सह्यपा
दोद्भवा नद्यः स्मृताः पापभयापहाः कृतमाला ताम्रपर्णीप्रमुखा मलयोद्भवाः १२ त्रिसामा चार्यकुल्याद्या महेंद्रप्रभवाः स्मृताः
ऋषिकुल्याकुमाराद्याः शुक्तिमत्पादसंभवाः १३ आसां नद्युपनद्यश्च संत्यन्याश्च सहस्रशः तास्विमे कुरुपांचाला मध्य
देशादयो जनाः १४ पूर्वदेशादिकाश्चैव कामरूपनिवासिनः पुंड्राः कलिंगा मगधा दाक्षिणात्याश्च सर्वशः १५ तथा
परांताः सौराष्ट्राः शूराभीरास्तथार्बुदाः कारूषा मालवाश्चैव पारियात्रनिवासिनः १६ ॥

द्वीपः समुद्रेणैकीभूतेनेन सागरेण सागरस्तत्वोतेन संवृत इति ज्ञेयं सामान्यतः सगरखातत्वात्सागरसंवृतत्वं सहस्रयोजनोत्तरतः प्र
त्येकं भूतेरत्नावृतमन्येषामप्यस्त्येव यद्वा [illegible] भारतस्यास्य वर्षस्य नवभेदा विद्यो यतः पर्वता न विना ज्ञेयास्तेन गम्याः परस्परमिति ७॥
क्रमात्तिवदस्याः शुक्तिमत्पादनिःसृतानां नदीनां पश्चान्निर्देशः १३ तास्विति इमे कुरुपांचालादिनानादेशवर्तिनो जनाः आसां नदीषु वसंति

क्रमोक्तानामपि [illegible] ॥ २८ ॥

चत्वारीति कृते युगे च तथा धर्मः त्रेतायां पादन्यूनः द्वापरे द्विपात् कलौ पादावशेष इत्यादि चतुर्युगव्यवस्था नान्यत्रेत्यर्थः १९ यज्ञपुरुषरूपो विष्णुरत्रे।
ज्यते अन्यद्वीपेषु ब्रह्मादिषु अन्यथा सोमवायुसूर्यादिरूपः २१ स्वर्गे देवत्वप्राप्तेऽप्यत्र मनुष्यत्वं दुर्लभमित्यस्मिन्नर्थे देवगीतं प्रमाणयति गायन्तीति स्व
र्गस्यापवर्गस्य चास्पदः प्राप्यस्थानं तस्य मार्गभूते भारताख्ये भूमिभागे ये पुरुषा भवन्ति ते सुरत्वात् सुरत्वेशमानस्मात् अप्ये ते भूयोधिकं धन्याः स्व
कृतिन इत्यर्थः तत्रेदं तमाह कर्माणीति तां कर्ममहीमवाप्य असंकल्पितानि तानि अभिज्ञानि दृष्टानि फलानि येषां तान्यसंकल्पिततत्फलानि

सौवीराः सैन्धवा हूणाः शाल्वाः शाकलवासिनः मद्रारामास्तथाम्बष्ठाः पारसीकादयस्तथा १७ आसां पिबन्ति सलिलं वसन्ति सरितां स
दा समीपतो महाभाग हृष्टपुष्टजनाकुलाः चत्वारि भारते वर्षे युगान्यत्र महामुने कृतं त्रेता द्वापरश्च कलिश्चान्यत्र न क्वचित्
१९ तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विनः दानानि चात्र दीयन्ते परलोकार्थमादरात् २० पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे स दे
ज्यते यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा २१ अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने यतो हि कर्मभूरेषा ह्यतोऽन्या भोगभूम
यः २२ अत्र जन्मसहस्राणां सहस्रैरपि सत्तम कदाचिल्लभ्यते जन्तुर्मानुष्यं पुण्यसंचयात् २३ गायन्ति देवाः किल गीतकानि
धन्यास्तु भारतभूमिभागे स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् २४ कर्माण्यसंकल्पिततत्फलानि संन्यस्य
विष्णौ परमात्मभूते अवाप्य तां कर्ममहीमनन्ते तस्मिँल्लयं ये त्वमलाः प्रयान्ति २५ जानीम नैतत्क्व वयं विलीने स्वर्गप्रदे कर्म
णि देहबन्धम् प्राप्स्याम धन्याः खलु ते मनुष्या ये भारतेनेन्द्रियविप्रहीनाः २६ ॥

निष्कामानि कर्माणि विष्णौ संन्यस्य समर्प्य ये अमलाः सन्तस्तमेवालयं स्थानं प्रयान्ति पादान्तरे तस्मिँल्लयमैक्यं प्रयान्ति ते धन्या इति पूर्वेणान्वयः
२५ युष्माकमपि स्वर्गभोगानन्तरं भारते जन्म भविष्यतीति चेत् न तन्नस्तायेत इत्याहुः जानीमेति स्वर्गप्रदे कर्मणि भोगेन विलीने सति
क्व देहबन्धं जन्म प्राप्स्यामह इति न जानीमः यत्तु भारते मनुष्या जाताः सन्ति ते खलु निश्चितं धन्यास्तत्रायासेन मोक्षप्राप्ताः न त्वज्ञाः नेन्द्रिय
विप्रहीनाः अन्धपङ्ग्वादयो यदि न भवन्ति तर्हि इन्द्रियवत्त्वमात्रेण तत्र मोक्षः सुसाध्य इति भावः २६ ॥ ॥

इति स्वप्रकाशव्याख्यायां द्वि॰ तृतीयोऽध्यायः ३ अथ प्लक्षादिकान्द्वीपान्वर्षाणि सरिदब्धिभिः वर्णद्रुपादिभेदेन वर्णयन्नाक दाहृतः। तथा वलय त्वेन अत्र च जंबूद्वीपो लवणाब्धिस्त्र विस्तरतो लक्षयोजनप्रमाणो एवमग्रेऽग्रे द्वीपा द्विगुणं पूर्वस्मात्पूर्वस्मात् द्वीपाद्विगुणमात् द्विगुणोदधि वं प्लक्षादि द्वीपषट्केच द्वीप विस्तारप्रमाणे रुभयतः समुद्रस्पर्शिभिः सप्तसप्तभिर्मर्यादागिरिभिर्विभक्ता उभयतः समुद्रस्पर्शानि सप्त

नव वर्षं तत्र मेरु यज्जंबूद्वीपमिदं मया लक्षयोजनविस्तारं संक्षेपात्कथितं तव २७ जंबूद्वीपं समावृत्य लक्षयोजनविस्तरः मैत्रे य वलयाकारः स्थितः क्षारोदधिर्बहिः २८ इति श्रीवि॰ द्वि॰ तृतीयोऽध्यायः ३ पराशरउ॰ क्षारोदेन यथा द्वीपो जंबूसंज्ञोभिवे ष्टितः संवेष्ट्य क्षारमुदधिं प्लक्षद्वीपस्तथा स्थितः॥ १ जंबूद्वीपस्य विस्तारः शतसाहस्रसंमितः स एव द्विगुणो ब्रह्मन्प्लक्षद्वीप उदाहृतः २ सप्तमेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै ज्येष्ठः शांतभयो नाम शिशिरस्तदनंतरम् ३ सुखोदयस्तथानंदः शि वः क्षेमक एव च ध्रुवश्च सप्तमस्तेषां तथान्ये वर्षपर्वताः सप्तैव तेषां नामानि प्लक्षद्वीपेश्वरा हि ते ४ एवं शांतभयं वर्षं शि शिरं सुखदं तथा आनंदं च शिवं चैव क्षेमकं ध्रुवमेव च ५ मर्यादाकारकास्तेषां तथान्ये वर्षपर्वताः सप्तैव तेषां नामानि शृणु ष्व मुनिसत्तम ६ गोमेदश्चैव चंद्रश्च नारदो दुंदुभिस्तथा सोमकः सुमनाश्चैव वैभ्राजश्चैव सत्तम ७ वर्षाचलेषु रम्येषु सर्वे ष्वेतेष्वथानघाः वसंति देवगंधर्वसहिताः सततं प्रजाः ८ तेषु पुण्या जनपदा श्चिराच्च म्रियते जनः नाधयो व्याधयो वापि स र्वकालसुखं हि तत् ९ तेषां नद्यस्तु सप्तैव वर्षाणां च समुद्रगाः नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरंति याः १० अनुतप्ता शि खी चैव विपाशा त्रिदिवा क्रमुः अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः ११ एते शैलास्तथा नद्यः प्रधानाः कथितास्तव क्षु द्रशैलास्तथा नद्यस्तत्र संति सहस्रशः १२॥

सप्त वर्षाणि प्लक्षद्वीपे तन्मध्यतो वलयाकारेण मानसोत्तरेण विभक्ते द्वे वर्षे सर्वत्र वर्षादिपतिसंज्ञाभिरेव वर्षाणां संज्ञा शैलनद्यादयश्च स्व स्वसंज्ञाभिरेव सर्वत्र स्पष्टं निर्दिष्टाः तदेवं स्थिते न त्र किंचिद्व्याख्यायते प्लक्षद्वीपेश्वराः पूर्वादिरिव वर्षक्रमेण तदाह पूर्वमिति ५ विशाम्येव वर्षस

वि॰पु॰
टि॰टी॰
७

अवसर्पिणी ह्रासावस्था उत्सर्पिणी वृद्ध्यवस्था भावते हि कृतादिवेतांतं प्रजा इत्येवं वर्तंते ततो द्वापरादि कलियुगं तं ह्रसंतित्येषां नास्तीत्यर्थः १३
युगावस्थेति कृतादीनां व्यवस्था पंचम मया द्व्यवस्थये तिम्न स्थितिद्ध्वनादिषीज्ञा युगावस्था चतेषु नास्ति त्रिपाद्धर्मः संपदादिसमृद्धिर्युगाद्य नष्टाने

ताः पिबंति सदा हृष्टा नदीर्जनपदास्तु ते अवसर्पिणी न तेषां वै न चैवोत्सर्पिणी द्विज १३ न तेष्वास्ति युगावस्था तेषु स्थानेषु सप्तसु
त्रेतायुगसमः कालः सर्वदैव महामते १४ प्लक्षद्वीपादिषु ब्रह्मन्शाकद्वीपांतिकेषु वै पंचवर्षसहस्राणि जना जीवंत्यनामया १५
धर्मः पंचस्वथैतेषु वर्णाश्रमविभागजः वर्णाश्च तत्र चत्वारस्तान्निबोध वदामि ते १६ आर्यकाः कुरवश्चैव विविंशा भाविनश्च ये वि
प्रक्षत्रियवैश्यास्ते शूद्राश्च मुनिसत्तम १७ जंबूवृक्षप्रमाणस्तु तन्मध्ये सुमहांस्तरुः प्लक्षस्तन्नामसंज्ञोयं प्लक्षद्वीपो द्विजोत्तम
१८ इज्यते तत्र भगवांस्तैर्वर्णैरार्यकादिभिः सोमरूपी जगत्स्रष्टा सर्वः सर्वेश्वरो हरिः १९ प्लक्षद्वीपप्रमाणेन प्लक्षद्वीपः समावृ
तः तथैवेक्षुरसोदेन परिवेषानुकारिणा २० इत्येवं तव मैत्रेय प्लक्षद्वीप उदाहृतः संक्षेपेण मया भूयः शाल्मलं मे निशामय
२१ शाल्मलस्येश्वरो वीरो वपुष्मांस्तत्सुतांछृणु तेषां तु नामसंज्ञानि सप्तवर्षाणि तानि वै २२ श्वेतोथ हरितश्चैव जीमूतो रोहितस्त
था वैद्युतो मानसश्चैव सुप्रभश्च महामुने २३ शाल्मलेन समुद्रोसौ द्वीपेनेक्षुरसोदकः विस्ताराद्द्विगुणेनाथ सर्वतः संवृतः स्थितः
२४ तत्रापि पर्वताः सप्त विज्ञेया रत्नयोनयः वर्षाभिव्यंजका ये तु तथा सप्तैव निम्नगाः २५ कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः
द्रोणो यत्र महौषध्यः स चतुर्थो महीधरः २६ कंकस्तु पंचमः षष्ठो महिषः सप्तमस्तथा ककुद्मान्पर्वतवरः सरिन्नामानि मे शृ
णु २७ योनी तोया वितृष्णा च चंद्रा मुक्ता विमोचनी निवृत्तिः सप्तमी तासां स्मृतास्ताः पापशांतिदाः २८ श्वेतं च हरितं चैव वैद्युतं मा
नसं तथा जीमूतं रोहितं चैव सुप्रभं चातिशोभनम् २९ ॥

मित्यादिना त्रेतायुगसमः कालः १४ प्लक्षस्य नाम्ना संज्ञा यस्य स तन्नामसंज्ञः १८ विशल्यकरणी चैव मृतसंजीवनी तथा सवर्णकर
णी वान्या संधिनी च महौषधिरित्याद्या महौषध्यो यत्र संति यस्य द्रोण स नाम्नानीय प्रतिनीतः स द्रोणश्चतुर्थः २६ २९ ॥

७

यज्ञानां सम्यक्स्थितिर्यस्मिंस्तं यज्ञसंस्थितिं ३२ तेषां नामान्येव नामानि यस्याः सा तन्नाम्ना वर्षपद्धतिः वर्षश्रेणी पद्धतिः ३७ स्वाधिकारक्षयाय स्वत्वस्याधिकारस्य।

सप्तैतानि तु वर्षाणि चातुर्वर्ण्ययुतानि वै शाल्मले ये तु वर्णाश्च वसन्त्येते महामुने ३० कपिलाश्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक् ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव यजन्ति ते ३१ भगवन्तं समस्तस्य विष्णुमात्मानमव्ययम् वायुभूतं मखश्रेष्ठैर्यज्विनो यज्ञसंस्थितिम् ३२ देवानामत्र सान्निध्यमतीव सुमनोहरे शाल्मलिः सुमहावृक्षो नाम्ना निर्वृतिकारकः ३३ एष द्वीपः समुद्रेण सुरोदेन समावृतः विस्ताराच्छाल्मलस्यैव समेन तु समन्ततः सुरोदकः परिवृतः कुशद्वीपेन सर्वतः शाल्मलस्य तु विस्ताराद्द्विगुणेन समन्ततः ३५ ज्योतिष्मतः कुशद्वीपे सप्त पुत्राः शृणुष्व तान् उद्भिदो वेणुमांश्चैव वैरथो लम्बनो धृतिः ३६ प्रभाकरोऽथ कपिलस्तन्नामा वर्षपद्धतिः तस्मिन्वसन्ति मनुजाः सह दैतेयदानवैः ३७ तथैव देवगन्धर्वयक्षकिंपुरुषादयः वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः ३८ दमिनः शुष्मिणः स्नेहा मन्देहाश्च महामुने ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः ३९ यथोक्तकर्मकर्तृत्वात्स्वाधिकारक्षयाय ते तत्रैव तं कुशद्वीपे ब्रह्मरूपं जनार्दनम् यजन्तः क्षपयन्त्युग्रमधिकारफलप्रदम् ४० विद्रुमो हेमशैलश्च द्युतिमान्पुष्पवांस्तथा कुशेशयो हरिश्चैव सप्तमो मन्दराचलः ४१ वर्षाचलास्तु सप्तैते तत्र द्वीपे महामुने नद्यश्च सप्त तासां तु शृणु नामान्यनुक्रमात् धूतपापा शिवा चैव पवित्रा सम्मतिस्तथा ४२ विद्युदम्भा मही चान्या सर्वपापहरास्त्विमाः अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाचलाः ४३ कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत्स्मृतम् तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः ४४ घृतोदश्च समुद्रो वै क्रौञ्चद्वीपेन संवृतः क्रौञ्चद्वीपो महाभाग श्रूयतां चापरो महान् ४५ ॥

ज्ञानेन कर्माधिकारनिवृत्त्यर्थं स्वाधिकारं स्वाधिक्रियतेऽनेनेत्यधिकारोऽहंकारस्तदुग्रं रागद्वेषादिहेतुं क्षपयन्तीति यत्र च ब्रह्मत्वादिषु एवं स्वपि दृष्टं
धर्मः एवं स्वयं तेषामिति पंचानां साधर्म्यस्योक्तत्वात् ४५ ॥

वि पु.
द्वि टी.
८

तत्कुशद्वीपनाम ४५ प्रथमशैलः क्रौंचस्तेनैवद्वीपोपिप्रोक्तः इत्यप्यनसंध्येयम् अन्यत्परः पुंडरीकः पंचमः सप्तमोमहाशैलः पंचमश्चैवइतिपाठे महाशैलइतिदुंदुभेर्विशेषणंपूर्वस्मात्पूर्वस्मात्परस्परमन्तरेणान्तर्द्वीपाद्द्विगुणः ५० तेषुद्वीपेषुयेशैलास्तेपियथाद्वीपानितथोन्तरेणान्तरद्विगुणाइ

कुशद्वीपस्यविस्ताराद्द्विगुणेनयस्यविस्तरः क्रौंचद्वीपेद्युतिमतःपुत्राःसप्तमहात्मनः ४८ तन्नामानिचवर्षाणितेषांचक्रेमहीपतिः कु। शलोमन्दगश्चोष्णःपीवरोथान्धकारकः ४७ मुनिश्चदुंदुभिश्चैवसप्तैतेतत्सुतामुने तत्रापिदेवगंधर्वसेविताःसुमनोहराः ४८ व र्षाचलामहाबुद्धेतेषांनामानिमेशृणु क्रौंचश्चवामनश्चैवतृतीयश्चांधकारकः ४९ देवावृच्चपंचमश्चात्रतथान्यःपुंडरीकवान् दुंदुभि श्चमहाशैलोद्विगुणास्तेपरस्परम् ५० द्वीपाद्द्वीपेषुयेशैलायथाद्वीपानितेतथा वर्षेष्वेतेषुरम्येषुतथाशैलवरेषुच निवसंतिनिरातं काःसहदेवगणैःप्रजाः ५२ पुष्कराःपुष्कलाधन्याःख्यातास्तेचमहामुने ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चानुक्रमोदिताः ५३ तेत त्रनद्योमैत्रेययाःपिबंतिसुदुर्गताः सप्तप्रधानाःशतशस्तथान्याःक्षुद्रनिम्नगाः ५४ गौरीकुमुद्वतीचैवसंध्यारात्रिर्मनोजवा ख्या तिश्चपुंडरीकाचसप्तैतावर्षनिम्नगाः ५५ तत्रापिविष्णुर्भगवान्पुष्कराद्यैर्जनार्दनः यागैरुद्रस्वरूपश्चइज्यतेयज्ञसन्निधौ ५६ क्रौं चद्वीपःसमुद्रेणदधिमंडोदकेनच आवृतःसर्वतःक्रौंचद्वीपतुल्येनमानतः ५७ दधिमंडोदकश्चापिशाकद्वीपेनसंवृतः क्रौंचद्वीपे स्यविस्ताराद्द्विगुणेनमहामुने ५८ शाकद्वीपेश्वरस्यापिभव्यस्यसुमहात्मनः सप्तैवतनयास्तेषांददौवर्षाणिसप्तसः ५९ जल दश्चकुमारश्चसुकुमारोमणीवकः कुसुमोदश्चमौदाकिःसप्तमश्चमहाद्रुमः ६० तत्संज्ञान्येवतत्रापिसप्तवर्षाण्यनुक्रमात् तत्रापिप र्वताःसप्तवर्षविच्छेदकारिणः ६१ पूर्वस्तत्रोदयगिरिर्जलाधारस्तथापरः तथारैवतकःश्यामस्तथैवास्तगिरिर्द्विज ६२ आंबिके यस्तथारम्यःकेसरीपर्वतोत्तमः शाकस्तत्रमहावृक्षःसिद्धगंधर्वसेवितः ६३ यत्पत्रवातसंस्पर्शादाह्लादोजायतेपरः तत्रपुण्याजन पदाःचातुर्वर्ण्यसमन्विताः ६४ ॥

त्यर्थः ५१ दधिमंडःसारस्तदोदकंयस्मिंस्तेन ५८ केषांचिद्वृक्षविशेषःयस्यपर्वतात्पंतःखरस्पर्शानिवद्धिर्मृदुस्पर्शानिश्वेतःस्वसवद्धिःस्निग्धाःस्त्रियः

८

स्वर्गादभ्येत्य स्वर्गभोगानंतरं पुण्यशेषेण मेदिनीमभ्येत्य ये जलदादिवर्षेषु स्थिता जातास्ते जनपदा लोकास्ते ता नद्यः पिबंतीत्यन्वयः संघर्षः कलहः ६८
द्वालणाभ्युपेताः पूर्वोक्तेषु सर्वेषु वास्तणेषु समध्येस्वह्याः ७० श्वेतर्मानसो नराः दैवंतवित्यर्थः ८१ तल्पवेपादितियाद्वेवेशो भोगः तल्पस्तवोर

नद्यश्चात्र महापुण्याः सर्वपापभयापहाः सुकुमारी कुमारी च नलिनी धेनुका च या ६५ इक्षुश्च वेणुका चैव गभस्ती सप्तमी तथा अन्या
स्तु शतशस्तत्र क्षुद्रनद्यो महामुने ६६ महीधरास्तथा संति शतशोऽथ सहस्रशः ताः पिबंति मुदा युक्ता जलदादिषु ये स्थिताः ६७ व
र्षेषु ते जनपदाः स्वर्गादभ्येत्य मेदिनीम् धर्महानिर्न तेष्वस्ति न संघर्षः परस्परं ६८ मर्यादाव्युत्क्रमो नास्ति तेषु देशेषु सप्तसु मृगाश्च
मागधाश्चैव मानसा मंदगास्तथा ६९ मृगा ब्राह्मणभूयिष्ठा मागधाः क्षत्रियास्तथा वैश्यास्तु मानसास्तेषां शूद्रास्तेषां तु मंदगाः ७०
शाकद्वीपे तु तैर्विष्णुः सूर्यरूपधरो मुने यथोक्तैरिज्यते सम्यक् कर्मभिर्नियतात्मभिः ७१ शाकद्वीपस्तु मैत्रेय क्षीरोदेन समावृतः
शाकद्वीपप्रमाणेन वलयेनेव वेष्टितः ७२ क्षीराब्धिः सर्वतो ब्रह्मन् पुष्कराख्येन वेष्टितः द्वीपेन शाकद्वीपात्तु द्विगुणेन समंततः ७३
पुष्करे सवनस्यापि महावीरोऽभवत्सुतः धातकिश्च तयोस्तत्र द्वे वर्षे नामचिह्निते ७४ महावीरं तथैवान्यं धातकीखंडसंज्ञितम्
एकश्चात्र महाभाग प्रख्यातो वर्षपर्वतः ७५ मानसोत्तरसंज्ञो वै मध्यतो वलयाकृतिः योजनानां सहस्राणि ऊर्ध्वं पंचाशदुच्छ्रितः
७६ तावदेव च विस्तीर्णः सर्वतः परिमंडलः पुष्करद्वीपवलयं मध्येन विभजन्निव ७७ स्थितोऽसौ तेन विच्छिन्नं जातं तद्वर्षकद्वयं
वलयाकारमेकैकं तयोर्वर्षं तथा गिरिः ७८ दशवर्षसहस्राणि तत्र जीवंति मानवाः निरामया विशोकाश्च रागद्वेषादिवर्जिताः
७९ अधमोत्तमौ न तेष्वास्तां न वध्यवधकौ द्विज नेर्ष्यासूयाभयं द्वेषो दोषो लोभादिको न च ८० महावीरं बहिर्वर्षं धातकीखंडमंततः मा
नसोत्तरशैलस्य देवदैत्यादिसेवितम् ८१ सत्यानृते न तत्रास्तां द्वीपे पुष्करसंज्ञिते न तत्र नद्यः शैला वा द्वीपे वर्षद्वयान्विते ८२ तुल्य
वेषास्तु मनुजा देवास्तत्रैकरूपिणः वर्णाश्रमाचारहीनं धर्माहरणवर्जितम् ८३ ॥

त्रय्यः नित्यनैमित्तिकैर्यावत्पकैर्वर्णाश्रमाचारैर्हीनं धर्माहरणं काम्यधर्मानुष्ठानं तेन वर्जितम् ८३ ॥

वि पु॰
द्वि टी॰
५

मकृतिर्यक्समंताद्भूमिकरणाही तिन्यग्रोधो वृक्षस्तत्पुष्करमेव स प्रजापतिरेकः पुष्करपर्णे सम भवदिति श्रुतेः न्यग्रोधः पुष्करद्वीपे पुष्करस्तेन सस्थन्नतृप्तिमस्या
तेऽस्य यस्मिंस्तत्पुष्करं जलनशिलामलकनकपत्राग्रतायुतं भगवत इति कमलामनस्याप्यासनं परिकल्पितमिति श्रुतेः ८६ द्वीपश्चेति जंबूद्वीप
श्च लवणसमुद्रश्च समानौ लक्षयोजनविस्तारौ ततः परौ द्वीपसमुद्रौ उत्तरोत्तरं द्विगुणावित्यर्थः ८८ यथास्थालीस्थं पयादि परिमितमेव सलिलं तत्रा
ग्निसंयोगात् उद्रेकि विरलावयवम् उद्रेकं भवति अग्निसंयोगापगमे च यथापूर्वं तिष्ठति तथेन्दुवृद्धौ पौर्णमास्याम् अंभोधौ सलिलम् उत्तमं मुद्रिच्य
ते अमावास्यायां च यथापूर्वं तिष्ठति ९० तथा शुक्लकृष्णयोः पक्षयोः अपि इन्दोः उदयेषु अनतिरिक्ता एव आपः किंचित् किंचित् वर्द्धन्ते इन्दोरस्तमयेषु।

त्रयी वार्ता दंडनीतिः शुश्रूषारहितं च यत् वर्षद्वयं च मैत्रेय भौमं स्वर्गोपमं महत्॥ ८४ सर्वस्य सुखदः कालो जरारोगादिवर्जितः धातकी
खंडसंज्ञेऽथ महावीरे च वै मुने ८५ न्यग्रोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तमं तस्मिन्निवसति ब्रह्मा पूज्यमानः सुरासुरैः ॥ ८६ स्वादूदकेनो
दधिना पुष्करः परिवेष्टितः समेन पुष्करस्यैव विस्तारान्मंडलं तथा ८७ एवं द्वीपाः समुद्रैश्च सप्त सप्तभिरावृताः द्वीपश्चैव समुद्रश्च समानौ
द्विगुणौ परौ ८८ पयांसि सर्वदा सर्वसमुद्रेषु समानि वै न्यूनातिरिक्तता तेषां कदाचिन्नैव जायते ८९ स्थालीस्थमग्निसंयोगादुद्रेकि सलि
लं यथा तथेंदुवृद्धौ सलिलमंभोधौ मुनिसत्तम ९० अन्यूनानतिरिक्ताश्च वर्द्धंत्यापो ह्रसंति च उदयास्तमनेष्विंदोः पक्षयोः शुक्लकृ
ष्णयोः ९१ दशोत्तराणि पंचैव ह्यंगुलानां शतानि वै अपां वृद्धिक्षयौ दृष्टौ सामुद्रीणां महामुने ९२ भोजनं पुष्करद्वीपे तत्र स्वयमुप
स्थितं षड्रसं भुंजते विप्र प्रजाः सर्वाः सदैव हि ९३ स्वादूदकस्य पुरतो दृश्यते लोकसंस्थितिः द्विगुणा कांचनी भूमिः सर्वजंतुविवर्जिता

= ५ =

अन्यूना एव किंचिद्ह्रसंतीत्यर्थः ९१ परमवृद्धिह्रासयोः प्रमाणमाह दशेति सार्द्धचत्वारिंशत् वितस्तिपरिमितौ समुद्राणाम् अपां वृद्धिक्षयौ शास्त्रतो
दृष्टौ यद्वा नीरस्यान्वयव्यतिरेकाभ्यां दृष्टौ ९२ भुंजत इति भोजनं भक्ष्यभोज्यादि चतुर्विधमन्नपानकादिकं तत्प्रयत्नं विना स्वयमेवोपस्थितं भुंज
ते षड्रसं मधुरकटुअम्ललवणतिक्तकषाया इति प्रसिद्धाः षड्रसाः यस्मिंस्तत् ९३ अलोकसंस्थितिरिति च्छेदः न विद्यते कस्य जनस्य निवासभूतस्य संस्थि
तिर्यस्यां सा समस्तप्राणिवर्जिता समस्तसागरसप्तद्वीपवत्याः पूर्वोक्ताया भूमेर्द्विगुणा अण्डोदकसमुद्रात् परतः कांचनी भूमिर्योगिभिर्दृश्यते ९४ ॥

५

तावंतिता वत्संख्याएकाणि सहस्राणि योजनायुतमेवोछ्रितइत्यर्थः यद्वाताणतिसंस्ख्यातिसहस्राणीत्यर्थः यस्मात्सूर्यादीनांधुवायव
र्गाणांज्योतिर्गणानांगभस्तयोवार्वीसीलोकाणकदाचिन्नाविनाभवितसूत्सहेतेतावदुन्नदनायामइतिसूकोक्ते: अत्रायंगणनाक्रमः सूर्वी
तद्वीपादिद्विगुणक्रमेणमेरोसर्वतः सप्तलक्षाधिकपंचकोटिप्रमाणासाब्धिसप्तद्वीपवतीभूमिः पंचविंशलक्षान्तरं ततोद्विगुणाचतुर्इणल
क्षान्तरदशकोटिप्रमाणाकांचनीभूमिर्मेरोरेकतः उभयस्त्वष्टाविंशतिलक्षाधिकविंशतिकोटिप्रमाणातदेवंसाब्धिद्वीपभूम्यासहकांचनीभू
मिः पंचविंशलक्षान्तरं पंचविंशत्कोटिप्रमाणमेषयतेततोलोकालोकःपोलः मयुतयोजनविस्तारः सर्वतोवलयाकृतिः ५५ ततस्तंशैले
सर्वततमसाग्रत्यतिप्रतितन्नविंशतिसहस्राधिकपंचविंशलक्षन्यूनपंचविंशतिकोटिपरिमितं एतेनप्रालोकपरिमाणंचव्याख्यातमिभि

लोकालोकस्ततःशैलोयोजनायुतविस्तृतः उच्छ्रयेणापितावंतिसहस्राण्यचलोहिसः ५५ ततःतमःसमाहृत्यतंशैलंसर्वतः
स्थितं तमश्चाण्डकटाहेनसमंतात्परिवेष्टितं ५६ पंचाशत्कोटिविस्तारासेयमुर्वीमहामुने सहैवाण्डकटाहेनसद्वीपाब्धिमहीधरा ५७
स्थिता ५८ इतिश्रीवि० द्विती० चतुर्थोध्यायः ४ पराशरः
सेयथा ब्रौविथा ब्रौचसर्वभूतगुणाधिका: आधारभूतासर्वेषांमैत्रेयजगतामिति ५८ इतिश्रीवि० द्विती० चतुर्थोध्यायः ४ पराशरः
विस्तारएषकथितःपृथिव्याभवतोमया सप्ततिस्तुसहस्राणिद्विजोच्छ्रायोपिकथ्यते १ दशसाहस्रमेकैकंपातालंमुनिसत्तम
अतलं वितलंचैवनितलंचगभस्तिमत् २ महाख्यंसुतलंचाग्र्यंपातालंचापिसप्तमं शुक्लाकृष्णारुणापीताशर्कराशैलकांच
ना: ३ भूमयोयत्रमैत्रेयवरप्रासादमंडिताः तेषुदानवदैतेयायक्षाश्चशतशस्तथा निवसंतिमहानागजातयश्चमहाम

सूकोक्ते: तदेवंपंचाशत्कोटिविस्तारासेयमुर्वीततोण्डकटाहःसर्वतःसमवर्तलोंतरपंचाशत्कोटिविस्तारः अरण्मध्यगतःसूर्योयाबाभू
मार्यदेतर्वं सूर्योण्डगोलयोर्मध्येकोटयःस्युः पंचविंशतिरितिसूकोक्ते: क्वचित्कविस्तुराणेषुविरोधोयदिलक्ष्यते कल्पभेदादिभिस्तत्रव्या
वस्थासद्भिर्विधीयते ५९ सहैवाण्डकटाहेनेतितन्मध्यवर्तिनीत्यर्थः ५७ धात्रीपालयित्रीविधात्रीजननित्रीइतियतेपालनादिभिःसर्वेभ्यास्त
तेभ्यस्त्राकाशादिभ्योगुणाधिकाश्रेष्टेत्यर्थः ५७ इतिस्वप्रकाशव्याख्यायांद्वि०चतुर्थोध्यायः ४ सप्तभूमिकविस्फारप्रासादवद्धोभुवः स
प्तपातालपंक्तिस्तुवर्ण्यतेनेनमस्तके १ दशसाहस्रमितिप्रत्येकंसहस्रंयोजनोच्छ्रिताभूमिकाःतानानवसहस्रोच्छ्रितमेकैकंपातालंसू
बिलरमित्यर्थः सहस्रयोजनान्येषांदलान्यन्तरेनेमयःप्रत्येकपातशौपषांसहस्राणिनवाथनामितिशिवरहस्योक्ते:महाख्यंसुतलं २ ॥

पातालेभ्योदिवमभ्यागतः सन्स्वर्गसदांदेवानांमध्येप्राह ५ शुभ्राः शुद्धाः मणयोनागैर्धार्यमाणास्तथाधार्यमाणाः सुभूषास्तत्रतत्पातालंकेनसम
मेनकेनापिनिरुपममित्यर्थः ६ विमुक्तस्यवीतरागस्यापि ७ पुंस्कोकिलानामभिलापाः कूजितानि १० तूर्याणिनृत्यगीतवादित्राणि ११

स्वर्लोकादपिरम्याणिपातालानीतिनारदः प्राहस्वर्गसदोमध्येपातालाभ्यगतोदिवि ५ आह्लादकारिणः शुभ्रामणयोय
त्रसुप्रभाः नागैराध्रियमानास्त्रपातालंकेनतत्समं ६ दैत्यदानवकन्याभिरितश्चेतश्चशोभिते पातालेकस्यनप्रीतिर्वि
मुक्तस्यापिजायते ७ दिवार्करश्मयोयत्रप्रभांतन्वंतिनातपं शशिनश्चनशीतायनिशिद्योतायकेवलं ८ भक्ष्यभोज्यमहा
पानमुदितैरपिभोगिभिः यत्रनज्ञायतेकालोगतोपिदनुजादिभिः ९ वनानिनद्योरम्याणिसरांसिकमलाकराः पुंस्कोकि
लाभिलापाश्चमनोज्ञान्यंबराणिच १० भूषणान्यतिशुभ्राणिगंधाढ्यंचानुलेपनम् वेणुवीणामृदंगानांस्वनास्तूर्याणिचद्वि
ज ११ एतान्यन्यानिचोदारभाग्यभोग्यानिदानवैः दैत्योरगैश्चभुज्यंतेपातालांतरगोचरैः १२ पातालानामधश्चास्ते।
विष्णोर्यातामसीतनुः शेषाख्यायद्गुणान्वक्तुंनशक्तादैत्यदानवाः १३ योनंतः पठ्यतेसिद्धैर्देवोदेवर्षिपूजितः ससहस्र
शिराव्यक्तस्वस्तिकामलभूषणः १४ फणामणिसहस्रेणयः सविद्योतयन्दिशः सर्वान्करोतिनिर्वीर्यान्हितायजग
तोसुरान् १५ मदाघूर्णितनेत्रोसौयः सदैवैककुंडलः किरीटीस्रग्धरोभातिसाग्निश्वेतइवाचलः १६ नीलवासामदोत्सि
क्तः श्वेतहारोपशोभितः साभ्रगंगाप्रवाहोसौकैलासाद्रिरिवापरः लांगलासक्तहस्ताग्रोबिभ्रन्मुशलमुत्तमं उपास्यतेस्व
यंकान्त्यायोवारुण्याचमूर्तया १८ कल्पांतेयस्यवक्त्रेभ्योविषानलशिखोज्ज्वलः संकर्षणात्मकोरुद्रोनिष्क्रम्यात्तिजगत्त्रयम्
१९ सबिभ्रच्छेखरीभूतमशेषंक्षितिमंडले आस्तेपातालमूलस्थः शेषोशेषसुरार्चितः २० तस्यवीर्यंप्रभावश्चस्वरूपंरूपमे
वच नहिवर्णयितुंशक्यंज्ञातुंचत्रिदशैरपि २१ यस्यैषासकलापृथ्वीफणामणिशिखारुणा आस्तेकुसुममालेवकस्तद्वीर्यंव

उदारैरत्युत्कृष्टैर्भाग्यैः पुण्यैर्भोग्यानिपातालानामंतरंमध्यंगोचरोविषयोयेषांतैः १२ स्वस्तिकंफणस्यरेखाचिह्नविशेषः व्यक्तंस्वस्तिकमेवाम
लंभूषणंयस्यसः १४ कान्त्यास्त्रियावारुण्याचमदिराधिष्ठात्र्यादेवतया १८ शेखरीभूतंमुकुटवत्स्थिते २० वीर्यंबलंप्रभावः प्रतापः स्वरूपं

गालितं चर्चितं तेष्वनुलिप्तं यस्य श्वासानिलैरपास्तं विक्षिप्तं दिक्षु उद्वाससतां जलसंबंधीकरणं घूर्णितां यातीत्यर्थः दिक्स्वादुवाससतामिति पाठे दि
शां स्वादुवाससतां वासनकूलं यद्वा दोदा । क्रीडापां सवसेषां वाससतां स्थानतां दिक्कन्यानां क्रीडार्थं दक्षिणदिग्वजं स्थानं यं भवतीत्यर्थः दिग्वा
वाससतामिति पाठः २५ ज्योतींषि ग्रहनक्षत्रादीनि निमित्तं उत्पातशकुनादेः पठितं शुभाशुभलक्षणं फलं च ज्ञातवान् २६ देवासुरमानुषैः
सहितां लोकानां पातालादीनां मालां श्रेणिं तेन विधृता सती इयं मही बिभर्ति लोकाधारभूताया भूमेरपि स आधार इत्यर्थः २७ इति स्वधका।

यदा विजृंभतेनंतो मदाघूर्णितलोचनः तदा चलति भूरेषा साद्रितोया सकानना २३ गंधर्वाप्सरसः सिद्धाः किन्नरोरगचा
रणाः नांतं गुणानां गच्छंति तेनानंतोयमव्ययः २४ यस्य नागवधूहस्तैर्गालितं हरिचंदनं मुहुः श्वासानिलापास्तं याति दिक्पट
वासतां २५ यमाराध्य पुराणर्षिर्गर्गो ज्योतींषि तत्त्वतः ज्ञातवान्सकलं चैव निमित्तपठितं फलं २६ तेनेयं नागवर्येण शिरसा
विधृता मही बिभर्ति मालां लोकानां सदेवासुरमानुषां २७ इति श्रीवि॰ द्वि॰ पंचमोध्यायः ५ पराशर उवाच ततश्च नरकान्
विप्र भुवोधः सलिलस्य च पापिनो येषु पात्यंते तान् शृणुष्व महामुने १ रौरवः सूकरो रोधस्तालो विशसनस्तथा महा
ज्वालस्तप्तकुंभो लवणोथ विलोहितः २ रुधिरांधो वैतरणी कृमीशः कृमिभोजनः असिपत्रवनं कृष्णो लालाभक्षश्च दारु
णः ३ तथा पूयवहः पापो वह्निज्वालो ह्यधःशिराः संदंशः कालसूत्रश्च तमश्चावीचिरेव च ४ श्वभोजनोथाप्रतिष्ठश्चाना
दीविस्तथापरः इत्येवमादयश्चान्ये नरकाः भृशदारुणाः ५ यमस्य विषये घोराः शस्त्राग्निभयदायिनः पतंति येषु पुरु
षाः पापकर्मरतास्तु ये ६ कूटसाक्षी तथा सम्यक्पक्षपातेन यो वदेत् यश्चान्यदनृतं वक्ति स नरो याति रौरवम् ७ भ्रूण
हा पुरहंता च गोघ्नश्च मुनिसत्तम याति ते नरकं रोधं यश्चोच्छ्वासनिरोधकः ८ ॥

८

सव्याख्याय द्वि॰ पंचमोध्यायः आरंते कृतपुण्यानां मुक्तभोगप्रदा भुवः तत्रैव कृतपापानां पातनाय तथोच्यते सलिलस्य चेति तमो
गर्तोदकस्याधः अतोंतर्गतगर्भोदकाद्धमेव दिपादक्षिणस्यामधस्ताद्भूमेस्त्वतिष्ठाजलादिति शुकोक्तेः १ जानन्नप्यवदन् अन्यथा
वा वदन् कूटसाक्षी यश्च धर्माधिकृतसन् पक्षपातेन वा अन्यायं वदेत् पश्चादप्यनृतं वक्ति ७ भ्रूणहा गर्भहंता पुरहंता पुरविलोपकः।

वि पु०
द्वि टी०
११

तैः संसर्गमितिसेवन्तरेणपततिसहशय्यासनभाशनैः याजनाध्यापनाद्यौनात्सद्यः पततितत्समइतितैः सहसंसर्गं ९ गवोभक्तानहृता
न् १० साध्वीभार्यांतस्याविक्रयकर्ताउद्द्यालः कारागृहपालकस्तेसविविक्रयीसस्थानाविक्रीया ११ वेददूषयितावेदनिंदकः यद्वा
मन्नकाध्यापकः १३ मर्यादादूषकः शिष्टाचारनिन्दकः डरिद्रहतुस्सभिचारकर्त्ता १४ पर्येस्थानतिपतित्वज्यश्राद्धेभुंक्ते १५ कर्णि
नोवाणविशेषान् १६ नक्षत्रसूचकः नक्षत्रगणकः १७ पुत्रादीन्वंचयित्वायकयवमिष्टान्नभक्षकं वेगीसाहसकारीतमेवक्षमि

सराधोत्रस्यहाहर्तासवर्णस्यवसूकवे प्रयातिनरकेयश्चतैः संसर्गमुपैतिवै ९ राजन्यवैश्यहंताचतथैवगुरुतल्पग :
तस्मजैभिस्वसागामीहंतिराजभटांश्चयः १० साध्वीविक्रयकृदुद्द्यालःकेसरिविक्रयी तस्मलोहपतते्पनेयश्चभक्ति
परित्यजेत् ११ स्नुषासतांवापिगत्वास्वाज्वालेनिपात्यते श्रुवमेनाग्रहणोयोपश्याकोष्टनरायमः १२ वेददूषयिता
यश्चवेदविक्रयकश्चयः स्वगम्यगामीयश्चस्यान्नैयातिलवणं द्विज १३ चौरोविमोक्षेपततिमर्यादादूषकस्तथा देव
द्विजपितृद्वेष्टावत्नदूषयिताचयः संयातिक्रमिभक्षेवैकीनाशंवडुविष्टहृत् १४ पितृदेवातिथीन्यश्चपर्यस्थानिनरा
यमः लालाभक्षेसयात्युग्रेशरकर्त्ताचवेधके १५ करोतिकर्णिनोयश्चयश्चावक्षादिकंनरः प्रयात्यतेविपासुनेनरकेभृ
शदारुणे १६ असत्प्रतीग्रहीतानवकेयात्यधोमुखे अयाज्ययाजकश्चैवनयानदात्रसूचकः १७ कृमिपूयवहेवे
कोयातिमिष्टान्नभुङ्नरः । लाक्षामांसरसानांचतिलनीलवणस्यच विक्रीताचलणोवेगीतमेवनरकं द्विज १८ मा
र्जारकुक्कुटच्छागश्वचराहविहंगमान् पोषयन्नरकेयातितमेवद्विजसत्तम १९ रंगोपजीविकैवर्तः कुंडाशीगरद
स्तथा सूचीमाहिषिकश्चैवपर्वकारीचयोद्विज २० ॥

प्रकृतंपूयवहमेव १८ रंगोपजीवीनटमल्लादिवृत्तिः कैवर्तः धीवरवृत्तिः परस्त्रीजीवतिजारात्ज्ञातः कुंडः तदन्नभोजीकुंडाशीसूची
पिशुनः माहिषिकोमहिषोपजीवी यद्वामहिषीत्युच्यतेभार्याभगेनोपार्जितंहृतम् उपजीवतियस्तस्यासवैमाहिषिकःस्मृतइतिस्मृ
तिशेषः पर्वकावीपनादिलोभेनापर्वस्यमावास्यादिक्रियाप्रवर्तकः पर्वगामीतिपाठेपर्वसुस्त्रीगामी २० ॥ ११

शाकुनिः पक्षिजीवी श्वभ्रासु भ्रमति मित्रघातकोनोपजीवी वा ग्रामयाजकः ग्रामार्थं यष्टा २१ मर्यादाभेदिनः क्षेत्रादिसीमातिक्रमकारिण
उहदकं परवचने इंद्रजालादिकं वा जीवो वृत्तिर्येषां ते कृमीशे कालसूत्रे २२ यज्ञार्थं समित्पुष्पादिकं विनाह्यर्थे वनच्छेदीव असिपत्र
वनं याति औरभ्रिको मेषोपजीवी मृगव्याधश्च २३ आपाकेषु वह्निज्वाले पतंति पाकादाय श्मश्रुकादिसंचयः पोत्पन इति पते
वीक्षा वह्न्यमानमाण श्वयापिनस्तनदं साधारणनरकभोगानंतरं पापशेषेण वह्निज्वाले योनीत्पर्यः शिवव्रथमीनत्रादिषु पापाधिक्यात

आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः रुधिरांधे पतंत्येते सोमं विक्रीणते च ये २१ मधुहा ग्रामहंता च याति वै
तरणीं नरः रेतःपानादिकर्तारो मर्यादाभेदिनो हि ये ते कृमीशे यांत्यशौचाश्च कुहकाजीविनश्च ये २२ असिपत्रवनं
याति वनच्छेदी वृथैव यः औरभ्रिका मृगव्याधा वह्निज्वाले पतंति वै २३ यांत्येते द्विज तत्रैव ये चापाकेषु वह्निदाः
व्रतानां लोपको यश्च स्वाश्रमाद्विच्युतश्च यः २४ संदंशयातनामध्ये पततस्तावुभावपि दिवास्वप्ने च स्कंदंते ये नरा ब्रह्म
चारिणः पुत्रैरध्यापिता ये च ते पतंति श्वभोजने २५ एते चान्ये च नरकाः शतशोऽथ सहस्रशः येषु दुष्कृतकर्माणः
पच्यंते यातनागताः २६ यथैव पापान्येतानि तथान्यानि सहस्रशः भुज्यंते यानि पुरुषैर्नरकांतरगोचरैः वर्णाश्रम
विरुद्धं च कर्म कुर्वंति ये नराः कर्मणा मनसा वाचा निरयेषु पतंति ते २८ अधःशिरोभिर्दृश्यंते नारकैर्दिवि देवताः दे
वाश्चाधोमुखान्सर्वानधः पश्यंति नारकान् २९ स्थावराः कृमयोऽब्जाश्च पक्षिणः पशवो नराः धार्मिकास्त्रिदशास्तद्वन्
मोक्षिणश्च यथाक्रमम् ३० ॥

पापिनां क्रमेणानेकनरकपातोक्तेः २४ स्कंदंते रेतो वकिरंति २५ वर्णाश्रमविरुद्धं
गीतनृत्यादिव्यसनं तद्रूपं कर्म निरयेषु नरकेषु २८ नरकस्थानां दुःखातिशयं दर्शयितुं स्वर्गस्थदेवदर्शनं देवानां च वैराग्यार्थं
नरकदर्शनमाह अधःशिरोभिरिति २९ पापिनां नरकभोगानांतरं स्थावरयोस्तूत्रेऽन्नरमत्कुणास्तमवधाभिज्ञास्तयोनिषु जन्म
क्रममाह स्थावरा इति अब्जाः मत्स्यादयः धार्मिकाः नरेष्वेव पुण्यविशेषेण केचिन्मोक्षिणश्च मनुष्यदेवाय यथाक्रमं भवतीति शेषः

तेषांच पूर्वपूर्वेभ्योऽल्पमुत्तरोत्तरेषामल्पत्वं तदाह सहस्रेति द्वितीयानुक्रमाः द्वितीयोनुक्रमः उद्देशो येषां ते द्वितीयोपस्थानेनाक्रान्ता ये क्रम
यः ते सहस्रभागक्रमयप्रथमा सहस्रभागास्सहस्रगुणा प्रथमा प्रथमनिर्दिष्टाः स्थावरा येषां ते क्रमिभिः सहस्रगुणा अधिका
स्थावरास्तत्सहस्रतमभागाः क्रमय इत्यर्थः एवमन्येनपादेपि द्वितीयस्थानेनाक्रान्तात् क्रमिवर्गात्सहस्रगुणा अधिकाः स्थावरा इ
त्यर्थः तथा सर्वे ह्येते इति यथा स्थावरापेक्षया दिष्वपि द्रष्टव्यम् मुक्तिसमाश्रयेत इति मुक्तिसमाश्रया मुमुक्षवो ज्ञाननिष्ठा त
त्पर्यन्तमेवं पूर्वपूर्वोत्तरोत्तरेभ्यः न त्वेतज्जन्मक्रमः ततः परं मुक्तिपर्यन्तं संसारी जीवो वा वाक्यस्य कथने मोक्षस्तु लभ्यतां सूचनार्थं श्र
ये वनतया निर्दिष्टो न जन्मक्रमः अपि कपवचनेन्द्रक्रमात्स्यादित्यग्रतो व्युत्क्रमेण विमानगृह्यं प्राप्यते गुणगौरवात् विचित्रा ग

सहस्रभागं प्रथमा द्वितीयानुक्रमास्तथा सर्वे ह्येते महाभागा यावन्मुक्तिसमाश्रयाः ३१ यावन्तो जन्तवः स्वर्गे ता
वन्तो नरकौकसः पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः ३२ पापानामनुरूपाणि प्रायश्चित्तानि यद्यथा त
था तथैव संस्मृत्य प्रोक्तानि परमर्षिभिः ३३ पापे गुरूणि गुरूणि स्वल्पान्यल्पे च तद्विदः प्रायश्चित्तानि मैत्रेय जगुः स्वा
यम्भुवादयः ३४ प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ३५

तयः पुंसां कर्मणां गुरुलाघवैर्विशिष्टाः ३१ तदेवं नारकाः सर्वे तद्दोषानन्तरं स्थावरादिजन्मक्रमेण पापस्य दनुयात्तु एव।
यात्कदाचित्त्रिदशा भवन्ति इदानीं त्रिदशा अपि सर्वे पुण्यपदनयात्पापवशात्कदाचिन्नारका भवन्तीति वैराग्यार्थमाह यावन्त
इति नरकौकसो भवन्तीति शेषः इदानीं पापिनोपि नरकपरिहारोपायमाह पापकृदिति प्रायश्चित्ते यो न रतोस्ति स एव नरकं या
तीत्यन्वयः प्रायश्चित्तः ३२ तत्र प्रायश्चित्ते कर्मभक्तिज्ञानरूपेण त्रिविधे तत्र पापतारतम्येन कर्मात्मकप्रायश्चित्ते तारतम्यमाह पापानामि
ति तत्पापे महदल्पं वा यथा यथैव तदनुरूपाणि प्रायश्चित्तानि वेदार्थं संस्मृत्य प्रोक्तानि महर्षिभिः ३३ मन्वादिभिर्विधेयैः प्रायश्चित्तैर्निःशेष
सर्वपापक्षयाभावात्सर्वोत्कृष्टमुत्तरं श्रीकृष्णभक्तिरूपं सर्वप्रायश्चित्तमाह प्रायश्चित्तानीति तपोसिकृच्छ्रादीनि कर्माणि च दानजपादीनि तत्सान्त

प्रेरितवानाह कृतइति पापेकृतेयस्यपुंसोनुतापः प्रकर्षेणजायते तस्यैवमत्वा शुक्तानांतपोदानांमध्येएकं किंचिन्नदद्रूपं प्रायश्चित्तं
प्रतनुतमसतेष्ठमधिकावात् हरिसंस्मरणंतुपरमनुतापमतपेक्षायि निःशेषपापक्षयहेतुत्वात् प्रवेशनापियत्रास्त्रिकीर्तितइति
वक्ष्यमाणत्वात् १८ किंचदेशकालादिविशेषमनपेक्ष्यसद्यःपापक्षयहेतुत्वाच्च हरिसंस्मरणंश्रेष्ठमित्याह प्रातरिति प्रातर्वानि
शिवासंध्यायांवामध्याह्नेवाप्रदिशाहेदेशवयोवस्थादिनियमंवारयति नवइत्याश्रमादिनियमंवदेशकालादिनियमंविनैवयथा
कथंचित्रारायणंसंस्मृत्यैवसद्यःतत्क्षणेपापक्षयमवाप्नोति नतुसंस्मरणंकृत्वा यत्नकर्मभवति द्वादशाहादिकंहिदेशका
लादिकाविनियमापेक्षयापापवदनुष्ठितंकालांतरेपापक्षयहेतुः इदंतुनतथा यतःसर्वश्रेष्ठमितिभावः शास्त्रगम्य
हिफलंयथाशास्त्रंदेशकालादिनियमेनयथोक्तेनैवाधिकारिणानुष्ठितानांसाधनानांविषयेतेहरिसंस्मरणादिफलेन्तवस्तुसा

कृतेपापेनुतापोवैयस्यपुंसःप्रजायते प्रायश्चित्तंतुतस्यैकंहरिसंस्मरणंपरम् १८ प्रातर्निशितथासंध्यामध्या
ह्नादिषुसंस्मरन् नारायणमवाप्नोतिसद्यःपापक्षयंनरः १९ विष्णुसंस्मरणात्क्षीणसमस्तक्लेशसंचयः मु
क्तिंप्रयातिस्वर्गाप्तिस्तस्यविघ्नोनुमीयते २०॥

मर्थ्यप्रभावत्वान्नदेशकालनियमादिनियम मपेक्षतइति तथाचविष्णुधर्मा
दिषुवस्तुशक्तिमेवपुरस्कृत्योक्तंचक्रायुधस्यनामानिसदासर्वत्रकीर्तयेत् नाशौचंकीर्तनेतस्यसपवित्रकरोयतः हरि
र्हरतिपापानिदुष्टचित्तैरपिस्मृतः अनिच्छयापिसंस्पृष्टोदहत्येवहियावकः अज्ञानादथवाज्ञानादुत्तमश्लोकनामयत् सं
कीर्तितमघंपुंसोदहेदेधोयथानलइत्यादि नचैवंसति द्वादशाब्दस्मृतेरानर्थक्यंतत्कनीयेतनामादौश्रद्धाशून्यानांतत्रैवप्रवृ
त्तेविस्तरश्चैतद्भगवन्नामार्थदीपिकायांश्रीधरस्वामिभिःप्रपंचितमित्युपरम्यते २० किंचद्वादशाब्दादिव्रत
पापक्षयमात्रोपक्षीणंकिंतुमहतापिदेतविरत्याह विष्णुसंस्मरणादिति क्षीणःसमस्तक्लेशानांपापमूलानांरागादीनांसंचयः

किं च जपहोमादिषु साङ्गुण्यार्थमपि कृतं हरिसंस्मरणादिकं मुक्तावेव पर्यवस्यतीत्याशयेनाह वासुदेवे मन इति तस्य मोक्षं प्राप्स्यतः पुंसो जपहोमादिसाध्यं देवेन्द्रत्वादिकं फलं यत्तत्तस्यान्तरायो विघ्न एव ३९ तदेवाह क्वेति नाकपृष्ठं सत्यलोकं तद्गमनमपि पुनरावृत्तिफलकत्वात् वासुदेवेति जपः संकीर्तनं तस्य नित्यपरमानन्दफलस्य नान्तरूपं क्व च देवेन्द्रत्वादिकमित्यर्थः अत्र च हरिसंस्मरणजपयोर्ग्रहणं स्मरणादिनवविधभक्त्युपलक्षणार्थं बध्नाति हि हेतिकलुषं श्रोत्रं यथा तो हरिर्विंत्यादि ४० अतो मोक्षफलं विष्णुस्मरणं कुर्वन्नरकं न यातीति किं वक्तव्यमित्युपसंहरति तस्मादिति ४१ ननु देवेन्द्रविभूतिरूपं स्वर्गं योग्यं लभे सर्वाशयस्थितमस्य कर्म इदानीं विष्णुमेव याग्यं ब्रह्मज्ञानात्मकं सर्वाशयस्थितं पुरस्कृत्य सर्वो कर्मसुखस्वर्गनरकसाधनादिसर्वप्रपंचस्य मिथ्यात्वमाह।

वासुदेवे मनो यस्य जपहोमार्चनादिषु तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलं ३९ क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणं क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमं ४० तस्मादहर्निशं विष्णुं संस्मरन्पुरुषो मुने न याति नरकं मर्त्यः संक्षीणाखिलपातकः ४१ मनःप्रीतिकरः स्वर्गो नरकस्तद्विपर्ययः नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम ४२ वस्त्वेकमेव दुःखाय सुखायेर्ष्योद्भवाय च कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः ४३ तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते तदेव कोपाय यतः प्रसादाय च जायते ४४ तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकं मनसः परिणामोऽयं सुखदुःखादिलक्षणः

मनःप्रीतिकर इति सार्द्धैः पंचभिः तद्विपर्ययः मनोदुःखकरः अतः स्वप्नगतमनःप्रीतिदुःखकरवस्तुवत्स्वर्गनरकौ मिथ्यैवेति भावः मिथ्याभूतनरकस्वर्गहेतुत्वात्पापपुण्ये अपि मिथ्यैवेत्याशयेनाह नरकेति आयुर्घृतमितिवत् साधने साध्यवदुपचारात्पापपुण्ये एव नरकस्वर्गौ नरकस्वर्गसंज्ञे इत्युक्तं ४२ सुखदुःखसाधनानां स्रक्चन्दनवनितादीनामस्थिरत्वमाह वस्त्वेकमेवेति वस्तु स्रक्चन्दनादिकं वस्त्वात्मकं नियतस्वभावं कुतः देशकालभेदेनानियतस्वभावत्वान्न परमार्थतः सुखदुःखसाधनं किंचिदस्तीत्यर्थः ४३ मनसः परिणामः स्वप्नमनोराज्यादिवन्मनोविलासमात्रमित्यर्थः ४४॥

किं तद्दर्शनमित्यत आह ज्ञानमिति ज्ञानात्मकं परं ब्रह्मैव परमार्थ इति शेषः एवं चेत्कुतो संबन्ध मोक्षौ तत्राह ज्ञानमिति अविद्यया अहंकारादिरूपेण प्रतीतं ज्ञानमेव बंधाय इष्यते च शास्त्रात् ज्ञानमेव विद्यया तन्निरासेन मोक्षाय चेष्यत इत्यर्थः न चाध्यसनीयं निरसनीयं वाहंकारादि तद्व्यतिरिक्तमस्तीत्याह ज्ञानात्मकमिति तदप्यासाय ज्ञानहेतुविद्याविद्ये अपि न ततः पृथग्विद्येते इत्याह विद्याविद्येति तावदविद्याध्यस्तकर्तृकर्मफलादिरहितात्मानं सेथा नेयावदपरोक्षज्ञानं परं प्रायश्चित्तं अपरोक्षज्ञानेन तु न पापशंका न च प्रायश्चित्तं यथा वै पुष्करपलाशमापो न श्लिष्यंते एवमेवंविदि न्तापांकर्म न श्लिष्यते न कर्मणा लिप्यते पातकेनेत्यादि श्रुतेः यद्वा मनःप्रीतिकरः स्वर्गः इत्यादेरेवं से वन्धः यद्यपि स्वर्गनरकौ धर्माधर्मप्राप्यौ विविधसुखदुःखभूयिष्ठौ मयोक्तौ न तथापि न तत्प्राप्तिपरिहारयोरतो

ज्ञानमेव परं ब्रह्म ज्ञानं बंधाय चेष्यते ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परं विद्याविद्येति मैत्रेय ज्ञानमेवोपधारय ४९ एवमेतन्मयाख्यातं किं भूयः श्रोतुमिच्छसि ५० ॥ इति श्रीविष्णुपुराणे द्वि॰ षष्ठोऽध्यायः ६ मैत्रेय उवाच कथितं भूतलं ब्रह्मन्ममैतदखिलं त्वया तेभवतो मंडलं भुवः पातालानि च सर्वाणि तथैव नरका द्विज ४७ समुद्राः पर्वताश्चैव द्वीपा वर्षाणि निम्नगाः संक्षेपात्सर्वमाख्यातं २ भुवर्लोकादिकांल्लोकान् श्रोतुमिच्छाम्यहं मुने १ तथैव ग्रहसंस्थानं प्रमाणानि यथा तथा समाचक्ष्व महाभाग तन्मह्यं परिपृच्छते २ पराशर उवाच रविचन्द्रमसोर्यावन्मयूखैरवभास्यते ससमुद्रसरिच्छैला तावती पृथिवी स्मृता ३ यावत्प्रमाणा पृथिवी विस्तारपरिमण्डलात् नभस्तावत्प्रमाणं वै व्यासमण्डलतो द्विज ४ ॥

वयत्नकार्य्यः तयोरनन्तत्वात् नानात्वाच्च परमार्थो ज्ञानं परं ब्रह्मैव केवलं सत्यं अतस्तत्प्राप्तये मनीषिभिर्ज्ञानाभ्यास एव यत्नः कार्य इति ४९ तदेव नरकप्रसंगप्राप्तं शास्त्रं समाप्य प्रकृतमेवोपसंहरन्नाह एवमिति द्वाभ्यां ५० इति स्वप्रकाशव्याख्यायां षष्ठोऽध्यायः ६ ग्रहाणां संस्थानं कस्योपरि कोऽग्रहो सीमिनतेषां सन्निवेशः प्रमाणानि तेषामंतरांतरयोजनसंख्याः २ भूर्लोकमानेनैव भुवर्लोक इति वक्तुं संस्थानं तावदाह रवीति पृथिवी स्मृते तिस्रूं लोकः स्मृत इत्यर्थः ३ विस्तारेलोकालोकावलावधिः परिमंडलं वृत्तगमनसंस्थानं तयोर्द्वैवंतस्माद्व्यासमंडलाभ्यां नभो भुवर्लोकाख्यं यावत्पृथिव्योर्लोकालोकपरिच्छिन्नयोरंतरालद्वयीभुवर्लोकापितावानेवेत्यर्थः यदाह शुकः एतावानेव भूवलयस्य सन्निवेशः एतेनैव दिवि वोमानं तद्विदः उपदिशंति यथा द्विदलयोर्निष्पा

वि॰
द्वि॰
२४

सर्वलोकमाह भूमेरित्यादिषड्भिः ५ पूर्णे शतसहस्रे लक्षे द्वे उत्तरे ८ सौरिः शनैश्चरः ९ मेढीभूत इति धान्याक्रमणोपयुक्तो नामाश्रयः खलमध्यनिखातस्तंभो मेढी तद्वत्स्थितः १० उत्सेधेन उच्छ्रायेण त्रैलोक्यं च दशलक्षप्रमाणेन इज्याफलस्य भोगस्य भूमिरेषा त्रैलोक्यलक्षणा तत्रैव च कारः इज्या तत्र भारतवर्षे एव प्रतिष्ठिता समाप्तौ कर्मणि हि यतो हि कर्मभूरेषा अतोऽन्या भोगभूमय इति अतोऽत्र लब्धजन्मना पुंसा नित्यं धर्मे यतितव्यमिति भावः ११ कल्पं ब्रह्मदिनपर्यंतमेव महर्लोके वसंति कल्पांते तु जनलोकं यांतीति कल्पवासिनो भृग्वादयः त्रिलोक्यां दह्यमानायां शङ्कर्षणाग्निना यो न्नूष्मणा महर्लोकात् जनं भृग्वादयो दितादि इति श्लोकः तस्योच्छ्रियमानमाह एकेति यत्र त्वादिपादस्य पुनरुक्तिर्ध्रुवत्वलद्ध्रूद्धयविधानार्थं पाठांतरं सुगमम् १२ महर्लोकानंतरमुच्छ्रये

भूमेर्योजनलक्षे तु सौरं मैत्रेय मंडलं लक्षाद्दिवाकरस्यापि मंडलं शशिनः स्थितं ५ पूर्णे शतसहस्रे तु योजनानां निशाकरात् नक्षत्रमंडलं कृत्स्नमुपरिष्टात्प्रकाशते ६ द्वे लक्षे चोत्तरे ब्रह्मन्बुधो नक्षत्रमंडलात् तावत्प्रमाणभागे तु बुधस्याप्युशनाः स्थितः ७ अंगारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः लक्षद्वयेन भौमस्य स्थितो देवपुरोहितः ८ सौरिर्बृहस्पतेश्चोर्ध्वं द्विलक्षे समवस्थितः सप्तर्षिमंडलं तस्माल्लक्षमेकं द्विजोत्तम ९ ऋषिभ्यस्तु सहस्राणां शतादूर्ध्वं व्यवस्थितः मेढीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः १० त्रैलोक्यमेतत्कथितमुत्सेधेन महामुने इज्याफलस्य भूरेषा इज्या चात्र प्रतिष्ठिता ११ ध्रुवादूर्ध्वं महर्लोको यत्र ते कल्पवासिनः एकयोजनकोटिस्तु महर्लोकोऽभिधीयते १२ द्वे कोटी तु जनलोको यत्र ते ब्रह्मणः सुताः सनंदनाद्याः कथिता मैत्रेयामलचेतसः १३ चतुर्गुणोत्तरे चोर्ध्वं जनलोकात्तपः स्मृतः वैराजा यत्र ते देवाः स्थिता दाहविवर्जिताः १४ षड्गुणेन तपोलोकात्सत्यलोको विराजते अपुनर्मारका यत्र ब्रह्मलोको हि

= उ ॥ श्री ॥

ण ध्रुवादेव द्वे कोटी जनलोकः यत्र ते कथिताः प्रख्याताः सनंदनाद्याः संति सः १३ जनलोकाच्चतुर्गुणेन अष्टकोट्युच्छ्रये आकाशे व्याप्तस्तपोलोकः स्मृतः १४ जनलोकापेक्षया षड्गुणेन द्वादशकोट्युच्छ्रयेण तपोलोकादनंतरं सत्यलोकः न तु तपोलोकापेक्षयेति मन्तव्यं तथा सत्यष्टचत्वारिंशत्कोट्युच्छ्रये न तु ब्रह्मांडे तस्यावकाशाभावात् अपुनर्मारकाः पुनर्मृत्युशून्याः सत्यलोक एव कल्पाभेदेन ब्रह्मलोक इष्यते परे वैकुंठलोकादि एवं एवं च भूतलाद्ध्रुवं च दशलक्षोत्तरं त्रयोविंशतिकोटयो भवंति सत्यलोकात् चतुर्दशलक्षोनकोटिद्वयादंडकटाह इति ज्ञेयं सूर्यादिगोलयोर्मध्ये कोट्यः सप्तविंशतिरित्य

= उ ॥ श्री ॥
१७

महर्लोकादीनामन्तस्यैव प्रमाणात्मकं भूरादिलोकत्रयस्य प्रत्येकमस्थितव्यवस्थामाह पादगम्यमिति त्रिभिः चरणसंचारयोग्यं गिरिशिखरादि यावन्तावद्ध्रुवस्तथो
भूर्लोक इत्यर्थः विस्तारोऽस्य मयोदितः सर्वतो लोकालोकावधिः पंचविंशतिकोटिप्रमाणः १६ नियुतानि लक्षाणि १७ त्रैलोक्यं कृतकं प्रतिकल्पं कार्यत्वात्
जनलोकादित्रयमकृतकं प्रतिकल्पमकार्यत्वात् १८ महर्लोकस्य कृतकाकृतकत्वे हेतुमाह शून्यमिति जनैः शून्यः २० एतच्च तद्देशभुवनात्मकं जगदण्ड
कटाहेन समावृतं तत्र देववद्दृष्टिपृथिव्यावरणे सचकटाहः कोटियोजनविस्तारः सप्तसागरमानस्तु गर्भोदकं तदन्तरं कोटियोजनमानस्तु कटाहः संव्यवस्थितः

पादगम्यं तु यत्किंचिद्वस्त्वस्ति पृथिवीमयम् स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः १६ भूमिसूर्यान्तरं यच्च सिद्धादिमुनिसेवितं भुवो
लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम १७ ध्रुवसूर्यान्तरं यच्च नियुतानि चतुर्दश स्वर्लोकः सोऽपि गदितो लोकसंस्थानचिन्तकैः १८ त्रैलोक्य
मेतत्कृतकं मैत्रेय परिपठ्यते जनस्तपस्तथा सत्यमिति चाकृतकं त्रयं १९ कृतकाकृतयोर्मध्ये महर्लोक इति स्मृतः शून्यो भवति क
ल्पान्ते योऽत्यन्तं न विनश्यति २० एते सप्त मया लोका मैत्रेय कथितास्तव पातालानि च सप्तैव ब्रह्माण्डस्यैष विस्तरः २१ एतदण्डक
टाहेन तिर्यक् चोर्ध्वमधस्तथा कपित्थस्य यथा बीजं सर्वतो वै समावृतम् २२ दशोत्तरेण पयसा मैत्रेयाण्डं च तद्धृतम् सर्वोऽम्बुपरिधानो
सौ वह्निना वेष्टितो बहिः २३ वह्निश्च वायुना वायुर्मैत्रेय नभसा वृतः भूतादिना नभः सोऽपि महता परिवेष्टितः २४ दशोत्तराण्यशेषा
णि मैत्रेयैतानि सप्त वै महान्तं च समावृत्य प्रधानं समवस्थितं अनन्तस्य न तस्यान्तः संख्यानं चापि विद्यते तदनन्तमसंख्यातप्रमाणं चा
पि वै यतः २६॥

२

नि स्कन्धे भेरवतंत्रोक्ते १२ कटाहाद्दशोत्तरेण दशगुणेन पयसा परिधानः पयोवेष्टितः २३ दशोत्तराणि समेति पृथिव्यावरणस्य
दशोत्तरत्वाभावात् यत्तु भगवतोक्तं पंचस्कंधे तेनापि महदादिभिश्चावरणैरष्टभिर्बहिरावृतमिति स्कांदे ॥ २५ अष्टममप्यावरणं प्रसिद्धं
उक्तत्रिनाशवत्त्वविच्छित्त्या निवृत्तपृथिव्यादिसप्तावरणानि प्रधानेन तनत्तथेत्याह अनंतस्येति सर्वगतस्य तस्यांतो नाशो नास्ति संख्यानं च दशगुण
त्वकं यतस्तदनंतं नित्यं असंख्यातप्रमाणं च न विद्यते संख्यानं प्रमाणं यस्य तथाभूतं च वैष प्रसिद्धं परास्य शक्तिरित्यादिश्रुतिपुराणेषु २६ ॥

स्वतःकार्यसमस्तस्य हेतुभूतं प्रधानादिव्यापकं सर्वगतं तेव्यतक्तिः ग्रंशानां वेति २७ तत्सुरूपाधिष्ठितमेव जगतो हेतुरित्याह दारुण्यग्निरिकाष्ठे यथानलप्रका॥
शतयाग्निरेवस्थितः तिले वर्तते तैलं यथा आत्मवेदनस्वप्रकाशः २८ तयोर्व्यापिपरमेश्वराधिष्ठितत्वमाह प्रधानं चेति ताभ्यां विष्णोः स्वरूपभूतया विष्णु
शक्त्या वृतौ प्रधानपुंसौ संश्रयधर्मिणौ नियम्यनियंतृभावेन स्थितौ २९ सैव कालात्मना स्थिता सती तयोः प्रलयकाले पृथग्भावकारणं स्थितिकाले संश्र
यस्य च कारणं सर्गकाले क्षोभकारणभूता चेत्यर्थः ३० एवं च प्रधानपुरुषप्रहाराय तत्कार्यभूतजगदाश्रयत्वेऽपि विष्णुशक्तेर्निर्लेपत्वं दृष्टान्तेनाह यथे
ति जले स्थितेन कणिकाशतेन परमाणुसंश्लेषक्रमेण यथा भवत्येवं वातो यथा बिभर्ति तथा प्रधानपुरुषात्मकं जगत् तद्वच्चैव स्थितत्वात् तादात्म्यसङ्क्रममेवं वि

हेतुभूतमशेषस्य प्रकृतिः सा परा मुने॥ प्रंशानां तु सहस्राणि सहस्राणि शतानि च॥ २७ ईदृशानां तथा तत्र कोटिकोटिशतानि च।
दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमानपि॥ २८ प्रधानेऽवस्थितो व्यापी चेतनात्मात्मवेदनः॥ प्रधानं च पुमांश्चैव सर्वभूतात्मभूतया॥ २९
विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणौ॥ तयोः सैव पृथग्भावकारणं संश्रयस्य च॥ ३० क्षोभकारणभूता च सर्गकाले महामते॥
यथा सक्तं जले वातो बिभर्ति कणिकाशतं॥ ३१ जगच्छक्तिस्तथा विष्णोः प्रधानपुरुषात्मकं॥ यथा च पादपो मूलस्कंधशाखादिसं
युतः॥ ३२ आदिबीजात्प्रभवति बीजान्यन्यानि वै ततः॥ प्रभवंति ततस्तेभ्यः संभवंत्यपरे द्रुमाः॥ ३३ तेऽपि तल्लक्षणद्रव्यकारणानुगता
मुने॥ एवमव्याकृतात्पूर्वं जायंते महदादयः॥ विशेषान्तास्ततस्तेभ्यः संभवंत्यसुरादयः॥ तेभ्यश्च पुत्रास्तेषां च पुत्राणामपरे सुताः॥ ३५
बीजाद्वृक्षप्ररोहेण यथा नापचयस्तरोः॥ भूतानां भूतसर्गेण नैवास्त्यपचयस्तथा॥ ३६ ॥ ॥

सा शक्तिं बिभर्ति पावंत वेन जले स्थितं शैत्यं कणिकाद्वारेणागतं यथा वातो बिभर्ति तथा जलस्थानीयं जगत्कणिकास्थानीयं महदादि
द्वारेणागतं वातस्थानीया विष्णोः शक्तिर्बिभर्तीत्यर्थः ३१ एतदेव दृष्टान्तेन प्रपंचयन्सर्वेषां कार्याणां मूलकारणानुगतिमाह यथेति सा
र्वैस्त्रिभिः अन्यानि बीजानि ततः पादपात्प्रकर्षेण भवंति ३२ तेभ्यो बीजेभ्योऽन्ये द्रुमाः प्रभवंति तद्बीजेभ्यश्चापरे द्रुमाः तल्लक्षणं पूर्वद्रुमसमा
नीयं यद्द्रव्यं तद्देवकारणं तेनानुगताश्चासाः स्युः ३३ विशेषान्ताः पृथिव्यन्ताः ३४ बहुकोट्यस्त्यादकानामपि देवादीनामपचयाभावं दृष्टां

सर्वकारणभूतस्यापिद्देवस्यनिर्विकारत्वे दृष्टांतेनाह सन्निधानादिति उपादानत्वमपिहरेः प्रकृतिद्वारैवनस्वरूपेणेतिभावः ३७ एवमव्याकृतात्सूर्वं जायंतेइ त्यादिवाक्यात्प्राप्तमसत्कार्यवादशंकांदृष्टांतेनवारयन्नाह व्रीहीत्यादिभिः ३७ व्रीहिर्बीजेसंतएवमूलनालादयआत्मनस्वस्यप्ररोहहेतसामग्र्यभिव्यक्ति कारणेपोष्कल्येभूमिजलादिसंयोगंप्राप्यपयात्माविर्भावंयांतितथैवतत्तेतमसंतएवजायंतेसदेवसोम्येदमग्रआसीदित्यादिश्रुतेरित्यर्थः ३८ ततसर्वकारणं ब्रह्मैवप्रकृतिप्रसिद्धेनतद्विलक्षणमाह सचेति सविष्णुपरंब्रह्मैवतत्कतत्स्वपेक्षायांविष्णोःसकाशादुद्भूतंजगन्नतेचस्थितमित्यादिनाप्रवीक्तविष्णोस्वरू

सन्निधानाद्यथाकाशकालाद्याःकारणंतरोः तथैवापरिणामेनविश्वस्यभगवान्हरिः ३७ व्रीहिर्बीजेयथामूलंनालंपत्रांकुरौतथा कोड कोषस्तथापुष्पंक्षीरंतद्वच्चतंडुलाः ३८ तषाकर्मण्यसंतोवैयांत्याविर्भावमात्मनः प्ररोहहेतुसामग्र्यमासाद्यमुनिसत्तम ३९ तथा कर्मस्वनेकेषुदेवाद्यास्समवस्थिताः विष्णुशक्तिंसमासाद्यप्ररोहमुपयांतिवै ४० सचविष्णुपरंब्रह्मयतःसर्वमिदंजगत् जगच्चयो यच्चैवेदंयस्मिंश्चलयमेष्यति ४१ तद्ब्रह्मतत्परंधामसदसत्परमंपदं यस्यसर्वमभेदेनयतस्मैतच्चराचरम् ४२ सएवमूलप्रकृति र्व्यक्तरूपीजगच्चसः तस्मिन्नेवलयंसर्वंयातितत्रचतिष्ठति ४३ कर्ताक्रियाणांसचइज्यतेक्रतुःसएवतत्कर्मफलंचतस्ययत् । स्रगादियत्साधनमप्यशेषतोहरेर्नकिंचिद्व्यतिरिक्तमस्ति ४४ ॥ इतिवि॰ हि॰ सप्तमोध्यायः ८ पराशरउवाच व्याख्यातमेतत् ब्रह्मांडसंस्थानंतवसुव्रत ततःप्रमाणसंस्थानेसूर्यादीनांशृणुष्वमे १ योजनानांसहस्राणिभास्करस्यरथोनव ईषादंडस्तथैवास्यहि गुणोमुनिसत्तम २॥

यमनुस्मरयतियतःसर्वमिति ४० ब्रह्मचविष्णोरेवस्वरूपमित्याह तद्ब्रह्मेति तत्प्रकृतिप्रसिद्धंब्रह्मतस्यविष्णोःपरंधामस्वरूपंयतःसदसतोःपर मंपदंयत् यस्यचाभेदेनसर्वमेतज्जगत्भवतितद्ब्रह्मअतोविष्णुब्रह्मणोर्लक्षणाभेदाद्ब्रह्मैवविष्णुः ४१ अतसएवसर्वकारणमित्येनत्सिद्धमित्या ह सएवेति ४२ सर्वकर्मफलंतत्साधनादिरूपंचसएवेतिदर्शयन्नुक्तंसर्वात्मत्वंनिगमयति कर्तेति ४३ इतिवि॰ स्वप्रकाशव्याख्यायांसप्त मः ७ विहृतंविस्तरेणेदंज्योतिश्चक्रंविवक्षणः मयात्वत्स्वीयबोधायसंक्षेपेणापवर्णिते १ ईषादंडःस्वदाप्रतयोःसंधानार्थोदंडःहिगुणःस्व

सार्द्धकोटिरिति मेरुमानसोत्तरगावलयोर्यावदंतरं तावदेवाक्षस्य मानं तस्याक्षो मेरोर्मूर्ध्नि क्षितो मानसोत्तरे स्थितेत्तरभागो यत्र प्रोतं रविरथचक्रं तैलयंत्रवन् मानसोत्तरगिरौ परिभ्रमतीति श्लोकोक्तेः ३ चक्रमुपासनार्थं विशिनष्टि त्रिनाभिमतीति त्रिनाभिस्त्रेवः पूर्वाह्णः प्रोतः सवत्रिमेखलः अक्षरूपवाचनाभिवेना पास्यतान्मखलारूपास्त्रिस्रो नाभयः पूर्वाह्णमध्याह्नापराह्णास्तद्युक्ते पंचारे पंचसंवत्सरपरिवत्सरादयः आवाषालाकायस्मिन् षसेमिनीति षड् ऋतवो नेमयः श्रोतवलयानि तिष्ठति कालात्मकत्वादक्षयात्मके संवत्सरमये संवत्सरविकारत्वात्संवत्सरत्वेनोपास्यत्वाद्धतन्मयत्वं तदुक्तं मात्स्ये प्र द्वस्त्रिनाभिस्तु यस्यायकचक्रस्यैवेस्तृतं शरासंवत्सराः पंचनेम्यः षड् ऋतवः स्मृताः इति तस्मिन्कालचक्रे कालोपमानभूते कृत्स्नं ज्योतिश्चक्रं प्रतिष्ठितं श्लिष्टं तस्य योगत्वयोनत्वात्कालचक्रफलस्य ४ अक्षांतरमाह चत्वारिंशदिति सार्द्धपंचचत्वारिंशत्सहस्रप्रमाण इत्यर्थः ५ महाक्षस्या

सार्द्धकोटिस्तथा सप्तनियुतान्यधिकानि वै योजनानां तु तस्याक्षस्तत्र चक्रं प्रतिष्ठितं ३ त्रिनाभिमति पंचारे षण्नेमिन्यक्षयात्मने ।
संवत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितं चत्वारिंशत्सहस्राणि द्वितीयोऽक्षो विवस्वतः पंचान्यानि तु सार्द्धानि स्यंदनस्य महामते ५
अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्द्धयोः ह्रस्वोऽक्षस्तद्युगा
र्द्धेन ध्रुवाधारो रथस्य वै द्वितीयेऽक्षे तु तच्च
क्रं संस्थितं मानसाचले
॥८॥

णं तु योऽप्यतिदिशति अक्षेति ईषाग्रेम्निर्यदि॰ वडोग्रस्य योजनार्थं दंडो युगं अक्षस्य प्रमाणं तदेव युगार्द्धयोः संहृत्य प्रमाणं युगस्य प्रमाणमिति च वक्ष्ये युगार्द्धयोरित्युक्तं तत्रायं भावः यस्मिन्नुभयपतोऽप्यावध्यंते तद्युगमीषाग्रयुक्तं मध्यस्यानाडुभयतः समं भवति श्रच्चैकतप व समप्राप्ताः न तु भयतः श्रमं गोस्तु वरोगे युक्तो यतस्तदुक्तं ततः स्थितेरिति लिंगोक्तेः अतो युक्ते भागे युगस्य दैर्घ्यं अन्यतो ह्रस्वत्वमिति शोकानाभूदिति तदैर्घ्यं युगार्द्धयोः समयोः संहृत्य तत्प्रमाणमित्युक्तं चाक्षयुगयोरेकप्रमाणत्वमिति ह्रस्वाक्षस्यापयोगं दर्शयन्नाह ह्रस्वोऽक्ष इति सार्द्धपंचचत्वारिंशत्सहस्रो ह्रस्वोऽक्षस्तस्य रथस्य युगार्द्धेन सह ध्रुवाधारस्तिवद्धो ध्रुवाधारोऽस्ति तथा च शुकः तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तैलयंत्राक्षवत् ध्रुवे कृतोपरिभागोऽइवि

युगाह्नकोटिगोनस्य दक्षिणस्य रत्नस्य ध्रुवेणावष्टब्धौ तौ तोरणमीढौ न यतीव विमिति निरंतरोक्तइत्याह्लापेक्षया हि गीयेत महाद्वैतस्तथाचाज्ञरथ्यशक्तियाम्भूत।
लायोजनलक्षे सूर्य्यः पंचदशलक्षे ध्रुवः चतुराशीतियोजनसहस्रोच्छ्रयो मेरुः अर्द्धलक्षोच्छ्रयो मानसोत्तराचलः। तदुपर्यर्द्धलक्षोच्छ्रये मेरोश्चो
परि षोडशयोजनसहस्रोच्छ्रये वायुस्कंधे सार्द्धसप्तलक्षोत्तरसार्द्धकोटिप्रमाणो रविरथस्याक्षो मानसोत्तरशंनप्रोतेवचक्रास्ति यंगिवतनोस्ति तस्मिंश्चादे
वक्रप्रोतेति वक्ष्यमेलोहस्योक्तो वायुरश्मिभिः क्षोभ्यमाणोस्ति युगंवदक्षिणार्द्धवाग्वरश्मिभिर्बद्धः सवाथारं तस्थै वास्ति प्रवाहाद्दिवाग्वपाद्दद्धाद्फाराष्पा
त्मकेत्यानिचक्रं शत्यहंमे रुंप्रदक्षिणीकुर्वन्त्यविभ्रमति तद्वेगवशाद्य सूर्य्यः प्रत्यहं मेरुं प्रदक्षिणीकुर्वन्नपि स्वगत्या राश्याभिमुखमपि किंचित्किंचित्स्वच
लति तच्चदक्षिणायनादिषु ध्रुवगृहीतवायुपाशप्रसारणकर्षणभ्यां रवेर्गतिवैचित्र्यायथायथमहोरात्राणां ह्रस्वदीर्घसमानि भवंति एवं चेद्दादीनाम

हयाश्च सप्त छंदांसि तेषां नामानि मे शृणु गायत्री सबृहत्युष्णिग्जगती त्रिष्टुबेव च अनुष्टुप्पंक्तिरित्युक्ताः छंदांसि हरयो रवेः ७ मान
सोत्तरशैलेऽत्र पूर्वेणोवासवीपुरी दक्षिणेन यमस्यान्या प्रतीच्यां वरुणस्य च उत्तरेण च सोमस्य तासां नामानि मे शृणु ८ वस्वौकसारा शक्र
स्य याम्या संयमनी तथा पुरी सुखा जलेशस्य सोमस्य च विभावरी ९ काष्ठां गतो दक्षिणतः क्षिप्तेषुरिव सर्प्पति मैत्रेय भगवान्भानुर्ज्योति
षां चक्रसंयुतः १०॥

पिज्योतिश्चक्रवशात्प्रत्यहं मेरुं प्रदक्षिणीकुर्वतामपि नक्षत्राभिमुखी स्वकीया गतिरस्त्येव अस्थिरत्वां हृष्टानां भरणादौ दर्पणात् एतच्चात्र श्लोकव्याख्याने
स्फुटीभविष्यति ६ तत्र त्रय्यात्मनः सूर्य्यस्य गायत्र्यादिच्छंदोरूपेणायासो हयानाह हयाश्चेति पंक्तिरित्येतानि छंदांसि रवेर्हरयो हयाः उक्ताः इत्यन्व
यः ७ मेरोश्चतुर्दिशमुदयास्तमयाद्युपलक्षणभूतं पुरचतुष्टयमाह मानसोत्तरेति एवं इत्यादिभारतवर्षस्यातापेक्षया व्याप्ते पूर्वादि विभागस्य सू
र्यदर्शनापेक्षत्वेनानियमस्य वक्ष्यमाणत्वात्याम्या यमस्य पुरी ९ तत्र तावद्दैर्घ्यमवधीकृत्वा सूर्यस्य उदयास्तमनादिकं वक्ष्यन् त्रगायणे तस्य तमस्त
दिशं गतस्य दक्षिणतः परावृत्तिमाह काष्ठामिति दक्षिणतो याकाष्ठा तां गतः दक्षिणायनं प्रविष्टः सन् क्षिप्त इषुर्यथा तथा शीघ्रं गच्छति १०॥

ततश्चैवं द्वीप्रभृतिनास्वपुरीषु संक्रमणेनाहोरात्रव्यवस्थानकारणं रविर्भवति क्लेशानां रागादीनां संक्षये सति योगिनां क्रममुक्तिभाजां देवयानपरः
श्रेष्ठः अपुनरावृत्तिकः पन्थाश्च स एव भवति सूर्यद्वारेण ते विरजाः प्रयान्ति स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छतीत्यादिश्रुतेः ११ येन प्रकारेण
ह्नोरात्रादिव्यवस्थाकारणं रविस्तदाह दिवसस्येति पंचभिः यथाऽस्मिन्द्वीपे भारतवर्षे मध्याह्नकाले तदा योजनोच्छ्रितेष्वस्मिन्नितो ब्रह्मस्फुटं प्रज्ञानपेन
रविः एतनायथ त्वर्ततेनतथा सर्वकाल उदयास्तमयादिष्वपि सर्वद्वीपेष्वपि तीव्रैर्भूलग्नवद्दर्शनस्य मेदानपलादीनां चहर्णत्वादित्यवगन्तव्यम् य

अहोरात्रव्यवस्थानकारणं भगवान्रविः देवयानः परः पंथा
योगिनां क्लेशसंक्षये ११ दिवसस्य रविर्मध्ये सर्वकालं व्य
वस्थितः सर्वद्वीपेषु मैत्रेय निशार्द्धस्य च संमुखः १२ उ
दयास्तमने चैव सर्वकालेन संमुखे दिक्ष्वशेषासु मैत्रेय
तथैव विदिशासु च १३ यैर्यत्र दृश्यते भास्वान्स तेषामुदयः
स्मृतः तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः १४ नैवास्त
मनमर्कस्य नोदयः सर्वदा सतः उदयास्तमनाख्यं हि दर्शना

याह्नवायुः विद्रुरभावाद्वार्कस्य प्रोयत स्य विशेषितता रक्तत्वाच विशेषितत्वात् ।
कृतावाप्यनस्यतेति तथा यस्मिन्द्वीपवर्षादौ मध्याह्ने वर्ततेतदानन्तस्मानस्तनस्य द्वीपोत्तरादिषु जायमानस्य निशार्धस्यार्द्धरात्रस्य संमु
खो भवति १२ उदयास्तमने सर्वकाले भवतः ते च परस्परं संमुखे रवेः समानसूत्रस्थे भवतः १३ तत्र हेतुमाह यैर्यत्रेति स्प
ष्टोत्थूदयास्तमयौ सर्वदा मध्याह्ने एव सतोऽर्कस्य न स्तः एवं अतो रवेरुदयास्तमनाख्यं दर्शनादर्शनमात्रमेव १५ ॥ ॥

दर्शनादर्शनयोर्व्यवस्थामाह शक्रादीनामिति इंद्रायन्नतमस्पुरे मध्याह्नेतिष्ठंल्लंकेपुरं प्रभितः पुरद्वयं चेन्येवपुरद्वयं नद्रष्टुं तालस्यो द्वौ चविकर्णौ को
णोउदयाद्यवस्थाभिः स्पृशाति स्वरश्मिभिर्भासयतितथा विकर्णस्थः अग्न्याद्यन्तं तमसकोणेमध्याह्ने स्थितस्तत्कोणममितः स्थितेकोणद्वयं चेन्येवंद्वी
कोणनतत्तन्मध्यवर्तिनीद्वेचपुरेतथैवोदयाद्यवस्थाभिः स्पृशतिभूवलयस्यार्द्धं प्रतपन्सूर्य्य एतेतावद्दृदः अर्द्धं तत्र तद्दृश्यतेतावतीरात्रिरित्यर्थः
तथाहियैंद्रपुरेमध्याह्नेयदातिष्ठतितदासौम्यपुरस्थानास्तमयः ईशकोणस्थानां तृतीयोयामः अग्निकोणस्थानां प्रथमोयामः याम्यस्थितानामु
दयः एवंयदायाम्येमध्याह्नेतिष्ठतितदायैंद्रेऽस्तमयः अग्निकोणेतृतीयोयामः निर्ऋतिकोणेप्रथमोयाम वारुणेउदयः यदा च वारुणेमध्याह्नः
तदायाम्येऽस्तमयः नैर्ऋतिकोणेतृतीयोयामः वायव्येप्रथमः सौम्येउदयः यदा च सौम्येमध्याह्नः तदा वारुणेऽस्तमयः वायव्ये तृतीयोयामः ईश

शक्रादीनां पुरेतिष्ठन्स्पृशत्येषपुरत्रयम् विकोणे(कोणे) द्वौ विकर्णस्थः स्थितः कोणेतद्वे(पु)रे तथा १६ उदितो वर्द्धमानाभिरामध्याह्नात्तपन्
रविः ततः परं ह्रसंतीभिर्गोभिरस्तं नियच्छति १७ उदयास्तमयाभावस्तेपूर्वापरे दिशौ यात्रस्थ(?)रस्तमपतितावस्ते चपार्श्वयोः १८
अतेमरगिरेर्मेरोरूपरिब्रह्मणः सभाम् येयेमरीचयोर्कस्य प्रयांति ब्रह्मणः सभां तेतेनिरस्तास्तद्भासा प्रतीपमुपयांतिवै १९ ॥

नकोणेप्रथमोयामः ऐंद्रेउदयः एवमग्निकोणेयदामध्याह्नः तदा ईशानकोणेऽस्तमयः ऐंद्रपुरे तृतीयोयामः यमपुरे प्रथमः निर्ऋतिकोणे
उदयइत्यादियोज्यं एवं मेरोः सर्वतः परिभ्रमन्सूर्योर्द्धं भूवलयं प्रकाशयन्दर्शनादर्शनाद्यपेत्य याहोरात्रव्यवस्था कारणमित्युक्तं भवति १६
सत्रिगाथान(?)व्यवस्थानक्तमेव र(श्मी)नां हृद्धिर्ह्रासतो द्रुमं दत्वादिकमपीत्याह उदितइतिगोभिरश्मिभिः १७ दिग्विभागोप्युदयास्तमयनि
मित्तएवेत्याह उदयेति यत्रयस्योदेतिसानस्य पूर्वादिक् यत्रास्तमेतिसापरा प्रतीचीतथाचश्रुतिः तस्मात्समावादिमसर्वाः प्रजाः प्रसद्र(?)देतिन
स्मात्सर्वएवमन्यतेमां प्रत्युदगादितिपुरस्ताद्वयंतं सूर्य्यं पश्यतश्च दक्षिणवाममपार्श्वभागौदक्षिणात्तरेदिशाविति दर्शयन्नश्मिविस्तारोवधिमा
ह यावदिति तत्र दिव्य लोकालोकवलयपर्यंतंतपतीत्यर्थः १८ मेरावेव विशेषमाह अतइतिब्रह्मसभावर्ज्जंमेरोरूपर्युपरि सर्वत्रस्तपतिनत्त्व

वि पु॰
द्वि टी॰
१८

मेरोः सर्वतोपि विशेषेणोत्तरमाह तस्मादिति यतः यस्मात्सर्वेषां द्वीपानां वर्षाणां च मेरुरुत्तरतः व्यवस्थित तस्मान्मेरोरुत्तरो रुत्तरस्यां दिशि सदा दिवापि स्मृये
णोदिनेपि नित्यं रात्रिरेव स्वयंभावः मेरुप्रदक्षिणी कुर्वंतं सूर्यं ये यत्र पश्यंति सा च तेषां प्राची तेषां च वामभागे एव मेरुः अतः सर्वेषां सर्वदा मेरुरुत्त
तः एवं दक्षिणभावेव लोकालोकाचलः तस्मादुत्तरस्यां दिशि सदा रात्रिः दक्षिणस्यां च सदा दिनमिति यद्वा भारतादिवर्षस्थानां संमुखे सूर्ये यु
गुते य एव तामुत्तरस्यां दिशि वामभागे मेरोरेकतः सदादिनं ह्यन्यतश्च सदा रात्रिः दक्षिणभागे तु सदा दिनमेवेत्यर्थो उक्तं भवति २० उदयास्त
मयनिर्णयप्रसंगात्तत्कालानुगाग्निदीप्तेर्मिथःप्रलिंगमेव विशेषं वाह्लोकमग्निसूर्ययोः परस्परानुप्रवेशमुपासनार्थमाह प्रभेति वि भि: २१
वह्नेः पादश्च तथोष्णो दिने तु भानुं विशति अत एव तावन्मात्रप्रवेशाद्भानोरुष्णत्वं प्रदाहकत्वं वह्नेः प्रकाशदाहकत्वं च विशेषं तथा च श्रुतिर्ज्योति

तस्मादि पुत्तरस्यां वै दिवारात्रिः स देवहि सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतो यतः २० प्रभा विवस्वतो रात्रावस्तं गच्छति भास्करे।
विशत्यग्निमतो रात्रौ वह्निर्दूरात्प्रकाशते २१ वह्नेः पादस्तथा भानोर्दिनेष्वाविशति द्विज अतीव वह्निसंयोगादतः सूर्यः प्रकाश
ते २२ तेजसी भास्कराग्नेयी प्रकाशोष्णस्वरूपिणी परस्परानुप्रवेशादाप्यायेते दिवानिशं २३ दक्षिणोत्तरभूम्यर्द्धे समुत्तिष्ठति भास्क
रे आपो रात्रिं विशन्त्यम्भस्तमः प्रकाशशीलवत् २४ आताम्रा हि भवन्त्यापो दिवानक्तप्रवेशनात् दिवं विशति चैवाम्भो भास्करेस्तमुपे

ज्योतिरग्निः स्वाहेत्येव सायं होतव्यं सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति युषि तस्माच्छुक्लीभवन्त्यापो नक्तमह्नः प्रवेशनात् २५
न हि विशेषेश्रूयते अग्निं वावादित्यः सायं प्रविशति तस्मादग्निर्दूरान्नक्तं ददृशे तं वा आदित्यमग्निरनुसमारोहति तस्माद्धूम एवाग्निर्दिवा ददृशे इति।
२२ प्रदोषात्र प्रसंगात्तयोरप्सु प्रवेशमुपासनार्थमाह दक्षिणेति मेरोर्दक्षिणभूम्यर्द्धे भास्करे समुत्तिष्ठति सति दिनेन तमःशीला रात्रिरंभः
प्रविशति मेरोरुत्तरभूम्यर्द्धे च भास्करे तिष्ठति रात्रौ प्रकाशशीलमहरंभो विशतीत्यर्थः प्रकाशं प्रकाशकत्वं २४ यतदेवोपपादयति आ
ताम्रा हीति सार्धेन आर्द्रीभवन्त्यापः दिवा दिने नक्तप्रवेशनात् रात्रेः प्रवेशादित्यर्थः अस्तमुपेयुषि अस्तंगते रात्रौ तथा च श्रुतिः यद्वै दिवा
भवत्यपो रात्रिः प्रविशति तस्मात्ताम्रा आपो दिवा ददृशे यन्नक्तं भवत्यपोहः प्रविशति तस्माच्छुक्ला आपो नक्तं ददृश इति २५ ॥

एवं मेरुं प्रदक्षिणीकुर्वतो रवेर्मुहूर्तगम्ये मार्गे कथमुत्तरायणविषुवद्दक्षिणायनगतिभिरहोरात्राणां दैर्घ्यसाम्यलघुत्वानि निरूपयति एवमित्यादिना उत्तरा
गतिरित्यतः पुष्करेणेत्येन पुष्करद्वीपमध्येन चक्राकारभूतमानसोत्तरपरिमंडलोपलक्षितायां मेदिन्यास्त्रिंशद्भागं विषयं यदा याति तदा मुहूर्त
संबंधिनी गतिः तदाहवायुः नवकोट्यः समाख्याता योजनैः परिमंडलं तथा शतसहस्राणि चत्वारिंशच्च पंच च अहोरात्रात्पतंगस्य गतिरेषा विधीय
ते चत्वारिंशच्च पंच चेति वक्ष्यात षट्लक्षाणि यानि मन्वयापरिमंडलापेक्षैः किंच पूर्णाः शतसहस्राणामेकत्रिंशत्तु ताः स्मृताः पंचाशत्तु तथा।
न्यानि सहस्राण्यधिकानि च मौहूर्तिकी गतिर्येषा सूर्यस्य तु विधीयते इति त्र्यधिकानि चेति विंशतिसहस्राणीति शेषः २६ जंतोः कुलालचक्र ।

एवं पुष्करमध्येन यदा याति दिवाकरः त्रिंशद्भागं तु मेदिन्यास्तदा मौहूर्तिकी गतिः २६ कुलालचक्रपर्यंतो भ्रमन्नेष दिवाकरः ।
करोत्यहस्तथा रात्रिं विमुंचन्मेदिनीं द्विज २७ अयनस्योत्तरस्यादौ मकरं याति भास्करः ततः कुंभं च मीनं च राशे राश्यंतरं द्विज २८
त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम् प्रयाति सविता कुर्वन्नहोरात्रं ततः समं ततो रात्रिः क्षयं याति वर्द्धतेनुदिनं दिनं २९ ततश्च मिथु
नस्यांते परां काष्ठामुपागतः राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनं ३० कुलालचक्रपर्यंतो यथा शीघ्रं प्रवर्तते दक्षिणप्रक्रमे सूर्य।
स्तथा शीघ्रं प्रवर्तते ३१ अतिवेगितया कालं वायुवेगबलाच्चरन् तस्मात्प्रकृष्टां भूमिं तु कालेनाल्पेन गच्छति ३२ ॥

संवद्धत्वात्कुलालचक्रपर्यंते स्थितो जंतुर्यथा शीघ्रं याति तद्वत् दक्षिणायनावसाने ज्योतिश्चक्रावसाने भ्रमं स्वैकैकमुहूर्तेन मेदिन्यास्त्रिंशद्भागं विमुंचन्
क्रमेणोत्तरायणमारभ्याहस्तथा रात्रिं च पूर्ववैपरीत्येन करोति ३० तदेव प्रत्यहमहर्वृद्ध्या रात्रिह्रासेन च दर्शयन्नाह अयनस्येति सार्द्धद्वाभ्यां २८
उत्तरायणमध्य एवमेव राशिं विषुवत्संबंधिनीं गतिं ततो विषुवदनंतरम् २९ दक्षिणायने त्वक्रमात्संरात्रेश्च वृद्धिं दर्शयितुमाह ततश्चेति सार्द्धैः
श्लोकैः परां काष्ठां उत्तरायणस्यांतं कुलालचक्रपर्यंते स्थितो जंतुर्यथा शीघ्रं याति ३१ कालं कालोपलक्षणं मार्गम् ३२ ॥

ऋक्षाणां त्रयोदशार्द्धं सार्द्धत्रयोदशनक्षत्रोपलक्षितं ज्योतिश्चक्रार्धमित्यर्थः तावदृक्षाणि सार्धत्रयोदशनक्षत्राणि नक्तं रात्रावष्टादशभिश्चरन् इदं च द्वादशाष्टा
दशमुहूर्तत्वमहोरात्रयोर्देशविशेषापेक्षयोक्तं न सर्वत्रेति ज्ञेयं ३३ उत्तरायणे त्वहोरात्रयोः पूर्ववैपरीत्यं दर्शयति कुलालचक्रमध्यस्थ इति सार्द्धैस्त्रि
भिः मध्यस्थः नाभिनेम्यंतरालस्थः ३४ उत्तरायणपश्चिमे अंत्ये दिने ३५ ध्रुवस्य तत्र गतिवैषम्यं नास्तीत्याह अत इति द्वाभ्यां कुलालचक्रे

सौम्ये द्वादशभिः शैघ्र्यान्मुहूर्तैर्दक्षिणायने त्रयोदशार्द्धमृक्षाणामह्ना तच्चरति द्विज मुहूर्तैस्तावदृक्षाणि नक्तमष्टादशैश्चरन् ३३ कु
लालचक्रमध्यस्थो यथा मन्दं प्रसर्पति तथोदगयने सूर्यः सर्पते मन्दविक्रमः ३४ तस्माद्दीर्घेण कालेन भूमिमल्पां तु गच्छति
अष्टादशमुहूर्तं यदुत्तरायणपश्चिमे ३५ अहर्भवति तत्रापि चरते मन्दविक्रमः त्रयोदशार्द्धमह्ना तु ऋक्षाणां चरते रविः मुहूर्तै
स्तावदृक्षाणि रात्रौ द्वादशभिश्चरन् ३६ अतो मन्दतरं ताभ्यां चक्रं भ्रमति वै यथा मृत्पिण्ड इव मध्यस्थो ध्रुवो भ्रमति वै तथा ३७ कु
लालचक्रनाभिस्तु यथा तत्रैव वर्तते ध्रुवस्तथा हि मैत्रेय तत्रैव परिवर्तते ३८ उभयोः काष्ठयोर्मध्ये भ्रमतो मण्डलानि तु दिवा नक्तं
च सूर्यस्य मन्दा शीघ्रा च वै गतिः ३९ मन्दाह्नि यस्मिन्नयने शीघ्रा नक्तं तदा गतिः शीघ्रा निशि यदा चास्य तदा मन्दा दिवा गतिः ४०
एकप्रमाणमेवैष मार्गं याति दिवाकरः अहोरात्रेण यो भुङ्क्ते समस्ता राशयो द्विज ४१ षडेव राशयो भुङ्क्ते रात्रावन्यांश्च षड् दिवा
राशिप्रमाणजनिता दीर्घह्रस्वात्मता दिने तथा निशायां राशीनां प्रमाणैर्लघुदीर्घता ४२॥

ताभ्यां मन्दतरं यथा भ्रमति अन्तस्तत्रस्थो मृत्पिं
डोऽपि यथा मन्दतरमेव भ्रमति तथा ज्योतिश्चक्रनाभिः तत्रस्थो ध्रुवश्च ३७ यथा च नाभेस्तत्रैव परिवृत्ते नाभिस्थो मृत्पिण्डस्तत्स्थानं न त्यजति ।
तथैव ध्रुवः परिभ्रमन्नपि तत्स्थानं न त्यजतीत्यर्थः ३८ एवं तावत्तत्र मुहूर्तभेदेनाहोरात्रयोर्वैचित्र्यमुक्तं इदानीं तदेव राशिभागवशात्तत्प्रपंचयन्ना
ह उभयोरिति षड्भिः ३९ अहोरात्रगमनमार्गस्य समानत्वेऽपि राशिप्रमाणभेदात्तद्वैचित्र्यं घटत इत्याह एकप्रमाणमेवेति राशयः राशीनित्यर्थः ४२ ॥

राशिप्रमाणमेदस्याहोरात्रवैचित्र्ये हेतुत्वमाह दिनादेरिति तद्योगेनैव राशिभोगेनैव ज्योतिश्चक्रस्याहोरात्रयोः सपादनक्षत्रद्वयात्मकाराशयः केको
राशिः तत्र वृषभयोर्मीनमेषयोः कुम्भवृषयोः कर्कमेषयोः ततः किंचिद्दीर्घौ मकरमिथुने ततः किंचिद्दीर्घौ सिंहवृश्चिकौ दीर्घतमौ कर्कचापे दीर्घतमे समेक
याने स्थितत्वात्कोनांतराशिसमारम्भवृषाच्छिदे चन्द्रदर्शनकालो दिनं इतरराशिषट्कदर्शनकालो रात्रिः तदा चराशिप्रमाणाधीनौ दिनरात्रि
वृद्धिह्रासावित्यादि स्थितिः प्राकृत्यशक्रियाविशेषाणाविरुद्धावान्तरसंधेयेति मन्दाहृयस्मिन्नयनेऽस्मिन्ननेनोक्तं गतिवैचित्र्यं विशेषतादशयति
उत्तरहति ४३ अहोरात्रप्रसंगाद्यत्रयोः संध्योकार्यसंध्योपास्त्यादिकं वक्तुमाह उषाइत्यादिनापालेनोयनइत्येनेन श्रुत्वा क्रतिसयुक्ताउषायुषि

दिनादेर्दीर्घह्रस्वत्वं तद्योगेनैव जायते उत्तमे प्रक्रमे शीघ्रानिशि मन्दागतिर्दिवा दक्षिणेत्वयने चैव विपरीता विवस्वतः ४३
उषा रात्रिः समाख्याता युषिश्चाप्युच्यते दिनं प्रोच्यते च तयोः संध्या उषायुष्योर्यदन्तरं ४४ संध्याकाले च संप्राप्ते रौद्रे परमदारुणे
मंदेहा राक्षसा घोराः सूर्यमिच्छन्ति खादितुं ४५ प्रजापतिकृतः शापस्तेषां मैत्रेय रक्षसां अक्षयत्वं शरीराणां मरणं च
दिने दिने ४६ ततः सूर्यस्य तैर्युद्धं भवत्येवातिदारुणं ततो द्विजोत्तमास्तोयं यत्क्षिपंति महामुने ४७ ॐकारब्रह्मसंयुक्तं गाय
त्र्या चाभिमंत्रितं तेन दह्यंति ते पापा वज्रीभूतेन वारिणा ४८ अग्निहोत्रे हूयते या समंत्रा प्रथमाहुतिः सूर्यो ज्योतिः सहस्रां
शुः सूर्यो दीप्यति भास्करः ४९ ॐकारो भगवान्विष्णुस्त्रिधामा वचसां पतिः तदुच्चारणतस्ते तु विनाशं यांति राक्षसाः ५०

शब्दो प्रसन्नत रात्रिदिनपरावित्याहउषाइति रात्रिर्वा उषा अहर्व्युष्टिरिति श्रुतेः ४४ तत्र संध्योपास्तिमकुर्वतः सूर्यहत्यादोषः स्यादिति तं
दर्शयितुमादौ र्वकं संध्योपास्तिप्रकारमाह संध्याकालेति त्रिभिः ४५ प्रजापतिकृतो वरोपि दुःखफलत्वाच्छाप उच्यते तथा च श्रुतिः रक्षां
सि ह वा पुरोनुवाके तपोग्रमतिष्ठंत तान् प्रजापतिर्वरेणोपामंत्रयत तानि वरमवृणीतादित्यो नो योद्धा इति तान्प्रजापतिरब्रवीद्योधयध्वमिता
दि ४६ दह्यंतिदह्यंतेहि ते पापिष्ठेनवारिणा ४८ एवं वैवजयस्तानाहोमादौ विप्रकर्षमाह अग्निहोत्रेइति सूर्यो ज्योतिरितिमंत्रेणाग्निहोत्रमंत्र
प्रतीकोक्तिः ४९ त्रिधामा त्रीणि ऋग्यजुःसामरूपाणि धामानि तेजांसि स्वरूपाणि वा यस्य सः अतएव वचसां वेदानां पतिः तथा च श्रुतिः सेषा त्रयी

वि० प्र०
द्वि० टी०
२०

ॐकारोच्चारणाद्ब्रसानां नाशो ऽस्तेत्याह वैसर्वेशाश इति द्वाभ्यां प्रसिद्धं वै निर्विकारं तत्प्रेरकः तत्सज्ज्योतिषो ऽस्त्येव प्रवर्तक तत्प्रेरकमिति पाठे स
ॐकारः प्रेरकोऽयस्योत ज्योतिषः तत्प्रेरकं ५१ तेन हेतुना प्रत्यानीति पाठे पापात्मकानीत्यर्थः रक्षोवधे सहकारित्वात् ५२ अथ कालगणनापूर्व
कं संध्याकालनिर्णयमाह काष्ठेति द्वाभ्यां ५५ अहर्भागौ प्रातरादिभिः सह दिवसानां ह्रासे वृद्धौ वत ज्ञानामपि ह्रासवृद्ध्योरवश्यंभावित्वात् संध्या
तन्मुहूर्तमात्रमर्थो दयात्पूर्वं प्रातः संध्या नाडीद्वयप्रमाणा मुहूर्तमया नेतरे सायं संध्या नाडीद्वयप्रमाणैवेत्यर्थः ॥ ५६ प्रातराद्यहर्भागानाह ।

वैसर्वेशः परं सूर्यो योऽतः ज्योतिरसंज्ञवे अभिध्यायक ॐकारस्तस्य संप्रेरकः परः ५१ तेन संप्रेरितं ज्योतिरोंकारेणाथ दीप्तिमत् ।
दहत्यशेषरक्षांसि मंदेहाख्यानि तानि वै ५२ तस्माल्लंघनं कार्यं संध्योपासनकर्मणः स हंति सूर्यं संध्यायां नोपास्तिं कुरुते तु यः
५३ ततः प्रयाति भगवान्ब्राह्मणैरभिरक्षितः वालखिल्यादिभिश्चैव जगतः पालनोद्यतः ५४ काष्ठानिमेषादशपंच चैव त्रिंशच्च काष्ठा
गणयेत्कलां च त्रिंशत्कलाश्चैव भवेन्मुहूर्तस्तैस्त्रिंशता रात्र्यहनी समेते ह्रासश्च वृद्धौ त्वहर्भागैर्दिवसानां यथाक्रमं संध्यामुहूर्तमात्रा
वै ह्रासवृद्धौ समा स्मृता ५६ ॥ लेखाप्रभृत्यथादित्ये त्रिमुहूर्तगते तु वै प्रातः स्मृतस्ततः कालो भागश्चाह्नः स पंचमः ५७ तस्मात
प्रातस्तनात्कालात्त्रिमुहूर्तस्तु संगवः मध्याह्नस्त्रिमुहूर्तस्तु तस्मात्कालात्तु संगवात् ५८ तस्मान्मध्याह्नकालात्तु अपराह्ण
इति स्मृतः त्रय एव मुहूर्तास्तु कालभागः स्मृतो बुधैः अपराह्णे व्यतीते तु कालः सायाह्न एव च ५९ दशपंचमुहूर्ताह्ने
मुहूर्तास्त्रय एव च दशपंचमुहूर्तं वै अहर्वैषुवतं स्मृतम् ६० ॥

द्विहासौ वृद्धौ तेषां यद्भवन्ति वैषुवतं मानं तावदाह लेखेति सा
ध्वैस्त्रिभिः अर्थोदयात्र लेखा ता मारभ्य प्रत्येकं त्रिमुहूर्तत्रयेण प्रातरादिरेकैकः कालः तथा च स्मृतिः मुहूर्तत्रितयं प्रातस्तावानेव तु संगवः म
ध्याह्नस्त्रिमुहूर्तः स्यादपराह्णोपि तादृशः सायाह्नस्त्रिमुहूर्तस्तु सर्वकर्मसु गर्हित इति ५७ पतेच त्रिमुहूर्ताः पंचभागाः दशपंचमुहूर्ताहे विश
वारीके क्रिम भवंति अन्यत्र तु मुहूर्तास्त्रय एव क्रमेण ह्रासवृद्धि ह्रासे गोचरभवतीति शेषः ६० पतत्प्रपंचयति दशपंचमुहूर्तमिति सार्द्धैस्त्रिभिः ६० ॥

शरद्वसंतयोर्मध्ये इति आश्विनकार्त्तिकौ शरत् तयोर्मध्ये तत्साद्यं विषुवं भवति चैत्रवैशाखौ वसंतः तयोर्मध्ये मेषाद्यमित्यर्थः ९२ अथ सूर्यगति
प्रसंगात् तत्कृतं संवत्सरादिपंचकं वक्तुमाह त्रिंशदिति सार्द्धैस्त्रिभिः लोकप्रसिद्धैः सावनैर्दिनैः पक्षमासैरवसिद्धाः अहश्च विप्रकर्षाद्र्कजाय
वदितादयोऽलक्ष्यन्ते मुर्कगत्यैव ऋतुत्वपनाद्यभिधानात् ९४ चान्द्रमासविकल्पिता इति दर्शाद्दर्शान्तः त्रिंशद्दिवसस्तु सावनो मासः सौरोऽर्क
राशिः नाक्षत्रेन्दुसमेत्यल्लनद्गतैव लक्षणाश्चान्द्रसावनसौरनाक्षत्रैश्चतुर्विधैर्मासैर्विविधतया कल्पिताः पंचसंवत्सरादयः एकेषु युगे सावनेन वा
पि सौरेण चान्द्रेण नाक्षत्रेणैव च चत्वार्येतानि नामानि ये युगे प्रविभज्यन्ते इति वृद्धगर्गोक्तेः सर्वकालस्य मलमासादेर्निश्चयः निर्णयहेतुः त

वर्द्धते ह्रसते चैवाप्ययने दक्षिणोत्तरे अहस्तु ग्रसते रात्रिं रात्रिर्ग्रसति वासरं ९१ शरद्वसंतयोर्मध्ये विषुवं तद्विभाव्यते तुला
मेषगते भानौ समरात्रिदिनं तु तत् ९२ कर्कटाद्यवस्थिते भानौ दक्षिणायनमुच्यते उत्तरायणमप्युक्तं मकरस्थे दिवाकरे ९३
त्रिंशन्मुहूर्तं कथितमहोरात्रं तु यन्मया तानि पंचदशाब्दानि पक्ष इत्यभिधीयते ९४ मासः पक्षद्वयेनोक्तो द्वौ मासौ चार्कजावृतुः
ऋतुत्रयं चाप्ययनं द्वे ये नेवर्षसंज्ञिते ९५ संवत्सरादयः पंच चतुर्मासविकल्पिताः निश्चयः सर्वकालस्य युगमित्यभिधीयते
९६ संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः इद्वत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः ९७ वत्सरः पंचमस्तत्र कालोऽयं युगसंज्ञितः
यः श्वेतस्योत्तरः शैलः शृंगवानिति विश्रुतः ९८ त्रीणि तस्य तु शृंगाणि यैरयं शृंगवान्स्मृतः दक्षिणं चोत्तरं चैव मध्यं वैषुवतं त
था शरद्वसंतयोर्मध्ये तद्भानुः प्रतिपद्यते ९९ ॥

यादि यदा शृंगे प्रतिपद्येत कस्मिन्नवत्ने च चन्द्रेण सह स्थिते सूर्ये संक्रान्तिर्भवति तदा चतुर्विधमासा युगप्रवर्तन्ते तदा च सौरमासेन वर्षे षड्
दिनानि वर्द्धन्ते ह्रसन्ति चान्द्रमासेन षड् दिनानि एवं चन्द्रार्कयोर्व्यवधानतारतम्यात् संवत्सरात्मके युगे सौराः षष्टिर्मासाः सावना एकष
ष्टिः नाक्षत्राः सप्तषष्टिः तन्मध्ये च मलमासद्वयं भवतीत्येवं सर्वकालनिश्चयो भवति तत्र षष्ठे वर्षे तथैव चन्द्रार्कयोर्योगाद्युगमित्य
भिधीयत इत्यर्थः ९८ अथ शृंगवतः संस्थानकथनपूर्वकं विषुवत्कालं लक्षयति यः श्वेतस्येति सार्द्धैस्त्रिभिः ९८ ९९ ॥

विषु॰
टी॰
२१

तेषु तिमेषतुलयोः प्रथमदिनेऽभयं स्वस्वराशिस्थ ७० इदानीं मेषाख्यं विषुवाख्यं कालं नत्वा शास्त्रं वाह प्रथम इति चतुर्भिः प्रथमे कृत्तिकाभागे मेषान्ते विशाखानां चतुर्थे शेषे वृश्चिकोपक्रमे तदा सूर्यो स्वे संख्यायां हि तिष्ठति ७१ तदा चन्द्रार्कयोः स्थितिरूपा राशिव्यवस्थाने विषुवावस्थिति इत्येवं महाविषुवे विशाखानां तृतीयकमंशं तत्र तोने कृत्तिकाशिरसि मेषान्ते चेद् इत तदा विजानीयात् ७२ नहि सोपि न थैव महाविषुवाख्यः पुण्यकालश्चैव च कदाचिदेव भवति न सर्वदा ७३ तस्मादति विशिष्टमेतत् सदा नजे मुखं दानां यं ज्ञात्वा विवृतं देवादीनां मुखं मखमेतत्र दैवतमिति वाष्टेन्नेः अस्मिन्काले दत्तं साक्षाद्देवादीनां मुखे हुतं भवतीत्यर्थः ७४॥ पुण्यकालप्रमेयायामाह पुण्यकालज्ञापनार्थं अहोरात्रादिविभागः

मेषादौ च तुलादौ च मेषे च यद् विषुवतः स्थितः तदा तत्स्यमहोरात्रं करोति तिमिरापहः दशपञ्चमुहूर्तं वै तद्दिनेऽभयं स्मृतं ७०
प्रथमे कृत्तिकाभागे यदा भास्वांस्तदा शशी विशाखानां चतुर्थे शेषे न तिष्ठत्संशयं ७१ विशाखानां यदा सूर्यश्चरत्यंशं तृतीयकं तदा चन्द्रं विजानीयात्कृत्तिकाशिरसि स्थितं ७२ तथैव विषुवाख्योऽयं कालः पुण्योऽभिधीयते तदा दानानि देयानि देवेभ्यः प्रयतात्मभिः ७३ ब्राह्मणेभ्यः पितृभ्यश्च मुखमेतत्तु दानजं तत्र दानस्य विषुवे कृतकृत्योऽभिजायते ७४॥ अहोरात्राद्ध मासौ तु कलाकाष्ठादयस्तथा पौर्णमासी तथा ज्ञेया अमावास्या तथैव च सिनीवाली कुहूश्चैव राका चानुमतिस्तथा ७५ तपस्तपस्यौ मधुमाधवौ च शुक्रः शुचिश्चायनमुत्तरं स्यात् नभो नभस्योऽथ इषस्तथोर्जः सहः सहस्याविति दक्षिणं स्यात् ७६ लोकालोकस्तु यः शैलः प्रागुक्तो भवतो मया लोकपालास्तु चत्वारस्तत्र तिष्ठन्ति सुव्रता। ७७॥

सम्यग्ज्ञातव्यमित्याह अहोरात्रेति सार्द्धेन दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहूरिति तावमावास्याभेदौ पूर्णचन्द्रा राका कलाहीनचन्द्रानुमतिरिति पौर्णमासीभेदौ ७५ उत्तरायणं चाप्ययनमित्यनेनोक्रमयतद्दयं विविच्याह तप इति माघादिहिहिमासेऽत्तरायणं। श्रावणादिहिहिमासे दक्षिणायनमित्यर्थः यत उत्तरायणं दृष्टं वोक्तं ७६ लोकालोकोत्तर शृङ्गादसाध्यस्थानाधिपत्यानादिकं कथयिष्यन् प्रथमं तावदुद्दिश्यां शैलं लोकपालानाह लोकालोकइतित्रिभिः तदुक्तमास्य लोकपालास्थितांश्चेन लोकालोके च तदिग्भागेऽग्रे यद

तत्रापि पितृयानमाह उत्तरमिति सार्द्धैः पंचभिः तत्र ज्योतिश्चक्रे वीथीक्रमो वायुनोक्तः सर्वग्रहाणां त्रीण्येव स्थानानि द्विज सत्तम स्थानं जारद्गवं मध्यं तथैरावतमुत्तरं वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्वतः तदेवमध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते तत्राद्ये त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयं आर्षभी गोवीथी जारद्गवी चेति वैश्वतमध्यममार्गे वीथीत्रयं अजवीथी मृगवीथी वैश्वानरी चेति दक्षिणमार्गे वीथीत्रये तदुक्तं तत्रैव अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते तथा द्वे चापि फल्गुन्यौ मघा चैवार्षभी मता हस्तः चित्रा तथा स्वाती गोवीथीति तु शब्दिता ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते मूला।

स्वधामानां संत्यजन्त्येव कर्दमस्यानुगा द्विज द्विरप्ये शोमाश्चैवान्ये स्वस्थाः केतुमानपि ७८ निर्द्वन्द्वा निरभिमाना निःस्नेहा स्तिष्ठन्ति शत्रवः लोकपालाः स्थिता ह्येते लोकालोके चतुर्दिशं ७९ उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणं पितृयानः स वै पन्था वैश्वानरपथाद्बहिः ८० तत्रासते महात्मान ऋषयो येऽग्निहोत्रिणः भूतारंभकृतं ब्रह्म शंसंतो ऋत्विगुद्यताः ८१ प्रारभन्ते तु ये लोकास्तेषां पन्थाः स दक्षिणः चलितं ते पुनर्ब्रह्म स्थापयन्ति युगे युगे ८२ ॥

षाढोत्तराषाढा अजवीथ्यभिशब्दिता श्रव णं धनिष्ठा च मार्गी शततभिषक्तथा वैश्वानरी भाद्रपदे रेवती चैव कीर्तिता एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते इति याम्या भरणी श्रुतिस्थादितिर्देवता का पुनर्वसुः मार्गी मृगवीथीयं वं स्थिते अगस्त्यादुत्तरमजवीथ्याश्च दक्षिणं अगस्त्यस्थानिकटवर्तितो वैश्वानरपथाद्बहिः वैश्वानरवीथीं वर्जयित्वा मृगवीथीमात्रं पितृयानमित्यर्थः ८० भूतारंभः प्रजोत्पादनं कृतं कृतिः कार्यं यस्य तद्ब्रह्म वेदं शंसंतः अग्निहोत्रिकर्मविधायकवेदभागं स्तुवंतः ऋत्विग्युद्यताः युगांतरे यज्ञ विच्छेदे सति प्रवृत्त्यभावे तथा यज्ञानुष्ठानायोद्यताः कर्माणि प्रारंभंत इत्यर्थः ८१ चलितं विच्छिन्न

वि॰ पु॰
टी॰
२२

सेतत्ताव शाश्वतेतेनमर्यादाभिः वर्णाश्रमादिधर्मव्यवस्थाभिः कृतेन शास्त्रप्रवर्तितेन वयं पूर्वे पितरः पश्चिमानां पुत्राणां पश्चिमाः पुत्राश्च पूर्वेषां स्वपुत्र
त्वेनोत्पन्नानां पितृत्वेनानियतेषु केनचिद्दैवेन स्वाधिकारवशाज्जायन्ते पिता पुत्रेणापितृमान्स्यादिति योनाविति श्रुतेः तथा च वायुः आद्ये त्रेतायुगे
वैवस्वतः सप्तर्षयश्चेह प्रवर्तयन्ति तान्वर्णाश्रमांश्च पृथक्पृथक् तेषामेवान्वये धीरा उत्पद्यन्ते पुनः पुनः जायमानः पिता पुत्रे पुत्रः पितरि
वैवदि एवमावर्तमानास्ते हापरेषु पुनः पुनः कल्पानां भाव्यविद्यानां तान शास्त्रहानं तस्य येइति ८३ सवितुर्दक्षिणं धूमादिमार्गं श्रिता
कृतिश्च मध्ये ग्रामस्थाः प्रत्यूते दग्निमुपासते ते धूममयि संभवंति धूमाद्रात्रिं रात्रेरपरपक्षीयमाणपक्षमित्यादि ८४ देवयानमाह नाग

संततत्यानपसावेवमर्यादाभिः कृतेनच जायमानास्तु पूर्वे च पश्चिमानां गृहेषु वै ८३ पश्चिमाश्चैव पूर्वेषां जायन्ते निधनेषि
ह एवमावर्तमानास्ते तिष्ठंति नियतव्रताः सवितुर्दक्षिणं मार्गं श्रिता ह्याचन्द्रतारकं ८४ नागवीथ्युत्तरं यच्च सप्तर्षिभ्य
श्च दक्षिणं उत्तरः सवितुः पंथा देवयानश्च संस्मृतः ८५ तत्र ते वशिनः सिद्धा विमला ब्रह्मचारिणः संततिं ते जुगुप्संति
तस्मान्मृत्युर्जितस्तु तैः ८६ अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसां उदक्पंथानमर्यम्णः स्थितान्याभूतसंप्लवं ८७
तेसंप्रयोगाल्लोभस्य मैथुनस्य च वर्जनात् इच्छाद्वेषाप्रवृत्त्या च भूतारंभविवर्जनात् ८८ पुनश्चाकामसंयोगाच्छब्दादेर्दो
षदर्शनात् इत्येभिः कारणैः शुद्धास्तेमृतत्वं हि भेजिरे ८९ आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते त्रैलोक्यस्थितिकालोय
मपुनर्मार उच्यते ९० ॥

वीथीति षष्ठः उत्तरमार्गस्योत्तरावीथी नागवीथी तस्या उत्तरं सप्तर्षिभ्यदक्षिणतः सप्तर्षिभ्य देवयानः पंथाः ८५ वशिनः जितेंद्रियाः ८६ अर्य
म्णः सवितुरुदक्पंथानं उत्तरं मार्गं स्थिताः श्रितानि शाकारश्छांदसः ८७ लोभस्यासंप्रयोगात् तृष्णाविपोगात् इच्छाद्वेषाभ्यामप्रवृत्त्या च कर्माकर
णेन ८८ पुनश्चकामसंयोगात् योगभ्रंशाभावात् अमृततत्वममृतहारभूतं चिरकालावस्थायित्वं भेजिरे ८९ नदाहस्माभूतसप्लवमिति आ
भूतः पर्यंतं यत्स्थानं तेन देवामृतत्वमपवादाउच्यते उपचारबीजमाह त्रैलोक्येति अपुनर्मारः पुनर्मृत्युरहितः क्रममुक्तिस्थानत्वादिति भावः

२२

भूतसंप्लवांतस्थानोक्तिप्रसंगादन्यदप्याह ब्रह्महत्याश्वमेधाभ्यां पापपुण्यं चनतत्कृतः नत्रिमित्तो विधिः द्वितीयेनास्मिन्फलमिति विधिः फल।
भोगकालः तमेवाह आभूतसंप्लवांतमिति भूतसंप्लवद्वयोपोतः प्रलयः तत्पर्यंतं तयोः पापपुण्ययोः फलमुक्तमित्यर्थः यद्वा ब्रह्महत्याश्वमे।
धाभ्यां उपलक्षितयोः पापपुण्ययोर्वतत्कृतः तंभो यं फलभोगकाल इत्यर्थः अवधिरिति पाठेपि तावानेवार्थः ९१ सप्तर्षिभ्यो दक्षिणतो देवयानस्थितिरु
क्ता तदेवोत्तरतो विष्णुपदस्थितिमाह ऊर्ध्वेति यावत्समाप्ति ऊर्ध्वं तदुपरि तदुत्तरेव सप्तर्षिभ्यस्तदुत्तरस्यां दिश्यूर्ध्वं यत्र ध्रुवस्तिष्ठति तद्ध्रुवस्याश्रय
भूतं विष्णुपदाख्यं भूम्यपेक्षया दिव्यं तृतीयं स्थानमित्यर्थः ९३ तद्धि वैनामस्यप्रदयनाडीस्थानं अनन्तरं तत्र योगिनां विष्णोः स्थाने अन्तः क्रमम्

ब्रह्महत्याश्वमेधाभ्यां पुण्यपापकृतो विधिः आभूतसंप्लवांतं तत्फलमुक्तं तयोर्द्विज ९१ यावन्मात्रे प्रदेशे तु मैत्रेयावस्थितो ध्रुवः
क्षयमायाति तावत्तु भूमेराभूतसंप्लवे ९२ ऊर्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्र व्यवस्थितः एतद्विष्णुपदं दिव्यं तृतीयं व्यो
म्नि भास्वरं ९३ निर्धूतदोषपंकानां यतीनां संयतात्मनां स्थानं तत्परमं विप्र पुण्यपापपरिक्षये ९४ अपुण्यपुण्योपरमे क्षीणा
शेषार्तिहेतवः यत्र गत्वा न शोचन्ति तद्विष्णोः परमं पदं ९५ धर्मध्रुवाद्यास्तिष्ठन्ति यत्र ते लोकसाक्षिणः तत्सार्ष्ट्योत्पन्नयोगेद्धाः
तद्विष्णोः परमं पदं ९६ यत्रोतमेतत्प्रोतं च यद्भूतं सचराचरं भाव्यं च विश्वं मैत्रेय तद्विष्णोः परमं पदं ९७ दिवीव चक्षुराततं
योगिनां तन्मयात्मनाम् विवेकज्ञानदृष्टं च तद्विष्णोः परमं पदं ९८ ॥

क्तिस्थानमपि तत्साधनानां कस्यावन्तेन वर्णयति निर्धूतदोषेति पंचभिः ७४ क्षीणाशेषार्तिहेतवो येषां ते ९५ तत्सार्ष्ट्यो
त्पन्नविष्णुसमानैश्वर्येणाद्धिः यातिवर्णीकारसामर्थ्येनोत्पन्नो योगः समाधिः तेनेद्धाः दीप्ताः ये ध्रुवादिस्थिता योगयोगादैश्वर्यमिष्य
ते कथं विज्ञायपद्यत इति हरि वेशोन्तेः ९६ दिवि आततं सर्वप्रकाशकं सूर्यरूपं चक्षुरिव महात्मनां विततं सर्वभासकत्वेन प्रत।
तं विवेकज्ञानेन प्रपंचवैलक्षण्यज्ञानेन दृष्टं च अपरिच्छिन्नतया ज्ञातमित्यर्थः अनेन च तद्विष्णोरिति मंत्रार्थः सूचितः ९८ ॥

वि॰पु॰
टीका
२२

ततो ध्रुवमेकं तत्तेजो तं चेत्यनेनेन विश्वस्य कारणमाश्रयश्चोक्तं इदानीं ध्रुवाश्रयत्वेन तद्द्वारा विश्वपोषकत्वमाह यस्मिन्निति चतुर्भिः भास्वान् तेजस्वी अम्भोमुचो मेघाः ९९ वृष्टेः सृष्टेः तेनौषधिद्वारा सृष्टेः पोषणं वृद्धिः आप्यायनं च तृप्तिः १०० वृष्टेः कारणतां यान्तीति पतन्तु जङ्गमी ततः देवान्भावयतानेन ते देवा भावयन्तु वः परस्परं भावयन्तः श्रेयः परमवाप्स्यथेति १०१ विष्णुपावनत्वं च विष्णोः पदस्य पोषयन्नाह ततः इत्या दिना ततः विष्णुपदस्थानाद्गङ्गा प्रवर्तते भवति त्रिविक्रमपदाङ्गुष्ठनखाग्रसम्भवोद्भवत्वात्ततः गङ्गा वनानापितनः आरभ्य देवादिस

यस्मिन्प्रतिष्ठितो भास्वान्मेढीभूतः स्वयं ध्रुवः। ध्रुवे च सकला ज्योतींषि ज्योतिष्यम्भोमुचो द्विज ९९ मेघेषु संगता वृष्टिर्वृष्टेः सृष्टेश्च पोषणं आप्यायनं च सर्वेषां देवादीनां महामुने १०० ततश्चाज्याहुतिद्वारा पोषितास्ते हविर्भुजः वृष्टेः कारणतां यान्ति भूतानां स्थितये पुनः १०१ एवमेतत्पदं विष्णोस्तृतीयममलात्मकं आधारभूतं लोकानां त्रयाणां वृष्टिकारणं १०२ ततः प्रवर्तते ब्रह्मन्सर्वपापहरा सरित् गङ्गा देवाङ्गनाङ्गानामनुलेपनपिञ्जरा १०३ वामपादाम्बुजाङ्गुष्ठनखस्रोतोविनिर्गता विष्णोर्बिभर्ति यां भक्त्या शिरसाहर्निशं ध्रुवः १०४ ततः सप्तर्षयो यस्याः प्राणायामपरायणाः तिष्ठन्ति वीचीमालाभिरुह्यमानजटा जले १०५ वार्योघैः संततैर्यस्याः प्लावितं शशिमण्डलं भूयोऽधिकतरां कान्तिं वहत्येतदुपक्षये १०६ मेरुपृष्ठे पतत्युच्चैर्निष्क्रान्ता शशिमण्डलात् जगतः पावनार्थाय प्रयाति च चतुर्दिशं १०७ सीता चालकनन्दा च चक्षुर्भद्रा च संस्थिता एकैव या चतुर्भेदा दिग्भेदगतिलक्षणा १०८ भेदं चालकनन्दाख्यं यस्याः शर्वोऽपि दक्षिणं दधार शिरसा प्रीत्या वर्षाणामधिकं शतं १०९

यतेन प्रकटीभवतीत्यर्थः तदेवाह देवाङ्गनानामङ्गानां जलकेलिषु क्षालितानि यान्यनुलेपनानि तैः कुङ्कुमा दीनि तैः पिञ्जरा पिशङ्गीभूता १०३ विष्णोर्वामपादाम्बुजे अम्बुजसदृशो यो वामपादः तस्याङ्गुष्ठनखात् स्रोतोरूपेण विनिर्गता १०४ सप्तर्षयो यस्या जले प्राणायामपरायणा ऊर्ध्वं तिष्ठन्ति उह्यमाना इतस्ततश्चाल्यमाना जटा येषां ते १०५ विप्लवत स्वभेदेन या गतिः सैव चतुर्भेदलक्षणं य

वि॰
पु॰
टी॰
२२

अस्थिशर्करा अस्थिचूर्णानि पापाया न्वत्पदे इत्यतानपि ११० समात्रयंवर्षत्रयम् ११२ श्रुतत्वंविस्णुपदंनिगमयति यतइति यतः स्थानात्समु
द्भूतात्रकदंप्रशान्ततनभगवत्पदमिति ११७। इतिस्वप्रकाशव्याख्यायांअष्टमोध्यायः ८ विष्णुपदंध्रुवादीनांसर्वेषामाश्रयोऽन्तस्यादि
कारणंचेत्युक्तंयस्मिन्नतिष्ठतो भासान्मेठीभूतः स्वयंभुवइत्यादिना तदेवकेन प्रकारेणेत्यपेक्षायांतत्प्रकारविशेषनिरूपणार्थमध्या।

शंभोर्जटाकलापाच्चविनिष्क्रान्तास्थिशर्कराः प्लावयित्वादिवंनिन्येपापान्सगरात्मजान् ११० स्नातस्यसलिलेयस्याः सद्य
पापंप्रणश्यति अपूर्वपुण्यप्राप्तिश्चसद्योमैत्रेयजायते १११ दत्ताःपितृभ्योयत्रापस्तनयैःश्रद्धयान्वितैः समात्रयंप्रय
च्छंतितृप्तिंमैत्रेयदुर्लभां ११२ यस्यामिष्ट्वामहायज्ञैर्यज्ञेशंपुरुषोत्तमं द्विजभूताःपरांसिद्धिमवापुर्दिविचेहच ११३
स्नानाद्विधूतपापाश्चयज्जलैर्यतयस्तथा केशवासक्तमनसःप्राप्तानिर्वाणमुत्तमं ११४ श्रुताभिलषितादृष्टास्पृष्टापी
तावगाहिताः यापावयतिभूतानिकीर्तितावदिनेदिने ११५ गंगागंगेतियैर्नामयोजनानांशतेष्वपि स्थितैरुच्चारितंहं
तिपापंजन्मत्रयार्जितं ११६ यतःसापावनायालंत्रयाणांजगतामपि समुद्भूतापरंतत्तुतृतीयंभगवत्पदं ११७ इति।
श्रीविष्णुपुराणेअष्टमोध्यायः ८ पराशरउवाच तारामयंभगवतःशिशुमाराकृतिप्रभोः दिविरूपंहरेर्यत्तुतस्यपुच्छेस्थि
तोध्रुवः ॥१॥ सैषभ्रमन्भ्रामयतिचंद्रादित्यादिकान्ग्रहान् भ्रमंतमनुतंयांतिनक्षत्राणिचचक्रवत् २॥

ताराभेः तारामयमिति॥ नक्षत्ररूपंजात्मकंशिशुमाराकृतिशिशुमारः सरटगोधातस्याकृतिरिवाकृतिर्यस्यतज्ञगवतोरूपंतस्यप्रदक्षि
णावर्तकुंडलीभूतदेहस्यान्तेमितपुच्छस्यपुच्छाग्रेध्रुवःस्थितइत्यर्थः १ सैषइतिसोचिलोपेचेत्पादपूरणमिति सलोपःसएष
ध्रुवःशिशुमारवशेनभ्रमन्यहान्भ्रामयतिनक्षत्राणिचतंभ्रमंतमनुयांति २॥

वि॰ पु॰
द्वि॰ टी॰
२४

तद्धेतुमाह सूर्याचन्द्रमसाविति नक्षत्राण्यश्विन्यादीनि इतरास्ताराः बुधादिभिर्ग्रहैः सह वातसमूहमयैर्बन्धैः बध्यन्ते एभिरिति बन्धाः पाशास्तैर्ध्रुवे
बद्धानि वैयतस्तन्मनयोतीत्यर्थः वातानां च कूर्मोक्ताः आवहः प्रवहश्चैव तथैवानुवहः परः संवहो विवहश्चैव तदूर्ध्वं स्यात्परावहः तथा परि
वहश्चोर्ध्वं वायवः सप्त नेमयः इति स्थानानि च तेषामुक्तानि मध्ये भूमेश्च योर्वायुरुवहः प्रवहस्ततः मेघभास्करयोः सूर्यशशिनोरुद्वहः स्थितः
वहस्तत्र गणयोः संवहो विवहस्ततः नक्षत्रग्रहमध्यस्थो ग्रहसप्तर्षिमध्यगः परावहः परिवहः सप्तर्षिध्रुवमध्यगः इत्येते वायवः सप्त
वहन्ति भुवनत्रयमिति ३ शिशुमारस्याश्रयं दर्शयन्नाह शिशुमारेति ज्योतिषां नक्षत्राणां धाम्ना च सूर्यादिस्थानामयनं दिवि शिशुमारा

सूर्याचन्द्रमसौ तारा नक्षत्राणि ग्रहैः सह वातानीकमयैर्बन्धैर्ध्रुवे बद्धानि तानि वै ३ शिशुमाराकृति प्रोक्तं यद्रूपं ज्योतिषां दिवि ना
रायणः परं धाम तस्याधारः स्वयं हृदि ॥४॥ उत्तानपादपुत्रस्तु तमाराध्य जगत्पतिं स तारा शिशुमारस्य ध्रुवः पुच्छे व्यवस्थितः
आधारः शिशुमारस्य सर्वाध्यक्षो जनार्दनः ध्रुवस्य शिशुमारस्तु ध्रुवे भानुर्व्यवस्थितः ६ तदाधारं जगच्चेदं सदेवासुरमानु
षं येन विप्र विधानेन तन्मे एकमनाः शृणु ७ विवस्वानष्टभिर्मासैर्ग्रस्यापो रसात्मिकाः वर्षत्यम्बु ततश्चान्नमन्नादप्यखिलं ज
गत् ८ विवस्वानंशुभिस्तीक्ष्णैरादाय जगतो जलं सोमं पुष्णात्यथेन्दुश्च वायुनाडीमयैर्दिवि ९ नालैर्विक्षिपतेऽभ्रेषु धूमाग्नि
निलमूर्तिषु न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः । १० अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः संस्कारं कालजनितं

कृति यद्रूपं प्रोक्तं तस्य हृदि स्थितः स्वयं नारायण एव तारारूपस्तस्याधार इत्यन्वयः पाठान्तरे धाम यद्रूपं प्रोक्तं तन्नारायणस्य स्वयं रूपमित्यत
आह हृदि स्थितः स्वयं नारायणस्तस्याधार इति ॥४॥ उत्तानपादपुत्रो ध्रुवस्तं प्रजापतिं नारायणमाराध्य तारामयस्य शिशुमारस्य पुच्छे व्यवस्थि
तः ५ तदेतन्नाश्रयति स्वाधार इति ६ तदाधारे भानावाश्रयेत देवाद्ययेनेति सार्धेन ७ सूर्यस्तत्र निष्पादक इति प्रकारमाह विवस्वानष्टभि
रिति ८ धूमाग्न्यनिलमयानामपि मेघानां जलाधारत्वमभ्रसमाख्ययोपपादयति न भ्रश्यन्तीति १० संस्कारं माधुर्यं रूपमतिशयं ११ ॥

अभ्रगर्भो वर्षा स्यात् पूर्वं तापेनानावर्षादित्याह सवितृमण्डले मा मास्तिति सवितृमण्डलगतान्भूमिगतांश्चेत्यर्थः प्राणिसंभवाः देहस्था १२ प्रसंगात् कृष्टि
विशेषादिव्यं स्नानमाह आकाशगंगेति षड्भिः १३ कृत्तिकाम्मृगशीर्षादि विषमनक्षत्रेषु स्थिते दैवे दृष्टार्के अनभ्रे पदं दृष्टं पतति १४ एवं शुभम
दैवे पुरोहिण्यार्द्रादि समनक्षत्रेषु स्थिते दैवे इति ज्ञेयम् सूर्याक्रान्त नक्षत्रैरेव ह्यादि व्यवहार दर्शनात् १७ प्रासंगिकं समाप्य पूर्वोक्तो ह

सवितृमण्डले भोमास्तत्र याप्यः प्राणिसंभवाः ततः प्रकाश भगवानादेशः सविता मन्ये १२ आकाशगंगासलिलं तयारायगभ।
स्तिमान् अनभ्रगतमेघोर्यापयः स्विपति रश्मिभिः १३ तत्संस्पर्शनिर्धूतपापपंको द्विजोत्तम नयाति नरकं मर्त्योदिव्यं
स्नानं हितत्स्मृतं १४ दृष्टसूर्ये दिनेह्यापि पतत्यभ्रैर्विनादिने आकाशगंगासलिलं तज्ज्ञैर्भिः क्षिप्यते रवेः १५ कृत्तिकादि
षु ऋक्षेषु विषमेषु च यद्दिवः दृष्टार्कै पतति तत्तोयं तत्तोयं दिग्गजोज्झितं १६ युग्मर्क्षेषु च यत्तोयं पतत्यर्कोज्झितं दिवः तत्सूर्य
रश्मिभिः सर्वं समादाय निरस्यते १७ उभयं पुण्यमत्यर्थं नृणां पापभयापहं आकाशगंगासलिले दिव्यं स्नानं महामुने १८
यन्मेघैः स मुक्तं वर्षितं प्राणिनां द्विज पुष्णात्योषधयः सर्वा जीवनायामृतं हितत् तेन वृद्धिं परां नीतः सकलश्चौष
धीगणः साधकः फलपाकांतः प्रजानां द्विज जायते २० तेन यज्ञान्यथाप्रोक्तान्मानवाः शास्त्रचक्षुषः कुर्वन्त्यह
रहस्तैर्वै देवानाप्याययंति ते २१ एवं यज्ञाश्च वेदाश्च वर्णाश्च द्विजपूर्वकाः सर्वे देवनिकायाश्च पशुभूतगणाश्च ये २२
वृष्ट्याधृतमिदं सर्वं मन्नं निष्पाद्यते यया सापि निष्पाद्यते वृष्टिः सवित्रा मुनिसत्तम २३ आधारभूतः सवितुर्ध्रुवो मुनि
वरोत्तम ध्रुवस्य शिशुमारोसौ सोपि नारायणात्मकः हृदि नारायणस्तस्य शिशुमारस्य संस्थितः विभर्ता सर्वभूता

हिमनुवर्तयति यतितित्रिभिः १९ साधकः इत्यादृष्टहेतुः प्रजानां जायते २० आध्यायार्थमुपसंहरति एवमिति त्रिभिः २२ तस्यापि शिशुमा
रस्याधारदिश्यि तो नारायणस्तदाह विभर्ता नो विभर्ता विधारकः विभर्तीति पाठे सर्वभूतानामिति षष्ठी २५॥ इति सूर्यप्रका० नवमोध्यायः॥

वि॰ पु॰
हि॰ टी॰
२५

अथ प्रतिमासं सूर्यरथस्थायिप्रमणाधिकारिण आवसन्तु उत्तरायणदक्षिणायनयोरनुलोमप्रतिलोमगं तत्त्वानि क्रोशिकांतिसृतान्याह साशीतिशतं दक्षिणकाष्ठयोर्मध्ये सूर्यो मंडलं सम्भानोर्गतिः गंतव्यं तन्मध्ये आरोहणावरोहाभ्यामिति युगान्तकोटिवज्जोवायुपाशोध्रुवो यदाकर्षति तदोत्तरायणे प्रत्यहमभ्यंतरे एकैकमंडलप्रवेशेन यस्यारोहणं भवति यदा तेनोपाशो ध्रुवः प्रसारयति तदा दक्षिणायने तेष्वेव मंडलेषु प्रतिलोमं बहिर्बहिरेकैकमंडलेप्रविशतो रथस्यावरोहणं भवति तावुभौ मानस्य आकृष्यते यदा तौ तथ्येवणासमधिष्ठितौ तदा सोऽभ्यंतरे सूर्यो भ्रमति मंडलानि तत् ध्रुवेणासम्यमानेन यदा रश्मिभुजेन ततस्तथैव वायुतः सूर्योऽभ्रमते मंडलानि वासि १ देवेवादिभिः आदित्याय वदेवा
साशीतिमंडलपातं काष्ठयोरंतरं द्वयोः आरोहणावरोहाभ्यां भानोरब्देन या गतिः १ सरथोऽधिष्ठितो देवैरादित्यैरृषिभिस्त।
था गंधर्वैरप्सरोभिर्ग्रामणीसर्पराक्षसैः २ धाता कृतस्थली चैव पुलस्त्यो वासुकिस्तथा रथकृद्ग्रामणीर्हेतिस्तुंबु
पुंजिकस्थली प्रहेतिः कच्छनीरश्च नारदश्च रथे रवेः माधवे निवसंत्येते शुचिसंज्ञे निबोध मे ५ मित्रोऽत्रिस्तक्षको रक्षः पौ
रुषेयोऽथ मेनका हाहा रथस्वनश्चैव मैत्रेयैते वसंति वै ६ वरुणो वसिष्ठो रंभा वसहजन्या हहूर्बुधः रथचित्रस्तथा शु
क्रे वसंत्याषाढसंज्ञके ७ इंद्रो विश्वावसुः स्रोतः एलापत्रस्तथांगिराः प्रम्लोचा च नभस्येते सर्पश्चार्के वसंति वै ८
रुश्चैव सप्तमः ३ एते वसंति वै चैत्रे मधुमासे सदैव हि मैत्रेय स्यंदने भानोः सप्तमासाधिकारिणः ४ अर्यमा पुलहश्चैव रथौजाः २ २
तैः ग्रामणीर्गंधर्वः ता नेवादित्यादीन् प्रतिमासं सप्त सप्त नामतो धातेत्यादिना विस्पष्टमनुपदं हिनाद्यं तेन धाता सूर्यः रथकृत्संज्ञो ग्रा
मणीः हेतिः राक्षसः ३ चैत्र एव मधुमासस्तस्मिन् ४ रथौजाः यक्षः प्रहेतिः राक्षसः कच्छनीरः सर्पः माधवे वैशाखे शुचिसंज्ञे इति ज्येष्ठे
निबोध्यते ५ पौरुषेयो राक्षसः रथस्वनो यक्षः ६ वरुणः सूर्यः रंभा वसहजन्येति पादे फाल्गुणे वसमाणा रंभा व्याख्यात्येवं सह
जन्येति संज्ञांतरेणानस्याविशेषणं रथचित्र इति यक्षसर्पयोरेकं नाम नागश्च सहजन्येति पादे नागसंज्ञकः सर्पः आषाढसंज्ञक इति
व्याख्याना दाषाढपर्वाचक्षुःश्रावण्यां शुचिसंज्ञोऽस्येष इति ज्ञेयम् ७ इंद्रः सूर्यः एलापत्रो नागः नभसि श्रावणे सर्पो राक्षसः अर्केसू

८
वि॰ पु॰
२५

उग्रसेनो गंधर्वः सुरारणो यक्षः व्याघ्रो राक्षसः ९ सुरुचिर्गंधर्वः वातो राक्षसः धनंजयः सर्पः सुषेणो यक्षः १० विश्वावससेनजप्वायवोगं-
धर्वः पर्जन्यः सूर्यः ऐरावतः सर्पः सेनजित्तस्तोयक्षराक्षसौ सेनजिच्चापइति पाठे चापो राक्षसः ११ अंशुः सूर्यः तार्क्ष्यो यक्षः महापद्मः स-
र्पः चित्रसेनो गंधर्वः विद्युद्राक्षसः १२ क्रतुरृषिः भगः सूर्यः ऊर्णायुर्गंधर्वः स्फूर्जो राक्षसः कर्कोटकः सर्प्पः अरिष्टनेमिर्यक्षः १३ त्वष्टा सूर्यः
कंबलः सर्पः ब्रह्मापेतो राक्षसः ऋतजिद्यक्षः धृतराष्ट्रो गंधर्वः १४ विष्णुः सूर्यः अश्वतरः सर्प्पः सूर्यवर्चा गंधर्वः सत्यजिद्यक्षः यज्ञापेतो राक्ष

विवस्वानुग्रसेनश्च भृगुरापूरणस्तथा अनुम्लोचा शंखपालो व्याघ्रो भाद्रपदे तथा ९ पूषा च सुरुचिर्वाता गौतमोथ धनंजयः
सुषेणोन्यो घृताची च वसंत्याश्वयुजे रवौ १० विश्वावसुर्भरद्वाजो पर्जन्यैरावतौ तथा विश्वाची सेनजिच्चापि कार्तिके च वसंति
वै ११ अंशुः काश्यपतार्क्ष्यौ तु महापद्मस्तथोर्वशी चित्रसेनस्तथा विद्युन्मार्गशीर्षाधिकारिणः १२ क्रतुर्भगस्तथोर्णायुः स्फूर्जः
कर्कोटकस्तथा अरिष्टनेमिश्चैवान्या पूर्वचित्तिर्वराप्सरा १३ पौषमासे वसंत्येते सप्त भास्करमंडले लोकप्रकाशनार्थाय विप्र
वर्याधिकारिणः १४ त्वष्टाथ जमदग्निश्च कंबलोथ तिलोत्तमा ब्रह्मापेतोथ ऋतजिद्धृतराष्ट्रश्च सप्तमः १५ माघमासे वसंत्येते स
प्त मैत्रेय भास्करे श्रूयतां चापरे सूर्ये फाल्गुने निवसंति ये १६ विष्णुरश्वतरो रंभा सूर्यवर्चाश्च सत्यजित् विश्वामित्रस्तथा रौद्रो
यज्ञापेतो महामुने १७ मासेष्वेतेषु मैत्रेय वसंत्येते तु सप्तकाः सवितुर्मंडले ब्रह्मन्विष्णुशक्त्युपबृंहिताः १८ स्तुवंति मुनयः सूर्यं
गंधर्वैर्गीयते पुरः नृत्यंत्योप्सरसो यांति सूर्यस्यानुनिशाचराः १९ वहंति पन्नगा यक्षैः क्रियतेभीषुसंग्रहः वालखिल्यास्तथैवैनं
परिवार्य समासते २० सोयं सप्तगणः सूर्यमंडले मुनिसत्तम हिमोष्णवारिवृष्टीनां हेतुत्वे समयं गतः २१ इति दशमोध्यायः
१०॥ मैत्रेय। यदेतद्भगवानाह गणः सप्तविधो रवेः मंडले हिमतापादेः कारणं तन्मया श्रुतं १॥

सः १८ ते षां व्यापारविशेषानाह स्तुवंतीति सार्धेन १९ वहंति वहनानुकूलतया रथे संनद्धा नीत्यर्थः सन्नद्धं तिरथे नागा इति श्रुकोक्तेः अभीषु
संग्रहः रश्मिसंयोजनं नित्यमेव कानाह वालखिल्या इति १९ सप्तानां साधारणं कर्माह सोयमिति सप्तसमयागतः इति पाठे सप्तकाले हेमंतग्री
ष्मादागागतः सन् हिमादिवृष्टीनां हेतुरित्यर्थः २० इति स्वप्रकाशव्याख्यायां दशमोध्यायः १० उक्तानुवादपूर्वकं रवेर्विशेषं पृच्छति यदेतदिति द्विभ्यं

वि ३।
हि टी
२९

नन्वादित्यस्यापि त्र्यंशिकमीमांसमेव विवस्वान्वहूभिर्मार्भैरित्यादिनाश्रुतत्वादाह यदीति सोयं सप्रगणो हि मोसवविष्टीनां हेतुरितिसाधारणस्योक्तत्वादित्य
र्थः ४ ननु साधारणत्वाद्देवश्रपि तत्कमेभवत्येवतत्राह विवस्वानिति ५ विष्णुशक्त्यापि पालनाति शयाद्विशेषाधान्येन सर्वोपयेय्यवहारो उक्त इति
यदि हाश्माह मैत्रेयेत्यादिना ६ यस्मात्रयापरा सर्वोपयेय्यकाणिकादिस्तोमन्य योद्भूपाशक्तिः सैवेयायरविद्रूपेणतपति ग्रहेष्वणवप्याप्तिसितासती
दिनक्तिश्चतः शाथान्येनापिकोरवि सैयात्र्य्यवविद्यामपतीतिष्णोः सर्वोशक्तिरितिपाठे सर्वोशक्तिः समयापाक्तिरित्यर्थः ७ अनयवतसवि

यापरस्यादिकाविता गंधर्वो ऋग्यजुः साम अथर्वणा सवित्यानांतयेवापरसो गुरौ २ यद्यापणां च रचेभानो विष्णुशक्तिधृतात्मनो
किंत्वादित्यस्य यत्कर्म त्रयी कोकेत्य यामुने ३ यदि सप्रगणो नादिष्टिमनुसंख्यायेषति तत्किमत्र रवेर्येनष्टिःसूर्यादितोर्थते ४ विव
स्वानादितो मध्येयात्वस्तामिति किं जनः त्रयी त्येननत्समेकर्म यदि सप्रगणस्य तत् ५ पराशरउवाच मैत्रेय श्रूयतामेतद्यद्भवान्परिपृच्छसि
यथा सप्तगणेप्येकः प्राधान्येनाधिको रविः ६ सर्वोशक्तिः परा विष्णोर्ऋग्यजुः साम संज्ञिता सैषा त्रयी तपत्यंहो जगतश्च हिनस्ति
या ७ सैव विष्णुः स्थितः स्थित्यां जगतः पालनोद्यतः ऋग्यजुः सामभूतोन्तः सवितुर्द्विज तिष्ठति ८ मासि मासि रविर्यो यस्तत्र तत्र
हि सा परा त्रयीमयी विष्णुशक्तिरवस्थानं करोति वै ९ ऋचस्तपन्ति पूर्वाह्णे मध्याह्ने च यजूंषि वै बृहद्रथन्तरादीनि सामान्यह्नः क्ष
ये रवौ १० अंगमेषा त्रयी विष्णोर्ऋग्यजुः साम संज्ञिता विष्णुशक्तिरवस्थाने सदादित्ये करोति सा ११ न केवलं रवौ शक्ति
वैष्णवी सा त्रयीमयी ब्रह्माथ पुरुषो रुद्रस्त्रयमेतत्त्रयीमयम् १२ सर्गादौ ऋङ्मयो ब्रह्मा स्थितौ विष्णुर्यजुर्मयः रुद्रः साम
मयोन्ताय तस्मात्तस्याशुचिर्ध्वनिः १३ ॥

स्वनात्र मे दमेवाभिप्रेत्याह सैवेतिजगतः स्थित्यां स्थितः सन्पालनायोद्यतो विष्णुर्नाम साशक्तिरेवेत्यन्वयः ८ ऋचस्तपन्ती त्युक्तानि ऋगिभ
स्वोक्तिदिविदेवइयते यजुर्वेदेन तिष्ठति मध्ये त्र्यह्नः सामवेदेनास्तमये महीयत इत्यादि १० अंगं मूर्तिः ११ न केवलं रवेरेव सा शक्तिरपि त्वन्ये
किं तु ब्रह्मादीनामपीत्याह नेति पुरुषो विष्णुः त्रयीमयं त्रयी प्रधानेन तदधिष्ठितमित्यर्थः १२ यस्मात्सामशब्दान्तरुद्रो नंकरोति तस्मात्तेषाकरत्वा
त्तस्य साम्नो ध्वनिरशुचिः शुद्धविदेशकालादिव हेतोरतस्तस्मान्न धार्यतापादक इत्यर्थः न सामध्वनावृग्यजुषी इति गौतमस्मृतेः १३ ॥

आत्मसप्तगणस्थं स्वाधिष्ठेयं सप्तगणेष्वस्थितं भास्वन्तं सूर्यं मतिशयेनाधितिष्ठति १७ जाज्वलीति अतिशयेन प्रकाशते १८ अतस्तस्य प्राधान्यात्
एवैतैः स्तवव्याख्यानैर्द्दर्शयितुमुद्यास्तमये वेत्यत आह स्तुवन्तीति द्वाभ्यां १९ ऋग्यजुःसामभूतो नः सविता हि जगति इति विष्णुशक्तिरवस्थाने सवादिने
करोति तस्मान्न केवलं रवेः शक्तिरित्याह विष्णुत्रयीशक्तिरूपस्य विष्णोः प्रतिमासं भिन्नेष्वागमापायिषु सूर्येष्ववस्थानोक्तेः सूर्यादिवत्तस्मान्मासंवि।
स्तार उद्गमापायित्वप्रतीतेर्वारयति नोदेतेति द्वाभ्यां नैनं गन्तानास्तमेता अस्तं न गन्ता अधिष्ठाता विष्णुः प्रतिमाससमागमापायी न भवति किंतु
तदधिष्ठेयः सप्तमयः सप्तभिः संपाद्यो यः सर्वोप्यागमापायी गणस्ततः पृथगेव २० एतदेव दृष्टान्तेन स्पष्टयति स्तंभेति द्वाभ्यां स्तंभे

एवं सा सात्विकी शक्तिर्वैष्णवी या त्रयीमयी आत्मसप्तगणस्थं तं भास्वन्तमधितिष्ठति १४ तया चाधिष्ठितः सोपि जाज्वलीति
स्वरश्मिभिः तमः समस्तजगतां नाशं नयति चाखिलं १५ स्तुवन्ति चैनं मुनयो गन्धर्वैर्गीयते पुरः नृत्यन्तोप्सरसो यान्ति तस्य चा
नु निशाचराः १६ वहन्ति पन्नगा यक्षैः क्रियतेभीषुसंग्रहः वालखिल्यास्तथैवैनं परिवार्य समासते १७ नोदेता नास्तमे
ता च कदाचिच्छक्तिरूपधृक् विष्णुर्विष्णोः पृथक्तस्य गणः सप्तमयोप्ययं १८ स्तंभस्थदर्पणस्येव योयमासन्नतां गतः
छायादर्शनसंयोगं स तं प्राप्नोत्यथात्मनः। १९ एवं सा वैष्णवी शक्तिर्नैवापैति ततो द्विज मासानुमासं भास्वन्तमध्यास्ते तत्र
संस्थितं २० पितृदेवमनुष्यादीन्स सदाप्याययन्प्रभुः परिवर्तत्यहोरात्रकारणं सविता द्विज २१ सूर्यरश्मिः सुषुम्नो यः।
तर्पितस्तेन चन्द्रमाः कृष्णपक्षेमरैः पूर्वं पीयते वसुधामयः २२ ॥

निस्थितदर्पणस्य सान्निध्यं यो यो जनः प्राप्नोति स सर्वोपि क्रमेणात्मनश्छायादर्पणसंयोगं प्रतिबिंबमासेन संबंधं यथा प्राप्नोति
एवं स्तंभस्थानीयसूर्ये रथेधिष्ठितास्सादर्पणस्थानीया वैष्णवीशक्तिस्तत्तःस्थानीन्नेवापगच्छति तत्र स्थैव तं मासानुमासं प्रतिमा
सं तत्रास्थितमागतं जगन्स्थानीयं भास्वन्तमध्यास्तेऽधितिष्ठति २० एवं विष्णुशक्त्यधिष्ठितस्य रवेः पित्रादितर्पकत्वमाह पितृदेवे
ति आप्याययन् तर्पयन् परिवर्तते परिभ्रमतीत्यर्थः २१ तत्र देवपितृतर्पणप्रकारमाह सूर्यरश्मिरिति द्वाभ्यां तर्पितः शुक्लप्रतिप
दमारभ्याप्रपूरितः षोडशकलः सन् कृष्णपक्षे प्रतिपदादि प्रत्यहमेककलापानात्पीयते नसम्पर्यमोपिबतीवह्निर्हितीयोपि वेते रवि

२२॥

१५ वि० पु० टी०

वि॰ पु॰
द्वि॰
२२

एवं प्रत्यहममरैरेकैककलां पीते नष्टे नैवत्तर्दर्शपर्वते द्विकलावशिष्टं सन्तं कृष्णपक्षक्षये दर्शे पितरः पिबन्तीति तथा तेन चन्द्रतर्पणप्रकारेण भास्करात्तेषां देवपितृणां तर्पणं भवति २३ मनुष्यादितर्पणप्रकारमाह आदत्त इति द्वाभ्यां २४ इष्टकृतायां तृप्तौ विशेषमाह पक्षतृप्तिमिति पक्षतृप्तिं तत्र द्विनत्पत्रिंस्वकृतश्रुपितिनिष्पत्तेरन्तेः सकृदुक्तैः पक्षमासाहोरात्रपरिमितां तृप्तिं देवपितृमर्त्यानामर्कः करोतीत्यर्थः श्रुतश्च पक्षति तस्मादहरहर्मनुष्या अशनमिच्छन्ते तेथ मासे देवा इज्यन्ते मासि पितृभ्यः क्रियत इति २६ इति स्वप्रकाशव्याख्यायामेकादशोऽध्यायः ११

पीतं तं द्विकलं सोमं कृष्णपक्षक्षये द्विज पिबन्ति पितरः शेषं भास्करात्तर्पणं तथा २३ आदत्ते रश्मिभिर्यन्तु क्षितिसंस्थं रसं रविः तमुत्सृजति भूतानां पुष्ट्यर्थं सस्यवृद्धये २४ तेन प्रीणात्यशेषाणि भूतानि भगवान्रविः पितृदेवमनुष्यादीनेवमाप्याययत्यसौ २५ पक्षतृप्तिं तु देवानां पितॄणां चैव मासिकीं शश्वत्तृप्तिं च मर्त्यानां मैत्रेयार्कः प्रयच्छति २६ ॥
इति श्रीविष्णु॰ द्वि॰ एकादशोऽध्यायः ११ पराशरः रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः वामदक्षिणतो युक्ता दश तेन चरत्यसौ १ वीथ्याश्रयाणि ऋक्षाणि ध्रुवाधारेण वेगिना ह्रासवृद्धिक्रमस्तस्य रश्मीनां सवितुर्यथा २ अर्कस्येव हि तस्याश्वाः सकृद्युक्ता वहन्ति ते कल्पमेकं मुनिश्रेष्ठ वारिगर्भसमुद्भवाः ३ क्षीणं पीतं सुरैः सोममाप्याययति दीप्तिमान् मैत्रेयैककलं सन्तं रश्मिनैकेन भास्करः ४ ॥

उक्ता चतुर्थरथाधिष्ठमाधैर्वेस्थितिः अथ सोमादिसंस्थोक्ता तत्र पर्वोपसेवतिः १
कुन्दाभाः श्वेताः रविरथाद्विशेषमाह वामतो दक्षिणतश्च युक्तास्तस्य रथस्याश्वा दश तैस्तेन रथेन १ नागवीथ्याद्याश्रयाण्यश्वन्यादीनि नक्षत्राणि आगातया चरति ह्रासवृद्धिक्रम इति उदितो वर्द्धमानाभिरामध्याह्नादित्यत्र सवितृरश्मीनां यथोक्तस्तथा तस्यापि २ क्षीणस्य सोमस्य पुनः पूर्णत्वसतो देवादितर्पकत्वमाह क्षीणमिति चतुर्भिः पञ्चदश्यां कलायां दर्शे पितृभिः पीतायां षोडश्याः कलायाश्चावशिष्टत्वादेककलं सन्तं मिषुक्रमं एकेन रश्मिना सुषुम्नाख्येन ४ ॥

येनक्रमेणप्रतिपत्प्रभृतिदेवैर्वह्न्यादिभिः सोपीतस्तेनैवप्रतिदिनंतंनिशाकरमाप्याययति अलब्दितंवानवारितस्करःवड्डयतीति तथावा
रितस्करः एवंगृहीतेनवाविरता सोममाप्याययतीत्यर्थः ५ सुधामृतंतस्यधात्रूपममृतंतेमृतभेषजं तत्कालाकरं सोमं ७ पितॄणांसोमपानप्र
कारमाह कलाद्वयमितिमाह्निः ८ सूर्यमंडलप्रवेशक्रममाह अमेति ९ प्रसंगाद्दर्शे वीरुधांछेदकर्तारं निंदति छिनत्तीति १० तद्दे
वेदर्शावृते ममृतीकृत्यवप्रवेशाउपदीत्परापकलात्मकेपंचदशेभागेकिंचिच्छिष्टेसति तेजःश्रयंपश्चादवशिष्टंसोममपराह्णेपितृगणाः
पर्युपासतेपानार्थंपरितःसेवंते ११ ततस्तंनमेदोर्द्विकलाकारः पिष्टद्विकलाययाकारस्तंचपिष्ट्वा पंचदशीयाकलानोपितरः पिबंति

क्रमेणयेनपीतोसौदेवैस्तेननिशाकरं आप्याययत्यनुदिनंभास्करोवारितस्करः ५ संवृत्तेचार्धमासेन तत्सोमसंस्थसुधामृतं
पिबंतिदेवामैत्रेय स्वधाहारायतोमराः ६ त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छतानिच त्रयस्त्रिंशत्तथादेवाःपिबंतिक्षणदाक
रं ७ कलाद्वयावशिष्टस्तु प्रविष्टःसूर्यमंडले अमाख्यरश्मौवसति अमावास्याततःस्मृता ८ अप्सुतस्मिन्नहोरात्रे पूर्वंविशति
वीरुधः ततोवीरुत्सुवसति प्रयात्यर्कंततःक्रमात् ९ छिनत्तिवीरुधोयस्तु वीरुत्संस्थेनिशाकरे पत्रंवापातयत्येकं ब्रह्मह
त्यांसविन्दति १० शेषेपंचदशेभागे किंचिच्छिष्टेकलात्मके अपराह्णेपितृगणा जघन्यंपर्युपासते ११ पिबंतिद्विकलाकार
शिष्टातस्यकलातुया सुधामृतमयींपुण्यां तामिन्दोःपितरोमुने १२ निःसृतंतदमावास्यां गभस्तिभ्यःसुधामृतं मासतृप्तिमवा
प्याग्र्यांपितरःसंतिनिर्वृताः १३ सौम्याबर्हिषदश्चैव अग्निष्वात्ताश्चतेत्रिधा एवंदेवाःसितेपक्षे कृष्णपक्षेतथापितॄन् वीरुधश्चामृ
तमयैःशीतैरप्परमाणुभिः १४ ॥

ततोद्विकलींद्विकलंसोममितिपाठे द्विकलंपर्युपास्यतस्यशिष्टैकलांपिबतीत्यर्थः द्विलव
मितिपाठे लवःसूक्ष्मःकलावयवः द्विलवपरिमितेकाले तेनाशिष्टैकलांपिबंतीत्यर्थः १२ अमावस्या अमावास्यायां तत्सोमस्थगभस्तिभ्यो
निःसृतंसुधामृतंपीत्वेतिशेषः १३ तदेवममृतहारा सोमादेवादीनांतर्पणमुक्त्वा तविषादीनांदत्तापितेषांतर्पणमाह सितेपक्षेदेवाना
प्याययति देवानांशुक्लपक्षेयजनाभ्यांनातः तस्मादाप्यायमानपक्षेयजेत् इतिश्रुतेः कृष्णपक्षेपितॄन् अपक्षयपक्षेपितॄणामितिश्रुतेः अप्या

॥ २९ ॥

वि पु॰
द्वि टी॰
२७

वीरुधो लतायाः । ओषध्यो व्रीह्याद्याः । तासां निष्पत्त्या प्रकाशेन यदाह्लादनं तेन च १५ तदेवं सोमस्य पाण्ड्वादि प्रकारमुक्त्वा बुधादीनामप्याह वाय्वग्नीत्यादिना प्रवहस्तेन स स्मृत इत्यंतेन पिशंगैः कपिलैः १६ अष्टाभिरित्यष्टकोणाः वरूथो रथगुप्तिर्या निरोधने रथस्थिति रथस्याधःस्थितं काष्ठमनुकर्षो निगद्यते उपासंगो रथोपस्थः पताका प्रसिद्धा ... १७ शबलैः श्वित्रवर्णैः २० स्वर्भानोः राहोः भृंगाभाः कृष्णाः धूसरं ईषत्

वाय्वग्निद्रव्यसंभूतो रथश्चंद्रसुतस्य च पिशंगैस्तुरगैर्युक्तः सोऽष्टाभिर्वायुवेगिभिः १६ सवरूथः सानुकर्षो युक्तो भूसंभवैर्हयैः सोपासंगपताकस्तु शुक्रस्यापि रथो महान् १७ अष्टाश्वः कांचनः श्रीमान्भौमस्यापि रथो महान् पद्मरागारुणैरश्वैः संयुक्तो वह्निसंभवैः १८ अष्टाभिः पांडुरैर्युक्तो वाजिभिः कांचनो रथः तस्मिंस्तिष्ठति वर्षांते राशौ राशौ बृहस्पतिः १९ आकाशसंभवैरश्वैः शबलैः स्यंदनं युतं समारुह्य शनैर्याति मंदगामी शनैश्चरः २० स्वर्भानोस्तुरगा ह्यष्टौ भृंगाभा धूसरं रथं सकृद्युक्तास्तु मैत्रेय वहंत्यविरतं सदा २१ आदित्यान्निःसृतो राहुः सोमं गच्छति पर्वसु आदित्यमेति सोमाच्च पुनः सौरेषु पर्वसु २२ तथा केतुरथस्याश्वा अप्यष्टौ वातरंहसः पलालधूमवर्णाभा लाक्षारससन्निभारुणाः २३ एते मया ग्रहाणां वै तवाख्याता रथा नव सर्वे ध्रुवे महाभाग प्रबद्धा वायुरश्मिभिः २४ ग्रहर्क्षताराधिष्ण्यानि ध्रुवे बद्धान्यशेषतः भ्रमंत्युचितचारेण मैत्रेयानिलरश्मिभिः २५ यावंत्यश्चैव ताराः स्युस्तावंतो वायुरश्मयः सर्वे ध्रुवे निबद्धास्ते भ्रमंतो भ्रामयंति तं २६ तैलपीडा यथा चक्रं भ्रमंतो भ्रामयंति वै तथा भ्रमंति ज्योतींषि वातविद्धानि सर्वशः २७ अलातचक्रवद्यांति वातचक्रेरितानि तु यस्माज्ज्योतींषि वहति प्रवहस्तेन स स्मृ-

१२८

स्यादित्याह यद्यप्यविरतं भ्रमणपरास्ते २१ सौरेषु पर्वसु सोमं गच्छति २२ पलालं तृणं तद्धूमवर्णवदाभा दीप्तिर्येषां ते लाक्षारसवदरुणाश्च २३ ग्रहर्क्षताराधिष्ण्यानि धिष्ण्यानि ... उचितचारेण स्वोचितगत्या २५ तैलपीडास्तैलिकाः स्वयं भ्रमंतो यथा चक्रं ते तथैव भ्रामयंति वातविद्धानि प्रवहाख्यवातचक्रप्रेरितानि २७ यस्माज्ज्योतींषि प्रवहति तेन स वायुः प्रवहः स्मृतः प्रवहस्यैव भेदाः सर्वे वायुरश्मयः सर्वे ध्रुवे निबद्धास्ते इति २८ ॥

२७

पुच्छतस्तु ध्रुवाद्याधारभूतं शिशुमारं तन्वमाख्यायोपदिश्य मेवोपसनार्थं विशेषतो वक्तुमाह शिशुमार इति २४ तद्दर्शनफलमाह यदह्नेति सार्धेन
तत्संनिवेशमेवाह उत्तानपाद इति सार्धैस्त्रिभिः उत्तानपादः यस्त्राद्धोन्नूपादेवास्तदवयते नोच्यते यज्ञोधरो हनुरित्यनुषंगः ३१ सक्थि
नी ऊरू ३२ तारका मयस्य शिशुमारस्य पुच्छे स्थितमग्न्यादि चतुष्टयं नास्तमेति शक्त्युत्तरपुच्छस्थितमेतत्तथा नाभावादित्येतदष्टपदे त्यस्तमेति
पातेतस्य पुच्छे चतुष्टयमेतन्मस्तेनिरस्तेनिहितमित्यर्थश्रुतिश्च अग्निः पुच्छस्य प्रथमं काण्डं तत इन्द्रस्ततः प्रजापतिरभयं चतुर्थमिति ३३

शिशुमारस्य यः प्रोक्तः स ध्रुवो यत्र तिष्ठति सन्निवेशं च तस्यापि शृणुष्व मुनिसत्तम २९ यदह्ना कुरुते पापं तं दृष्ट्वा निशि मुच्यते यावन्त्यश्चैव तारास्ताः शिशुमाराश्रितादिवि तावन्त्येव तु वर्षाणि जीवत्यभ्यधिकानि च ३० उत्तानपादस्तस्याथ विज्ञेयो ह्युत्तरो हनुः यज्ञोधरश्च विज्ञेयो धर्मो मूर्धानमाश्रितः ३१ हृदि नारायणश्चास्ते अश्विनौ पूर्वपादयोः वरुणश्चार्यमा चैव पश्चिमे तस्य सक्थिनी ३२ शिश्नः संवत्सरस्तस्य मित्रोऽपानं समाश्रितः पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः तारका शिशुमारस्य नास्तमेति चतुष्टयी ३३ इत्येष सन्निवेशोऽयं पृथिव्या ज्योतिषां तथा द्वीपानामुदधीनां च पर्वतानां च कीर्तितः ३४ वर्षाणां च नदीनां च ये च तेषु वसन्ति वै तेषां स्वरूपमाख्यातं संक्षेपः श्रूयतां पुनः ३५ यदम्बु वैष्णवः कायस्ततो विप्र वसुन्धरा पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता ३६ ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य ३७ ॥

उक्तं भुवनकोशमुपसंहरंस्तस्य विष्वात्मतोदर्शयन्नाह इत्येष इति यावत्समाप्ति ३४ यदम्बु वैष्णवः कायः विष्णोर्देवमूर्तिः ततो भुवः ग
र्भे रकात पद्माकारा मेरुकर्णिका सर्वतः समवर्तत नानापर्वतविभक्तानेकतन्त्रद्वीपवर्षद लावस्थेयं रास समुद्भूता अतः सापि तन्मूर्ति
रेव ततः सर्वाणि तिसेदेपार्थः ३६ एतदुपलक्षणं कृत्स्नसर्वस्यापि तदात्मतामाह ज्योतींषीति यदस्ति यन्नास्ति भावाभावरूपेण प

नत्वेकस्यानेकत्वं विरुद्धमित्याशंक्यानेकत्वस्यावास्तवत्वमाह ज्ञानमेवस्वरूपंतत्त्वंयस्यमूर्यवासौभगवान्यतः अतोशेषमूर्तिः प्रपंचमूर्तिः
प्रपंचमूर्तिरसौवस्तुभूतः परमार्थरूपोनभवतिकथंतर्हिप्रपंचस्यतन्मूर्तित्वंतत्राह ततोहीति तस्माज्ज्ञानस्वरूपात्शैलादिभेदान्वि
ज्ञानेनधिष्ठानेनविजृंभितानिस्वमाययाविलसितानिरूपाणिजानीहि ३८ अत्रहेतुमाह यदातिति यदातुप्रतिबंधकर्मक्षयसर्वमेत
ज्जगच्छुद्धकेवलंनिजरूपिनिजमात्मैवरूपमस्तियस्यतथाभूतंनिरस्तासंभावनादिदोषंज्ञानमेवभवति तदासंकल्पतरोः फल
भूताः वस्तुषुपृथिव्यादिषुतेद्वैतेनोद्भावविशेषानस्फुरंति यत्रतस्यसर्वात्मैवाभूत्तत्केनकंपश्येत्केनकंजिघ्रेदित्यादिश्रुतेः अत
स्तत्त्वज्ञानबाधितत्वात्प्रपंचोवास्तवइत्यर्थः ३९ यावत्तेचयत्रास्तिवर्तमानेपितत्त्वेयत्यादिन्यायेनागमापायित्वात्परिणामित्वा

ज्ञानस्वरूपोभगवान्यतोसावशेषमूर्तिर्नचवस्तुभूतः ततोहिशैलाब्धिधरादिभेदान्जानीहिविज्ञानविजृंभितानि
३९ यदातुशुद्धंनिजरूपिसर्वंकर्मक्षयेज्ञानमपास्तदोषं तदाहिसंकल्पतरोःफलानिभवंतिनोवस्तुषुवस्तुभेदाः
४० वस्त्वस्तिकिंकुत्रचिदादिमध्यपर्यंतहीनंसततैकरूपं यच्चान्यथात्वंद्विजयातिभूयोनतत्तथाकुत्रकुतोहितत्त्वं ४१
महीघटत्वंघटतःकपालिकाकपालिकाचूर्णरजस्ततोणुः जनैःस्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यतेब्रूहिकिमत्र
वस्तु ४२ तस्मान्नविज्ञानमृतेस्तिकिंचित्क्वचित्कदाचिद्द्विजवस्तुजातं विज्ञानमेकंनिजकर्मभेदविभिन्न

त्वेनवास्तवत्वमेस्यमाह वस्त्विति यच्चान्यथात्वंपरिणामं ... नतत्तथाभूतं नवस्तुभवति तत्रतथाभूतेकदाचित्केस्व
रूपात्प्रच्युतेचवस्तुनिकुत्रापिरजतादिवत्तत्त्वंपरमार्थःकुतः ... दृष्टांतेन मिथ्यात्वमाह महीति महीपिंड
दिहायाघटत्वंप्राप्तालक्ष्यते घटत्वानंतरंचकपालिकाभूतालक्ष्यते ... कपालिकापिमतोचूर्णरजश्चलक्ष्यते ततश्चूर्णरजसःसूक्ष्मा
लक्ष्यते स्वकर्मणाप्रतिबंधकेनस्तिमितोमंदीभूतश्चात्मनि ... तेरपरिणामपरंपरायामवस्थायाः लक्ष्यतेनकिंचित्
पूर्वरूपप्रच्युतेरित्यर्थः तथाचश्रुतिः वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमिति ४२ ४३

तद्वाक्यमेवानुवदंस्तत्र संदेहाय भावं दर्शयन्नाह एवमेवेति अत्र संसारे किं श्रेयः संप्रश्नः इति कपिलमहर्षिं गत्वा प्रष्टुमभ्युद्यतोस्मि ७ यदेतद्भवतोच्य
ते तेन स एव प्रत्यक्षतां गत इति मन्ये अन्यथैवं विधोक्त्यसंभवादिति भावः १० अखिलानि यानि विज्ञानानि तत्तद्दर्शनानि तान्येव जलवीचयो यस्मिन्स उदधिः
परमतत्त्वानां वेत्ता भवान् अतः परमार्थभूतं श्रेयो वदेत्यर्थः ११ तत्रात्मान्तरसेमनेभ्यः श्रेयोभ्य आत्मतत्त्वमेव परमार्थं इति निर्णीतं श्रेयः परमार्थं योमे द्वि
कल्प एवेकमाह भूपेति न विकल्पे श्रेयांसि परमार्थभूतानि न वेति विकल्पेन परमार्थानीति निषिध्यते अपरमार्थानीति पाठेन विधीयते परमार्थश्रेयो
भोगेयतानि तथा १२ तान्येव श्रेयांस्युत्तरोत्तरमुत्कृष्टानि समीचीनानि स्पष्टं दैवतेति त्रिभिः यो हि धनं पुत्रं राज्यं वेच्छति तस्य तदेव श्रेय इत्यन्वयः १३

एवमेव महाभागं कपिलर्षिमहं द्विज प्रष्टुमभ्युद्यतो गत्वा श्रेयः किं त्वत्र संशये ७ तदन्तरे च भवता यदेतद्वाक्यमीरितं तेनैव परमा
र्थार्थं त्वयि चेतः प्रधावति ८ कपिलर्षिर्भगवतः सर्वभूतस्य वै द्विज विष्णोरंशो जगन्मोहनाशायोर्वीमुपागतः ९ स एव भग
वान्नूनमस्माकं हितकाम्यया प्रत्यक्षतामत्र गतो यथैतद्भवतोच्यते १० तन्मह्यं प्रणताय त्वं यच्छ्रेयः परमं द्विज तद्वदाखिलविज्ञा
नजलवीच्युदधिर्भवान् ११ ब्राह्मण उवाच भूप पृच्छसि किं श्रेयः परमार्थं न पृच्छसि श्रेयांसि परमार्थानि अशेषाणि च भूपते १२
देवताराधनं कृत्वा धनसंपदमिच्छति पुत्रानिच्छति राज्यं च श्रेयस्तस्यैव तन्नृप १३ कर्म यज्ञात्मकं श्रेयः स्वर्लोकफलदायि च श्रेयः
प्रधानं च फले तदेवानभिसंधिते १४ आत्मा ध्येयः सदा भूप योगयुक्तैस्तथा परम् श्रेयस्तस्यैव संयोगः श्रेयो यः परमात्मना १५ श्रेयां
स्येवमनेकानि शतशोथ सहस्रशः संत्यत्र परमार्थास्तु न त्वेते श्रूयतां मम १६ ॥

फलेनभिसंधिते संकल्पिते तद्यज्ञादिकर्मैव प्रधानं मुख्यं श्रेयः संकल्पितेन यज्ञादिसाध्यं स्वर्गादिकमेव श्रेय इत्यर्थः १४ आत्मा ध्येय इति श्रेयः ।
आत्मध्यानं श्रेय इत्यर्थः तस्यैवात्मनः स्वस्य यः परमात्मना संयोगः स परं श्रेयः १५ श्रेयांस्येवमनेकानीत्युक्तं भागवते धर्ममेके यशश्चान्ये का
मं सत्यं शमं दमम् अन्ये वदन्ति स्वार्थं वै ऐश्वर्यं त्यागभोजनं केचिद्यज्ञं तपो दानं व्रतानि नियमान्यमान् आद्यन्तवन्त एवैषां लोकाः कर्मविनिर्मि
ताः दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानन्दाः शुचार्पिता इत्यादिना १६ ॥

धनादीनामपरमार्थत्वमुपपादयति धर्मायेत्यादिना संक्षेपः श्रूयतां ममेत्यं तेन कामप्राप्तिरूपलक्षणं निमित्तं यस्य व्ययस्य सः स्वर्गकामसाधनत्वाद्धनस्यप
रमपुरुषार्थता नास्तीत्यर्थः १७ पुत्रस्यापरमार्थतामाह पुत्रश्चेति द्वाभ्यां यस्य पुत्रः परमार्थाख्यः स पिता ह्यन्यस्य पुत्रत्वात्परमार्थभूतः सोप्यन्यस्य
तत्पितान्यस्य १८ इत्येवं परमार्थः कोपि नास्तीत्यतिप्रसंगः स्यात् यस्मात्कार्याणि जन्यानि पुत्रादीनि कारणानां जनकानां परमार्थः तस्मादशेषः
परमार्थः स्यात् पुत्रपदे परमार्था भवेत्ते न भवंति चेत् निकाकायोज्येश्चागमापायित्वाद्राज्यादिकं न परमार्थ इत्यर्थः १९ यज्ञादिसाध्यस्य स्वर्गादेः

धर्माय त्यज्यते किं तु परमार्थो धनं यदि व्ययश्च क्रियते कस्मात्कामप्राप्त्युपलक्षणः १७ पुत्रश्चेत्परमार्थः स्यात्सोप्यन्यस्य नरेश्व
र परमार्थभूतः सोन्यस्य परमार्थो हि तत्पिता १८ एवं न परमार्थोस्ति जगत्यस्मिंश्चराचरे परमार्थो हि कार्याणि कारणानामशेषतः
१९ राज्यादिप्राप्तिरत्रोक्ता परमार्थतया यदि परमार्था भवंत्यत्र न भवंति च वै ततः २० ऋग्यजुःसामनिष्पाद्यं यज्ञकर्म मतं तव पर।
मार्थभूतं तत्रापि श्रूयतां गदतो मम २१ यत्तु निष्पाद्यते कार्यं मृदा कारणभूतया तत्कारणानुगमनाज्ज्ञायते नृप मृन्मयं २२
एवं विनाशिभिर्द्रव्यैः समिदाज्यकुशादिभिः निष्पाद्यते क्रिया या तु सा भवित्री विनाशिनी २३ अनाशी परमार्थश्च प्राज्ञैरभ्युपग
म्यते तत्तु नाशि न संदेहो नाशिद्रव्योपपादितं २४ तदेवाफलदं कर्म परमार्थो मतस्तव मुक्तिसाधनभूतत्वात्परमार्थो न सा
नं २५ ध्यानं चैवात्मनो भूप परमार्थार्थशब्दितं भेदकारि परेभ्यस्तु परमार्थो न भेदवान् २६॥

ध्यानित्यतां साधयन्नपरमार्थतामाह ऋगिति चतुर्भिः यज्ञकर्मेति यत्सैराज्ञमिष्टतमं स्वर्गादिकं परमार्थभूतं यदि मतमित्यर्थः २१ या क्रिया नि।
ष्पाद्यते इति क्रियाद्वारा पूर्वं स्वर्गादिकं च यन्निष्पद्यते तन्नाशि भवेदित्यर्थः २३ मुक्तिसाधनभूतत्वात्फलमित्येतत् ज्ञात्वा तत्तस्मान्न्यायेनापर
मार्थो न भवतीत्यर्थः २५ परेभ्यो देहादिभ्यो विविच्यात्मनः स्थित्यालंबनीभूतस्य ध्येयस्याज्ञाने भेदका
रि परमार्थस्तु न भेदवान् एकमेवाद्वितीयं ब्रह्मेति श्रुतेः २६ ॥

जीवपरमात्मनोरैक्येनावस्थानतयाऽऽतादात्म्यलक्षणो योगः परमार्थ इत्येतदपि मतं मिथ्यैव तयोर्भिन्नयोरभिन्नयोर्वा योगः स्यात् भिन्नत्वे गवाश्वयोरिवै क्यासंभवः अभिन्नत्वे चाविवर्तितत्वयोर्विरोधात् पार्थिवमृद्दारुमात्रे विना योगशब्दार्थो नास्तीत्यर्थः। २७ तस्माच्छ्रेयांस्येवैतानि कालिकानि भवन्ति न तु परमार्थरूपाणि प रमार्थस्त्वात्मैवेत्याह एक इति। २८ स चैक एव न तु प्रतिदेहं भिन्नः व्यापी साक्षितया सर्वव्यापकः समः एकरूपः न तु ज्ञानादिपरिणामैरनेकरूपः शुद्धः कर्तृत्वा दिकालुष्यशून्यः अत एव जन्मवृद्ध्यादिभिर्देहादिविकारैरसंस्पृष्टः अत एव सर्वगतः न तु देहपरिमाणः अतो मध्यपरिमाणत्वाभावादव्ययः। २९ परज्ञान मयः नित्यज्ञानरूपः न तु क्षणिकज्ञानात्मा असद्भिरविद्यामयैर्नामजात्यादिभिर्वर्तमानभूतभविष्यत्कालेषु योगशून्यः अतो विभुरीश्वरः स्वतन्त्र इत्यर्थः। ननु प्रतिदेहमात्मनो भेदविकारादिप्रतीतेः कथमेकत्वसर्वगतत्वादि तत्राह तस्येति। आत्मपरदेहेषु तत्तद्देहाकारावच्छिन्नतया सतः स्फुरतोऽप्येकाकारं

१०

परमात्मात्मनोर्योगः परमार्थ इतीष्यते मिथ्यैव यदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः। २७ तस्माच्छ्रेयांस्यशेषाणि नृपैतानि न संशयः परमा र्थस्तु भूपाल संक्षेपाच्छ्रूयतां मम २८ एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः जन्मवृद्ध्यादिरहित आत्मा सर्वगतोऽव्ययः। २९ परज्ञान मयोऽसद्भिर्नामजात्यादिभिर्विभुः न योगवान्न युक्तोऽभून्नैव पार्थिव योक्ष्यते ३० तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत्। विज्ञानं परमार्थोऽ सौ द्वैतिनोऽतथ्यदर्शिनः। ३१ वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः। अभेदव्यापिनो वायोस्तथास्य महात्मनः। ३२ एकत्वं रूपभेदश्च बाह्यकर्मप्रवृत्तिजः। देवादिभेदेऽपध्वस्ते नास्त्येवावरणो हि सः। ३३ ॥

यद्विज्ञानं स्वप्रकाशं अपरिच्छिन्नं ज्ञानं स एव परमार्थः भेदप्रतीतेरुपाधिनिबन्धनत्वात् द्वैतवादिनोऽपरमार्थदर्शिनः। ३१ एतद्दृष्टान्तेनोपपादयति वेणुरन्ध्रे ति द्वाभ्याम् अभेदव्यापिनो वायोर्यथा वेणुरन्ध्रोपाधिभेदेन षड्जऋषभगान्धारादिस्वराभिव्यञ्जकतया षड्जादिसंज्ञितो भेदः तथात्मनः समष्ट्युपाधिपरिच्छिन्नस्यात्म नः स्वत एकत्वं ३२ रूपभेदस्तु देवमनुष्यादिलक्षणो बाह्यकर्मप्रवृत्तिजः बाह्यानामात्मनः पृथग्भूतानां देहेन्द्रियादीनां यत्कर्म तस्य प्रवृत्तिः फलं ततो जातः पादोनेत्वाद्यानां कर्मभिर्ग्राह्यत्वावरणं न तु आत्मगतः इति बाह्यकर्मप्रवृत्तिजो भेदः न तु स्वतः तत्र हेतुः यस्माद्देवादिभेदे अपध्वस्ते अभिव्यक्ते नेति भेदाहङ्कारः देवादिभेदे देहनावदहङ्कारावरणे सति अभ्यासतो विनष्टे स भेदो नास्त्येव देवादिभेदमध्यास्त इति पाठे तु बाह्यकर्मावरणनिमित्तो रूपभेदाहङ्कारस्तु देवादिभेदमध्यास्ते अपि तु कल्पवर्त्मनेव तत्त्वभेदो नास्त्येव यस्मादावरणो सति स भेदः नान्यदित्यर्थः। ३३॥

इति श्रीस्वप्रकाशव्याख्यायां चतुर्दशोऽध्यायः १४ प्रमाणतर्कतः सम्यङ् मौनेन मेये विनिश्चिते बुध्यसंभावनोच्छित्त्यै निदाघाख्यानमीर्यते इत्युक्तेश्मागोप पत्तिभ्यां आत्मैकत्वे निश्चितेपि विपरीतभावनादार्ढ्याद्बुध्यसंभावनया मौनिनं तत्सीचिंतयानं भूयो विप्रः प्रत्युवाच १ निसर्गात्स्वभावादेव विज्ञाततत्त्वसद्भावो याथात्म्यं येन सः ३ हष्टादृष्टयोगात् मज्ञानस्याद्वैतवासनां नान्तर्कयामास ५ देविकायानद्यास्तटे ६ रम्योपवनपर्यन्ते उपवनान्ते तस्मिन्त्यो

इति श्री वि॰ द्वि॰ चतुर्दशोऽध्यायः १४ पराशर उवाच इत्युक्ते मौनिनं भूयश्चिंतयानं महीपतिं प्रत्युवाचाथ विप्रोसावद्वैतांतर्गतां कथां १ ब्राह्मण उवाच श्रूयतां नृपशार्दूल यद्गीतमृभुणा पुरा अवबोधं जनयता निदाघस्य महात्मनः २ ऋभुर्नामाभवत्पुत्रो ब्रह्मणः परमेष्ठिनः विज्ञाततत्त्वसद्भावो निसर्गादेव भूपते ३ तस्य शिष्यो निदाघोऽभूत्पुलस्त्यतनयः पुरा प्रादादशेषविज्ञानं स तस्मै परया मुदा ४ अवाप्तज्ञानतंत्रस्य न तस्याद्वैतवासनां स ऋभुस्तर्कयामास निदाघस्य नरेश्वर ५ देविकायास्तटे वीरनगरं नाम वै पुरम् समृद्धमतिरम्यं च पुलस्त्येन निवेशितं ६ रम्योपवनपर्यंते स तस्मिन्पार्थिवोत्तम निदाघो नाम योगज्ञ ऋभुशिष्योऽवसत्पुरा ७ दिव्ये वर्षसहस्रे तु समतीतेस्य तत्पुरं जगाम स ऋभुः शिष्यं निदाघमवलोककः ८ स तस्य वैश्वदेवांते द्वारालोकनगोचरे स्थितस्तेन गृहीतार्घ्यो निजवेश्म प्रवेशितः ९ प्रक्षालितांघ्रिपाणिं च कृतासनपरिग्रहं उवाच स द्विजश्रेष्ठो भुज्यतामिति सादरं १० ऋभुरुवाच भो विप्रवर्य भोक्तव्यं यदन्नं भवतो गृहे तत्कथ्यतां कदन्नेषु न प्रीतिः सततं मम ११ निदाघ उवाच सक्तुयावकवाट्यानामपूपानां च मे गृहे यद्रोचते द्विजश्रेष्ठ तत्त्वं भुंक्ष्व यथेच्छया १२ ऋभुरुवाच कदन्नानि द्विजैतानि मिष्टमन्नं प्रयच्छ मे संयावपायसादीनि द्रप्सफाणितवंति च १३ ॥

योगज्ञः कर्मसु प्रवीणः ७ तमवलोकितुं यो लोकयति यो यामिति एवं लिप्सुर्वा रत्नाकाविति काले देशे सत्यवलोकक इति रूपेण अवलोकयितुमित्यर्थः ८ तत्त्वित्परीक्षार्थमाह भो विप्रवर्येत्यादि ११ यावको यवविकारः वाटी भर्जितयवकंदमूलफलादि १२ मिष्टमधुरं संयावो गोधूमादिविकारः स्निग्धः सविभः द्रप्सं दधि घनेन रहितमरसं रसः फाणितं मिश्रं इति गौडोनिर्हलायुधः

शालिनि स्त्री प्रिये भक्ष्यस्योपसाधनमुपस्करः १४ तृप्तिः क्षुन्निवृत्तिः शान्तिः तुष्टिः संतोषः स्वास्थ्यं शान्तिरित्यर्थः १७ क्व निवासस्तवेति प्रश्नः १८ देहधर्मौ वि
देहस्य धर्मौ भ्रान्त्या पार्थिवाप्यधातुक्षयाभ्यामाप्यायेते ते च तद्द्वारा प्राणधर्मौ अशनायापिपासे प्राणस्येति श्रुतेः मम प्राणव्यतिरिक्तस्यैते न स्तः क्षुद्विरहे तु स्वा
भावसाम्यात्तृप्तिरस्त्येवेत्युपचारः २१ मनसः स्वस्थता च तुष्टिश्चेति यत्पृष्टं ते उभे चित्तधर्मौ चेतो यस्य चेतनसाक्षिणस्त्वमेवाधर्मौ तच्छिन्नमेव पृच्छ न तत्त्वं मा
त्मसाक्षी यतः पुमानेभिः प्राणचित्तधर्मैस्तृप्त्यादिभिः स्वाभाविकैर्न युज्यते २२ वायुवत्क्रमेण सर्वगतत्वं व्यापकत्वं न पिण्डव्यापित्वमुक्तं २४ न केवलमहमेवैवंभूतः।

निदाघ उवाच हे हे शालिनि मद्गेहे यत्किंचिदतिशोभनं भक्ष्योपसाधनं मिष्टं तेनास्यान्नं प्रसाधय १४ ब्राह्मण उवाच इत्युक्ता तेन सा पत्नी मिष्टमन्नं द्विजस्य यत् प्रसाधितवती तद्वै भर्तुर्वचनगौरवात् १५ तं भुक्तवन्तमिच्छातो मिष्टमन्नं महामुनिं निदाघः प्राह भूपाल प्रश्रयावनतः स्थितः १६ निदाघ उवाच अपि ते परमा तृप्तिरुत्पन्ना तुष्टिरेव च अपि ते मानसं स्वस्थमाहारेण कृतं द्विज १७ क्व नि
वासो भवान्विप्र क्व च गंतुं समुद्यतः आगम्यते च भवता यतस्तच्च द्विजोच्यतां १८ ऋभुरुवाच क्षुद्यस्य तस्य भुक्तेन्ने तृप्तिर्ब्राह्मण
जायते न मे क्षुन्नाभवत्तृप्तिः कस्मान्मां परिपृच्छसि १९ वह्निना पार्थिवे धातौ क्षपिते क्षुत्समुद्भवः भवत्यंभसि च क्षीणे नृणां तृडपि
जायते २० क्षुत्तृष्णे देहधर्माख्ये न ममैते यतो द्विज ततः क्षुत्संभवाभावात्तृप्तिरस्त्येव मे सदा २१ मनसः स्वस्थता तुष्टिश्चित्तधर्मा
विमौ द्विज चेतसो यस्य तत्पृच्छ पुमानेभिर्न युज्यते २२ क्व निवासस्तवेत्युक्ते क्व गंतासि च यत्त्वया कुतश्चागम्यते तत्र त्रितयेपि निबो
धमे २३ पुमान्सर्वगतो व्यापी आकाशवदयं यतः कुतः कुत्र क्व गंतासीत्येतदप्यर्थवत्कथं २४ सोहं गंता न चागंता नैकदेशनिके
तनः त्वं चान्ये च न च त्वं च नान्ये नैवाहमप्यहम् २५॥

किन्तु त्वं चान्ये च सर्वेपि देवा मनुष्यादयः प्रतीयन्ते न तु मम चान्येषां तत्त्वतश्च परिच्छेदः ग्रामसनादिष्वनीतेः कथं प्रत्यक्षविरुद्धमुच्यते तत्राह न च।
त्वमिति यस्त्वं लौकिकः परिच्छिन्नः प्रतीयसे स एव त्वं न भवसि ये चान्ये ग्रामेशिकाः प्रतीयन्ते तत्त्वया विधास्ते न भवन्ति अहमपि यादृशः त्वयो दृश्ये
न तादृशो हं किन्तु समहमित्यादि व्यवहारगोचरः परमात्मैव सर्वेषु त्वं तेन प्रत्यग्दृष्टा विवेकः २५ ॥ ॥

वि॰ पु॰
टि॰ टी॰
३७

यद्येवं तर्हि मृष्टमेवान्नं तया किमर्थं याचितेत्यत्राह मृष्टमिति यदेवं मयोक्तं किं वदसीति तत्र वनितासा कृता किं न मृष्टान्नमष्टप्रस्तावे मया कृतेत
योरवस्तुत्वोक्तिर्हा नाकि मध्यात्मत्वाश्रितं वदसि नेवेति तत्परीक्षैव कृता तत्त्वमस्पार्थितयोक्तं तन्तुदृष्टा वास्तवत्वात् २५ तदेवाह किमि
तिहामृष्टं किमस्वादु च मृष्टं च यथा वा किं मृष्टमन्नं नियतमस्ति भुंजानस्य पुंसः न किंचिदस्ति तदेवाह यन्मृष्टं तदेव यदा शक्तिमस्योद्वेगकारकं
मृष्टं भवति २७ अतिहृचितस्य वा मृष्टमेव पावकादि मृष्टं जायते तदेवं यदा मृष्टादेव जनः कदाचिदुद्विजते तदा आदिमध्यावसानेषु भवि

मृष्टान्नं मृष्टमप्येषा जिज्ञासा मे कृता तव किं वदिष्यसीति तत्रापि श्रूयतां द्विजसत्तम २६ किमस्वाद्वथवा मृष्टं भुंजतोन्नं द्विजोत्तम मृ
ष्टमेव यदामृष्टं तदेवोद्वेगकारकं २७ अमृष्टं जायते मृष्टं मृष्टादुद्विजते जनः आदिमध्यावसानेषु किमन्नं रुचिकारकं २८ मृ
न्मयं हि गृहं यद्वन्मृदा लिप्तं स्थिरं भवेत् पार्थिवोयं तथा देहः पार्थिवैः परमाणुभिः २९ यवगोधूममुद्गादि घृतं तैलं पयो दधि
गुडः फलादीनि तथा पार्थिवाः परमाणवः ३० तदेतद्भवता ज्ञात्वा मृष्टामृष्टविचारि यत् तन्मनः समतालंबि कार्यं साम्यं हि मुक्त
ये ३१ पराशर उवाच इत्याकर्ण्य वचस्तस्य परमार्थाश्रितं नृप प्रणिपत्य महाभागो निदाघो वाक्यमब्रवीत् ३२ प्रसीद मद्धिता
र्थाय कथ्यतां यस्त्वमागतः नष्टो मोहस्तवाकर्ण्य वचांस्येतानि मे द्विज ३३ ऋभुरुवाच ऋभुरस्मि तवाचार्यः प्रज्ञादानाय ते द्विज
इहागतोहं यास्यामि परमार्थस्तवोदितः ३४ एकमेवमिदं विद्धि न भेदि सकलं जगत् वासुदेवाभिधेयस्य स्वरूपं परमात्मनः ३५ ॥

यत्तं रुचिकारकं मृष्टं किमन्नमस्ति न किंचिदित्यर्थः २८ तर्हि किमिति मृष्टमेव त्वया भुक्तं तत्राह मृन्मयं हीति पार्थिवैः परमाणुभिः स्थूलैर्वपैवाद्यैः।
तः उपचितो देहः स्थिरो भवति २९ प्रारब्धकर्मोपस्थापितं मृष्टमयदेहनिर्वाहमात्रोपयोगितया भुक्तं न तु मृष्टबुद्ध्येति भावः देहधारणे च तत्त्वाप
व सर्वे मृष्टामृष्टाः परमाणव इत्याह यवेति ३० तथापि नयैव दृष्ट्या भोक्तव्यमित्याह तदेतदिति मृष्टामृष्टविचारशीलं यन्मनः तत्समतालंबनशी
लं कार्यं यतो मृष्टं भुंजानस्यापि मनसः साम्ये मुक्तेयं भवति ३१ प्रज्ञादानायेति प्रज्ञानोपासनात्मिका विद्या प्रज्ञोक्ता वै तेनिष्क्रान्तेः ३४ अभेदमेवाह

३८ इति श्रीमत्प्रकाशाख्यायां पंचदशोऽध्यायः १५ वर्षसहस्रे समतीते निदाघज्ञानदानाय यया विति वद्धात्मैक्यज्ञानमचिरकालवद्धृपदेशापेक्षित
याउर्लभतो दर्शयति ग्रस्सरणस्य शाद्विशे कथा जनसंमर्दवर्जकं क्षुत्क्षामं क्षुधा कंठो यस्य तं ३ आचार्यत्वं स्वीयं मख्यापयितुमभिवाद्येव ४ ५ ६

ब्राह्मण उवाच ततोऽप्युक्तो निदाघेन प्रणिपातपुरःसरं पूजितः परया भक्त्या इच्छातः प्रययावृभुः ३९ इति श्रीवि० द्वि० पंचदशोऽध्यायः १५
ब्राह्मण उवाच अथ वर्षसहस्रे तु समतीते नरेश्वर निदाघज्ञानदानाय तदेव नगरं ययौ १ नगरस्य बहिः सोऽथ निदाघं ददृशे मुनिः महा
बलपरीवारे पुरं विशति पार्थिवे २ दूरे स्थितं महाभागं जनसंमर्दवर्जकं क्षुत्क्षामकंठमायांतमरण्यात्ससमित्कुशं ३ दृष्ट्वा निदाघं स ऋभु
रुपगम्याभिवाद्य च उवाच कस्मादेकांते स्थीयते भवता द्विज ४ निदाघ उवाच भो विप्र जनसंमर्दो महानेष नरेश्वरे प्रविविक्षौ पुरं र
म्यं तेनात्र स्थीयते मया ५ ऋभुरुवाच एतौ द्विज नराजानौ युगपद्दर्शितौ मया नराधिपोऽत्र कतमः कतमश्चेतरो जनः कथ्यतां मे द्विजश्रे
ष्ठ त्वमभिज्ञो मतो मम ६ निदाघ उवाच योऽयं गजेंद्रमुन्मत्तमद्रिशृंगसमुच्छ्रितं अधिरूढो नरेंद्रोऽयं परलोकस्तथेतरः ७ ऋ
भुरुवाच एतौ हि गजराजानौ युगपद्दर्शितौ मया भवता न विशेषेण पृथक्चिह्नोपलक्षणौ ८ तत्कथ्यतां महाभाग विशेषो भवता
नयोः ज्ञातुमिच्छाम्यहं कोऽत्र गजः को वा नराधिपः ९ निदाघ उवाच गजो योऽयमधो ब्रह्मन्नुपर्यस्यैष भूपतिः वाह्यवाहकसंबं
धं को न जानाति वै द्विज १० ऋभुरुवाच जानाम्यहं यथा ब्रह्मंस्तथा मामवबोधय अधःशब्दनिगद्यं किं किं चोर्ध्वमभिधीयते ११
ब्राह्मण उवाच इत्युक्तः सहसारुह्य निदाघः प्राह तमृभुं श्रूयतां कथयाम्येष यन्मां त्वं परिपृच्छसि १२ उपर्यहं यथा राजा त्वमधः कुं
जरो यथा अवबोधाय ते ब्रह्मन्दृष्टांतो दर्शितो मया १३ ऋभु० त्वं राजेव द्विजश्रेष्ठ स्थितोऽहं गजवद्यदि तदेतत्त्वं समाचक्ष्व क
तमस्त्वमहं तथा १४ ब्राह्मण० इत्युक्तः सत्वरं तस्य प्रगृह्य चरणावुभौ निदाघः प्राह भगवानाचार्यस्त्वमृभुर्ध्रुवं १५ नान्य
स्याद्वैतसंस्कारसंस्कृतं मानसं तथा यथाचार्यस्य तेन त्वां मन्ये प्राप्तमहं गुरुं १६॥

एवं लोकः परजनः ८ तदपरिज्ञाने दापरायं परिहरति दृष्टांतो दर्शित इति १३ तदेतत्त्वं समाचक्ष्व कतमस्त्वमहं तथेति साक्षेपोक्त्या नत्वं तं नवा
त्वमेवाहमप्यहमिति एवं यदुक्तं तमहमित्यादिभेदो मिथ्येति तदेव स्मारितः से सस्य चरणौ प्रगृह्य हमाय निदाघः प्राह ध्रुवं त्वं ममाचार्य इति १५

वि पु।
द्वि।
१८

सर्वगतं सर्वं चापि ज्ञानवेनानयतं २१ अज्ञानहेयात्मनि व्युत्पन्नभेदभ्रममाकाशदृष्टांतेन संभावयन्नुपदिष्टमर्थं निगमयति सितनीलेति द्वाभ्यां २२
जातिस्मरणेनाप्रबोधोयेन भरतजन्मस्मरणेन हितदानृषभदेवेन यदुपदिष्टं ज्ञानं तदेव योगभ्रंशहेतभूतयारब्धकर्मावसाने सत्यस्मिं द्विजजन्म।

ऋभुरुवाच तवैवाजेवहितस्नेहस्थितोदंगजवद्यादि तदेतवैसमावत्वकतमस्तमहंतथा १ तवोपदेशदानाय पूर्वशुश्रूषणा
दृतः गुरुस्तेहमृभुर्नाम्ना निदाघसमुपागतः १७ तदेतदुपदिष्टं ते संक्षेपेण महामते परमार्थसारभूतं यदद्वैतमशेषतः १८
ब्राह्मण उवाच एवमुक्त्वा ययौ विद्वान्निदाघं स ऋभुर्गुरुः निदाघोप्युपदेशेन तेनाद्वैतपरोभवत् १९ सर्वभूतान्यभेदेन ददृ
शे स तदात्मनः यथा ब्रह्मपरो मुक्तिमवाप परमां द्विज २० तथा त्वमपि धर्मज्ञ तुल्यात्मरिपुबांधवः भव सर्वगतं जानन्नात्मानमव
नीपते २१ सितनीलादिभेदेन यथैकं दृश्यते नभः भ्रांतदृष्टिभिरात्मापि तथैकः सन्पृथक्पृथक् २२ एकः समस्तं यदिहास्ति
किंचित्तदच्युतो नास्ति परं ततोन्यत् सोहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यजभेदमोहम् २३
पराशर उवाच इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः
स चापि जातिस्मरणाप्तबोधस्तत्रैव जन्मन्यपव
र्गमाप २४ ॥ इति भरतन
रेन्द्रसारवृत्तं कथयति यश्च
शृणोति भक्ति
युक्तः स विमलमतिरेति नात्ममोहं भवति च संसरणेषु भक्तियोगः २५

द्वितीयांशे षोडशोध्यायः
१६॥

इति श्रीविष्णुपुराणे

स्याविर्भूतं तत्रैवजन्म
न्यपवर्गमाप २४ तद्वदितवक्तृ
श्रोतॄणामपि तदेव फलमाह इतीति २५ परानंदपदांभोजश्रीधरश्रीधरयतिना पुराणे वैष्णवे व्याख्या द्वितीयांशे यथामतिः ॥ इति श्रीस्वप्रकाशाख्या व्याख्या

यां द्वितीयांशे षोडशोध्यायः १६ ॥